यथा चेत्थ कारणं दुद्दसं, एवं परतो ''मिस्सकं गण्हथा''ति एत्थापि कारणं दुद्दसमेवाति वेदितब्बं। न हि पवारणप्पहोनकस्स अप्पबहुभावो पवारणाय भावाभावनिमित्तं, किञ्चरहि पवारणजनकस्स नामग्गहणमेवेत्थ पमाणं, तस्मा ''इदञ्च करम्बकेन न समानेतब्ब''न्तिआदिना यम्पि कारणं वुत्तं, तम्पि पुब्बे वुत्तेन संसन्दियमानं न समेति। यदि हि ''मिस्सक''न्ति भत्तमिस्सकेयेव रुळ्हं सिया, एवं सति यथा ''भत्तमिस्सकं गण्हथा''ति वुत्ते भत्तं बहुतरं वा समं वा अप्पतरं वा होति, पवारेतियेव, एवं ''मिस्सकं गण्हथा''ति वुत्तेपि अप्पतरेपि भत्ते पवारणाय भवितब्बं **मिस्सक**न्ति भत्तमिस्सकेयेव रुळ्हत्ता। तथा हि ''मिस्सकन्ति भत्तमिस्सकेयेव रुळ्हवोहारत्ता इदं पन 'भत्तमिस्सकमेवा'ति वुत्त''न्ति तीसुपि **गण्ठिपदेसु** वुत्तं। अथ ''मिस्सक''न्ति भत्तमिस्सके रुळ्हं न होति, मिस्सकभत्तं पन सन्धाय ''मिस्सकं गण्हथा''ति वुत्तन्ति। एवम्पि यथा अयागुके निमन्तने खीरादीहि सद्धिं मद्दितं भत्तमेव सन्धाय ''यागुं गण्हथा''ति वुत्ते पवारणा होति, एवमिधापि मिस्सकभत्तमेव सन्धाय ''मिस्सकं गण्हथा''ति वुत्ते भत्तं अप्पं वा होतु बहु वा, पवारणा एव सिया। तस्मा ''मिस्सक''न्ति भत्तमिस्सके रुळ्हं वा होतु सन्धायभासितं वा, उभयत्थापि पुब्बेनापरं न समेतीति किमेत्थ कारणचिन्ताय, ईदिसेसु पन ठानेसु अट्ठकथापमाणेनेव गन्तब्बन्ति अयं अम्हाकं खन्ति।

‘‘**विसुं कत्वा देती**ति भत्तस्स उपरि ठितं रसादिं विसुं गहेत्वा देती’’ति तीसुपि **गण्ठिपदेसु** वुत्तं। **केनचि** पन ‘‘यथा भत्तसित्थं न पतति, तथा गाळ्हं हत्थेन पीळेत्वा परिस्सावेत्वा देती’’ति वुत्तं। तथापि कारणं न दिस्सति। यथा हि भत्तमिस्सकं यागुं आहरित्वा ‘‘यागुं गण्हथा’’ति वत्वा यागुमिस्सकं भत्तम्पि देन्तं पटिक्खिपतो पवारणा न होति, एवमिधापि बहुखीररसादीसु भत्तेसु ‘‘खीरं गण्हथा’’तिआदीनि वत्वा खीरादीनि वा देतु खीरादिमिस्सकभत्तं वा, उभयथापि पवारणाय न भवितब्बं, तस्मा ‘‘विसुं कत्वा देती’’ति तेनाकारेन देन्तं सन्धाय वुत्तं, न पन भत्तमिस्सकं कत्वा दिय्यमानं पटिक्खिपतो पवारणा होतीति दस्सनत्थन्ति गहेतब्बं। यदि पन भत्तमिस्सकं कत्वा दिय्यमाने पवारणा होतीति अधिप्पायेन अट्ठकथायं ‘‘विसुं कत्वा देती’’ति वुत्तं, एवं सति अट्ठकथायेवेत्थ पमाणन्ति गहेतब्बं, न पन कारणन्तरं गवेसितब्बं।

सचे उक्कुटिकं निसिन्नो पादे अमुञ्चित्वापि भूमियं निसीदति, इरियापथं विकोपेन्तो नाम होतीति उक्कुटिकासनं अविकोपेत्वाव सुखेन निसीदितुं ‘‘**तस्स पन हेट्ठा…पे०… निसीदनकं दातब्ब**’’न्ति वुत्तं। ‘‘**आसनं अचालेत्वा**ति पीठे फुट्ठोकासतो आनिसदमंसं अमोचेत्वा, अनुट्ठहित्वाति वुत्तं होति, अदिन्नादाने विय ठानाचावनं न गहेतब्ब’’न्ति तीसुपि **गण्ठिपदेसु** वुत्तं।

अकप्पियकतन्ति एत्थ अकप्पियकतस्सेव अनतिरित्तभावतो कप्पियं अकारापेत्वा तस्मिं पत्ते पक्खित्तमूलफलादियेव अतिरित्तं न होति, सेसं पन पत्तपरियापन्नं अतिरित्तमेव होति, परिभुञ्जितुं वट्टति। तं पन मूलफलादिं परिभुञ्जितुकामेन ततो नीहरित्वा कप्पियं कारापेत्वा अञ्ञस्मिं भाजने ठपेत्वा अतिरित्तं कारापेत्वा भुञ्जितब्बं।

सो पुन कातुं न लभतीति तस्मिंयेव भाजने करियमानं पठमं कतेन सद्धिं कतं होतीति पुन सोयेव कातुं न लभति, अञ्ञो लभति। अञ्ञस्मिं पन भाजने तेन वा अञ्ञेन वा कातुं वट्टति। तेनाह ‘‘**येन अकतं, तेन कातब्बं। यञ्च अकतं, तं कातब्ब**’’न्ति। **तेनपी**ति एत्थ **पि**-सद्दो न केवलं अञ्ञेन वाति इममत्थं दीपेति। **एवं कत**न्ति अञ्ञस्मिं भाजने कतं। **पेसेत्वा**ति अनुपसम्पन्नस्स हत्थे पेसेत्वा। इमस्स विनयकम्मभावतो ‘‘**अनुपसम्पन्नस्स हत्थे ठितं न कारेतब्ब**’’न्ति वुत्तं।

सचे पन आमिससंसट्ठानीति एत्थ सचे मुखगतेनपि अनतिरित्तेन आमिसेन संसट्ठानि होन्ति, पाचित्तियमेवाति वेदितब्बं। तस्मा पवारितेन भोजनं अतिरित्तं कारापेत्वा भुञ्जन्तेनपि यथा अकतेन मिस्सं न होति, एवं मुखञ्च हत्थञ्च सुद्धं कत्वा भुञ्जितब्बं। किञ्चापि अप्पवारितस्स पुरेभत्तं यामकालिकादीनि आहारत्थाय परिभुञ्जतोपि अनापत्ति, पवारितस्स पन पवारणमूलकं दुक्कटं होतियेवाति ‘‘यामकालिकं…पे०… अज्झोहारे आपत्ति दुक्कटस्सा’’ति पाळियं वुत्तं।

२४१. कायेन भुञ्जनतो वाचाय आणापेत्वा अतिरित्तं अकारापनतो च आपज्जतीति ‘‘**कायवाचतो**’’ति वुत्तं। सेसमेत्थ उत्तानमेव। पवारितभावो, आमिसस्स अनतिरित्तता, काले अज्झोहरणन्ति इमानि पनेत्थ तीणि अङ्गानि।

पठमपवारणासिक्खापदवण्णना निट्ठिता।

६. दुतियपवारणासिक्खापदवण्णना

२४३. छट्ठे **साधारणमेवा**ति ‘‘हन्द भिक्खु खाद वा’’तिआदिना वुत्तपवारणाय साधारणं। ‘‘भुत्तस्मिं पाचित्तिय’’न्ति मातिकायं वुत्तत्ता भोजनपरियोसाने आपत्ति, न अज्झोहारे अज्झोहारे। **अभिहट्ठुं पवारेति, आपत्ति पाचित्तियस्सा**ति

इदञ्च भोजनपरियोसानंयेव सन्धाय वुत्तन्ति वेदितब्बं। सेसमेत्थ उत्तानमेव। पवारितता, पवारितसञ्ञिता, आसादनापेक्खता, अनतिरित्तेन अभिहट्ठुं पवारणा, भोजनपरियोसानन्ति इमानि पनेत्थ पञ्च अङ्गानि।

दुतियपवारणासिक्खापदवण्णना निट्ठिता।

७. विकालभोजनसिक्खापदवण्णना

२४७. सत्तमे **अग्गसमज्जो**ति उत्तमं नच्चं। तं किर पब्बतमत्थके ठत्वा एकं देवतं उद्दिस्स करोन्ति। नटानं नाटकानि **नटनाटकानि,** सीताहरणादीनि। **अपञ्ञत्ते सिक्खापदे**ति ऊनवीसतिवस्ससिक्खापदे अपञ्ञत्ते। **अदंसू**ति ''विहारं नेत्वा खादिस्सथा''ति अदंसु।

२४८-२४९. मूलकमूलादीनि उपदेसतोयेव वेदितब्बानि। न हि तानि परियायन्तरेन वुच्चमानानिपि सक्का विञ्ञातुं। परियायन्तरेपि हि वुच्चमाने तं तं नामं अजानन्तानं सम्मोहोयेव सिया, तस्मा तत्थ न किञ्चि वक्खाम। **खादनीयत्थ**न्ति खादनीयेन कत्तब्बकिच्चं। **नेव फरन्ती**ति न निप्फादेन्ति। **तेसु तेसु जनपदेसू**ति एत्थ ''एकस्मिं जनपदे आहारकिच्चं साधेन्तं सेसजनपदेसुपि न कप्पती''ति वदन्ति। **रुक्खवल्लिआदीन**न्ति हेट्ठा वुत्तमेव सम्पिण्डेत्वा वुत्तं। **अन्तोपथवीगतो**ति सालकल्याणीखन्धं सन्धाय वुत्तं। **सब्बकप्पियानी**ति मूलखन्धतचपत्तादिवसेन सब्बसो कप्पियानि। तेसम्पि नामवसेन न सक्का परियन्तं दस्सेतुन्ति सम्बन्धो। अच्छिवादीनं अपरिपक्कानेव फलानि यावजीविकानीति दस्सेतुं ''**अपरिपक्कानी**''ति वुत्तं।

हरीतकादीनं अट्ठीनीति एत्थ मिञ्जं पटिच्छादेत्वा ठितकपालानि यावजीविकानीति आचरिया। मिञ्जम्पि यावजीविकन्ति एके। **हिङ्गू**ति हिङ्गुरुक्खतो पग्घरितनिय्यासो। हिङ्गुजतुआदयोपि हिङ्गुविकतियो एव। तत्थ **हिङ्गुजतु** नाम हिङ्गुरुक्खस्स दण्डपत्तानि पचित्वा कतनिय्यासो, **हिङ्गुसिपाटिकं** नाम हिङ्गुपत्तानि पचित्वा कतनिय्यासो। ''अञ्ञेन मिस्सेत्वा कतो''तिपि वदन्ति। **तक**न्ति अग्गकोटिया निक्खन्तसिलेसो। **तकपत्ति**न्ति पत्ततो निक्खन्तसिलेसो। **तकपण्णि**न्ति पलासे भज्जित्वा कतसिलेसो। ''दण्डतो निक्खन्तसिलेसो तिपि वदन्ति। सेसमेत्थ उत्तानमेव। विकालता, यावकालिकता, अज्झोहरणन्ति इमानि पनेत्थ तीणि अङ्गानि।

विकालभोजनसिक्खापदवण्णना निट्ठिता।

८. सन्निधिकारकसिक्खापदवण्णना

२५२-३. अट्ठमे **तादिस**न्ति असूपब्यञ्जनं। **यंकिञ्चि यावकालिकं वा यामकालिकं वा**ति एत्थ ''यामकालिक''न्ति इमिना न केवलं यावकालिके एव सन्निधिपच्चया पाचित्तियं, अथ खो यामकालिकेपीति दस्सेति। ननु च यामकालिकं नेव खादनीयेसु अन्तोगधं, न भोजनीयेसु। तेनेव पदभाजनीये ''खादनीयं नाम पञ्च भोजनानि यामकालिकं सत्ताहकालिकं यावजीविकं ठपेत्वा अवसेसं खादनीयं नाम। भोजनीयं नाम पञ्च भोजनानी''ति वुत्तं, ''यो पन भिक्खु सन्निधिकारकं खादनीयं वा भोजनीयं वा खादेय्य वा भुञ्जेय्य वा, पाचित्तिय''न्ति च वुत्तं, तस्मा यामकालिके पाचित्तियेन भवितब्बन्ति कथं विञ्ञायतीति? वुच्चते – पदभाजने **खादनीय**-सद्दस्स अत्थदस्सनत्थं ''यामकालिकं ठपेत्वा''ति वुत्तं, न पन सन्निधिपच्चया अनापत्तिदस्सनत्थं। खादितब्बञ्हि यंकिञ्चि खादनीयन्ति अधिप्पेतं, न च यामकालिकेसु किञ्चि खादितब्बं अत्थि पातब्यभावतो। तस्मा किञ्चापि यामकालिकं खादनीयभोजनीयेहि न सङ्गहितं,

तथापि अनापत्तिं दस्सेन्तेन ''अनापत्ति यामकालिकं यामे निदहित्वा भुञ्जती''ति वचनतो यामातिक्कमे सन्निधिपच्चया पाचित्तियेन भवितब्बन्ति विञ्ञायति। ''यामकालिकेन, भिक्खवे, सत्ताहकालिकं यावजीविकं तदहुपटिग्गहितं यामे कप्पति, यामातिक्कन्ते न कप्पती''ति (महाव० ३०५) इमिनापि चायमत्थो सिद्धो। तेनेव भगवतो अधिप्पायञ्ञूहि अट्ठकथाचरियेहि यामकालिके पाचित्तियमेव वुत्तं।

पटिग्गहणेति गहणमेव सन्धाय वुत्तं। पटिग्गहितमेव हि तं, पुन पटिग्गहणकिच्चं नत्थि। तेनेव **''अज्झोहरितुकामताय गण्हन्तस्स पटिग्गहणे''**ति वुत्तं। **मातिकाट्ठकथायं** (कङ्खा० अट्ठ० सन्निधिकारकसिक्खापदवण्णना) पन ''अज्झोहरिस्सामीति गण्हन्तस्स पटिग्गहणे''इच्चेव वुत्तं। **यन्ति** यं पत्तं। **सन्दिस्सती**ति यागुया उपरि सन्दिस्सति। तेलवण्णे पत्ते सतिपि निस्नेहभावे अङ्गुलिया घंसन्तस्स वण्णवसेनेव लेखा पञ्ञायति, तस्मा तत्थ अनापत्तीति दस्सनत्थं **''सा अब्बोहारिका''**ति वुत्तं। **सयं पटिग्गहेत्वा अपरिच्चत्तमेव हि दुतियदिवसे न वट्टती**ति एत्थ पटिग्गहणे अनपेक्खविस्सज्जनेन अनुपसम्पन्नस्स निरपेक्खदानेन वा विजहितपटिग्गहणं परिच्चत्तमेव होतीति ''अपरिच्चत्त''न्ति इमिना उभयथापि अविजहितपटिग्गहणमेव वुत्तं। तस्मा यं परस्स परिच्चजित्वा अदिन्नम्पि सचे पटिग्गहणे निरपेक्खविस्सज्जनेन विजहितपटिग्गहणं होति, तम्पि दुतियदिवसे वट्टतीति वेदितब्बं।

यदि एवं ''पत्तो दुद्धोतो होती''तिआदीसु कस्मा आपत्ति वुत्ताति? ''पटिग्गहणं अविस्सज्जेत्वाव सयं वा अञ्ञेन वा तुच्छं कत्वा न सम्मा धोवित्वा निट्ठापिते पत्ते लग्गम्पि अविजहितपटिग्गहणमेव होतीति तत्थ आपत्ती''ति तीसुपि **गण्ठिपदेसु** वुत्तं। केचि पन ''सामणेरानं परिच्चजन्तीति इमस्मिं अधिकारे ठत्वा 'अपरिच्चत्तमेवा'ति वुत्तत्ता अनुपसम्पन्नस्स परिच्चत्तमेव वट्टति, अपरिच्चत्तं न वट्टतीति आपन्नं, तस्मा निरालयभावेन पटिग्गहणे विजहितेपि अनुपसम्पन्नस्स अपरिच्चत्तं न वट्टती''ति वदन्ति, तं युत्तं विय न दिस्सति। यदग्गेन हि पटिग्गहणं विजहति, तदग्गेन सन्निधिम्पि न करोति विजहितपटिग्गहणस्स अप्पटिग्गहितसदिसत्ता। पटिग्गहेत्वा निदहितेयेव च सन्निधिपच्चया आपत्ति वुत्ता। ''पटिग्गहेत्वा एकरत्तं वीतिनामितस्सेतं अधिवचन''न्ति हि वुत्तं।

पाळियं ''सत्ताहकालिकं यावजीविकं आहारत्थाय पटिग्गण्हाति, आपत्ति दुक्कटस्सा''तिआदिना सन्निहितेसु सत्ताहकालिकयावजीविकेसु पुरेभत्तम्पि आहारत्थाय अज्झोहरणेपि दुक्कटस्स वुत्तत्ता यामकालिकेपि आहारत्थाय अज्झोहरणे विसुं दुक्कटेनपि भवितब्बन्ति आह **''आहारत्थाय अज्झोहरतो दुक्कटेन सद्धिं पाचित्तिय''**न्ति। **पकतिआमिसे**ति ओदनादिकप्पियामिसे। **यामकालिकं सति पच्चये सामिसेन मुखेन अज्झोहरतो द्वे**ति हिय्यो पटिग्गहितयामकालिकं अज्ज पुरेभत्तं सामिसेन मुखेन भुञ्जतो सन्निहितयामकालिकपच्चया एकं पाचित्तियं, सन्निहितेन संसट्ठआमिसपच्चया एकन्ति द्वे पाचित्तियानि। **विकप्पद्वयेपी**ति सामिसेन निरामिसेनाति वुत्तविधानद्वये। **दुक्कटं वड्ढती**ति आहारत्थाय अज्झोहरणपच्चया दुक्कटं वड्ढति। **थुल्लच्चयञ्च दुक्कटञ्च वड्ढती**ति मनुस्समंसे थुल्लच्चयं, सेसअकप्पियमंसेसु दुक्कटं वड्ढति।

२५५. पटिग्गहणपच्चया ताव दुक्कटन्ति एत्थ सन्निहितत्ता पुरेभत्तम्पि दुक्कटमेव। सति पच्चये पन सन्निहितम्पि सत्ताहकालिकं यावजीविकं भेसज्जत्थाय गण्हन्तस्स परिभुञ्जन्तस्स च अनापत्तियेव। सेसमेत्थ उत्तानमेव। यावकालिकयामकालिकता, सन्निधिभावो, तस्स अज्झोहरणन्ति इमानि पनेत्थ तीणि अङ्गानि।

सन्निधिकारकसिक्खापदवण्णना निट्ठिता।

९. पणीतभोजनसिक्खापदवण्णना

२५७-२५९. नवमे पणीतसंसट्ठानि भोजनानि **पणीतभोजनानि**। यथा हि आजञ्ञयुत्तो रथो ''आजञ्ञरथो''ति वुच्चति, एवमिधापि पणीतसंसट्ठानि सत्तधञ्ञनिब्बत्तानि भोजनानि ''पणीतभोजनानी''ति वुत्तानि। येहि पन पणीतेहि संसट्ठानि, तानि ''पणीतभोजनानी''ति वुच्चन्ति, तेसं पभेददस्सनत्थं ''सेय्यथिदं, सप्पि नवनीत''न्तिआदि पाळियं वुत्तं। ''येसं मंसं कप्पती''ति इदञ्च पाचित्तियवत्थुपरिच्छेददस्सनत्थं वुत्तं, न पन कप्पियवत्थुपरिच्छेददस्सनत्थं। न हि अकप्पियमंससत्तानं सप्पिआदीनि न कप्पन्ति। एकञ्हि मनुस्सवसातेलं ठपेत्वा सब्बेसं खीरसप्पिनवनीतवसातेलेसु अकप्पियं नाम नत्थि। **सप्पिभत्त**न्ति एत्थ किञ्चापि सप्पिसंसट्ठं भत्तं सप्पिभत्तं, सप्पि च भत्तञ्च सप्पिभत्तन्तिपि विञ्ञायति, अट्ठकथासु पन ''सालिभत्तं विय सप्पिभत्तं नाम नत्थी''ति कारणं वत्वा दुक्कटस्सेव दळ्हतरं कत्वा वुत्तत्ता न सक्का अञ्ञं वत्तुं। अट्ठकथाचरिया एव हि ईदिसेसु ठानेसु पमाणं।

मूलन्ति कप्पियभण्डं सन्धाय वुत्तं। **अनापत्ती**ति विसङ्केतत्ता सब्बाहियेव आपत्तीहि अनापत्ति। केचि पन ''पाचित्तियेनेव अनापत्ति वुत्ता, सूपोदनविञ्ञत्तिदुक्कटं पन होतियेवा''ति वदन्ति, तं न गहेतब्बं। **कप्पियसप्पिना अकप्पियसप्पिना**ति च इदं कप्पियाकप्पियमंसानं वसेन वुत्तं, तस्मा कप्पियमंससप्पिना अकप्पियमंससप्पिनाति एवमेत्थ अत्थो गहेतब्बो। **नानावत्थुकानी**ति सप्पिनवनीतादीनं वसेन वुत्तं।

२६१. महानामसिक्खापदेन कारेतब्बोति एत्थ –

> ''अगिलानेन भिक्खुना चतुमासपच्चयपवारणा सादितब्बा अञ्ञत्र पुनपवारणाय अञ्ञत्र निच्चपवारणाय, ततो चे उत्तरि सादियेय्य, पाचित्तिय''न्ति (पाचि० ३०६) –

इदं महानामसिक्खापदं नाम। इमिना च सिक्खापदेन सङ्घवसेन गिलानपच्चयपवारणाय पवारितट्ठाने सचे तत्थ रत्तीहि वा भेसज्जेहि वा परिच्छेदो कतो होति, एत्तकायेव रत्तियो एत्तकानि वा भेसज्जानि विञ्ञापेतब्बानीति। अथ ततो रत्तिपरियन्ततो वा भेसज्जपरियन्ततो वा उत्तरि न भेसज्जकरणीयेन वा भेसज्जं अञ्ञभेसज्जकरणीयेन वा अञ्ञं भेसज्जं विञ्ञापेन्तस्स पाचित्तियं वुत्तं। तस्मा अगिलानो गिलानसञ्ञी हुत्वा पञ्च भेसज्जानि विञ्ञापेन्तो न भेसज्जकरणीयेन भेसज्जं विञ्ञापेन्तो नाम होतीति ''महानामसिक्खापदेन कारेतब्बो''ति वुत्तं। **एतानि पाटिदेसनीयवत्थूनी**ति पाळियं आगतसप्पिआदीनि सन्धाय वुत्तं। पाळियं अनागतानि पन अकप्पियसप्पिआदीनि भिक्खुनीनम्पि दुक्कटवत्थूनीति वेदितब्बं। **सूपोदनविञ्ञत्तिय**न्ति भिक्खूनं पाचित्तियवत्थूनि भिक्खुनीनं पाटिदेसनीयवत्थूनि च ठपेत्वा अवसेसविञ्ञत्तिं सन्धाय वुत्तं। सेसमेत्थ उत्तानमेव। पणीतभोजनता, अगिलानता, अकतविञ्ञत्तिया पटिलाभो, अज्झोहरणन्ति इमानि पनेत्थ चत्तारि अङ्गानि।

पणीतभोजनसिक्खापदवण्णना निट्ठिता।

१०. दन्तपोनसिक्खापदवण्णना

२६३. दसमे **अय्यवोसाटितकानी**ति पितुपिण्डस्सेतं अधिवचनं। **उम्मारे**ति सुसाने कतगेहस्स अत्तनो गेहस्स वा उम्मारे। **घनबद्धो**ति घनमंसेन सम्बद्धो, कथिनसंहतसरीरोति वुत्तं होति।

२६४. **मुखद्वार**न्ति गलनाळिकं। **आहार**न्ति अज्झोहरितब्बं यंकिञ्चि यावकालिकादिं। **आहरेय्या**ति मुखद्वारं पवेसेय्य। मुखेन वा पविट्ठं होतु नासिकाय वा, गलेन अज्झोहरणीयत्ता सब्बम्पि तं मुखद्वारं पवेसितमेव होति। यस्मा पन ते भिक्खू अनाहारेपि उदके आहारसञ्ञाय दन्तपोने च मुखद्वारं आहटं इदन्ति सञ्ञाय कुक्कुच्चायिंसु, तस्मा वुत्तं **''ते भिक्खू अदिन्नं…पे०… सम्मा अत्थं असल्लक्खेत्वा कुक्कुच्चायिंसू''**ति। उदकञ्हि यथासुखं पातुं दन्तकट्ठञ्च दन्तपोनपरिभोगेन परिभुञ्जितुं वट्टति, तस्स पन रसं गिलितुं न वट्टति। सचेपि दन्तकट्ठरसो अजानन्तस्स अन्तो पविसति, पाचित्तियमेव। अनज्झोहरन्तेन पन दन्तकट्ठं वा होतु अञ्ञं वा, किञ्चि मुखे पक्खिपितुं वट्टति।

२६५. **अकल्लको**ति गिलानो सहत्था परिभुञ्जितुं असक्कोन्तो मुखेन पटिग्गण्हाति। **उच्चारणमत्त**न्ति उक्खिपनमत्तं। **एकदेसेनपी**ति अङ्गुलियापि फुट्ठमत्तेन। **तं चे पटिग्गण्हाति, सब्बं पटिग्गहितमेवा**ति वेणुकोटिया बन्धित्वा ठपितत्ता। सचेपि भूमियं ठितमेव घटं दायकेन हत्थपासे ठत्वा घटं दस्सामीति दिन्नवेणुकोटिग्गहणवसेन पटिग्गण्हाति, उभयकोटिबद्धं सब्बम्पि पटिग्गहितमेव होति। भिक्खुस्स अत्थाय अपीळेत्वा पकतिया पीळियमानउच्छुरसं सन्धाय ''गण्हथा''ति वुत्तत्ता **''अभिहारो न पञ्ञायती''**ति वुत्तं। हत्थपासे ठितस्स पन भिक्खुस्स अत्थाय पीळियमाना उच्छुतो पग्घरन्तं रसं गण्हितुं वट्टति, दोणिकाय सयं पग्घरन्तं उच्छुरसं मज्झे आवरित्वा आवरित्वा विस्सज्जितम्पि गण्हितुं वट्टति। **कत्थचि** अट्ठकथासु।

असंहारिमेति थाममज्झिमेन पुरिसेन असंहारिये। **''तिन्तिणिकादिपण्णेसू''**ति वचनतो साखासु पटिग्गहणं रुहतीति दट्ठब्बं। **पुञ्छित्वा पटिग्गहेत्वा**ति एत्थ ''पुञ्छिते पटिग्गहणकिच्चं नत्थि, तस्मा पुञ्छित्वा गहेत्वाति एवमत्थो गहेतब्बो''ति वदन्ति। पुञ्छित्वा पटिग्गहेत्वा वाति एवमेत्थ अत्थो दट्ठब्बो। पत्ते पतितरजनचुण्णञ्हि अब्भन्तरपरिभोगत्थाय अपरिहटभावतो पटिग्गहेत्वा परिभुञ्जितुं वट्टति। पुब्बाभोगस्स अनुरूपेन **''अनुपसम्पन्नस्स दत्वा…पे०… वट्टती''**ति वुत्तं। यस्मा पन तं ''अञ्ञस्स दस्सामी''ति चित्तुप्पादमत्तेन परसन्तकं नाम न होति, तस्मा तस्स अदत्वापि पटिग्गहेत्वा परिभुञ्जितुं वट्टति।

भिक्खुस्स देतीति अञ्ञस्स भिक्खुस्स देति। **कञ्जिक**न्ति खीररसादिं यंकिञ्चि द्रवं सन्धाय वुत्तं। हत्थतो मोचेत्वा पुन गण्हाति, उग्गहितकं होतीति आह **''हत्थतो अमोचेन्तेनेवा''**ति। **आलुलेन्तान**न्ति आलोलेन्तानं, अयमेव वा पाठो। आहरित्वा भूमियं ठपितत्ता अभिहारो नत्थीति आह **''पत्तो पटिग्गहेतब्बो''**ति। **पठमतरं उळुङ्कतो थेवा पत्ते पतन्ती**ति एत्थ ''यथा पठमतरं पतितथेवे दोसो नत्थि, तथा आकिरित्वा अपनेन्तानं पच्छा पतितथेवेपि अभिहटत्ता नेवत्थि दोसो''ति वदन्ति। **चरुकेना**ति खुद्दकभाजनेन। **मुखवट्टियापि गहेतुं वट्टती**ति मुखवट्टिं उक्खिपित्वा हत्थे फुसापिते गण्हितुं वट्टति। **केची**ति अभयगिरिवासिनो। **एस नयो**ति कायपटिबद्धपटिबद्धम्पि कायपटिबद्धमेवाति अयं नयो। तथा च तत्थ कायपटिबद्धे तंपटिबद्धे च थुल्लच्चयमेव वुत्तं।

तेनाति यस्स भिक्खुनो सन्तिकं गतं, तेन। **तस्मा**ति यस्मा मूलट्ठस्सेव परिभोगो अनुञ्ञातो, तस्मा। तं दिवसं हत्थेन गहेत्वा दुतियदिवसे पटिग्गहेत्वा परिभुञ्जन्तस्स उग्गहितकपटिग्गहितं होतीति आह **''अनामसित्वा''**ति। अप्पटिग्गहितत्ता **''सन्निधिपच्चया अनापत्ती''**ति वुत्तं। अप्पटिग्गहेत्वा परिभुञ्जन्तस्स अदिन्नमुखद्वारापत्ति होतीति आह **''पटिग्गहेत्वा पन परिभुञ्जितब्ब''**न्ति। **''तं दिवसं…पे०… न ततो पर''**न्ति वचनतो तं दिवसं हत्थेन गहेत्वा वा अग्गहेत्वा वा ठपितं दुतियदिवसे अप्पटिग्गहेत्वा परिभुञ्जन्तस्स अदिन्नमुखद्वारापत्ति होति, हत्थेन गहेत्वा ठपितं दुतियदिवसे पटिग्गहेत्वा परिभुञ्जन्तस्स पन उग्गहितकपटिग्गहितं होति। अप्पटिग्गहितमेव हि हत्थेन गहेत्वा ठपितं। **''सामं गहेत्वा**

परिभुञ्जितु''न्ति हि वचनतो अप्पटिग्गहितस्सेव तस्मिं दिवसे परिभोगो अनुञ्ञातो। तस्मा यं वुत्तं **गण्ठिपदे ''तं दिय्यमानं पतती**ति एत्थ यथा गणभोजनादीसु गिलानादीनं कुक्कुच्चायन्तानं गणभोजनं अनुञ्ञातं, एवमिधापि भगवता पटिग्गहितमेव कुक्कुच्चविनोदनत्थं अनुञ्ञात''न्ति, तं न गहेतब्बं। ''तं दिय्यमानं पतती''ति अविसेसेन वुत्तत्ता चतूसुपि कालिकेसु अयं नयो वेदितब्बो।

सत्थकेनाति पटिग्गहितसत्थकेन। कस्मा पनेत्थ उग्गहितपच्चया सन्निधिपच्चया वा दोसो न सियाति आह **''न हि तं परिभोगत्थाय परिहरन्ती''**ति। इमिनाव बाहिरपरिभोगत्थं सामं गहेत्वा अनुपसम्पन्नेन दिन्नं वा गहेत्वा परिहरितुं वट्टतीति दीपेति। तस्मा पत्तसम्मक्खनादिअत्थं सामं गहेत्वा परिहटतेलादिं सचे परिभुञ्जितुकामो होति, पटिग्गहेत्वा परिभुञ्जन्तस्स अनापत्ति। अब्भन्तरपरिभोगत्थं पन सामं गहितं पटिग्गहेत्वा परिभुञ्जन्तस्स उग्गहितकपटिग्गहितं होति, अप्पटिग्गहेत्वा परिभुञ्जन्तस्स अदिन्नमुखद्वारापत्ति होति, अब्भन्तरपरिभोगत्थमेव अनुपसम्पन्नेन दिन्नं गहेत्वा परिहरन्तस्स सिङ्गीलोणकप्पो विय सन्निधिपच्चया आपत्ति होति। केचि पन ''थाममज्झिमस्स पुरिसस्स उच्चारणमत्तं होतीतिआदिना वुत्तपञ्चङ्गसम्पत्तिया पटिग्गहणस्स रुहनतो बाहिरपरिभोगत्थम्पि सचे अनुपसम्पन्नेन दिन्नं गण्हाति, पटिग्गहितमेवा''ति वदन्ति। एवं सति इध बाहिरपरिभोगत्थं अनुपसम्पन्नेन दिन्नं गहेत्वा परिहरन्तस्स सन्निधिपच्चया आपत्ति वत्तब्बा सिया, ''न हि तं परिभोगत्थाय परिहरन्ती''ति च न वत्तब्बं, तस्मा बाहिरपरिभोगत्थं गहितं पटिग्गहितं नाम न होतीति वेदितब्बं। यदि एवं पञ्चसु पटिग्गहणङ्गेसु ''परिभोगत्थाया''ति विसेसनं वत्तब्बन्ति? न वत्तब्बं। पटिग्गहणञ्हि परिभोगत्थमेव होतीति ''परिभोगत्थाया''ति विसुं अवत्वा ''तञ्चे भिक्खु कायेन वा कायपटिबद्धेन वा पटिग्गण्हाती''ति एत्तकमेव वुत्तं। अपरे पन ''सतिपि पटिग्गहणे 'न हि तं परिभोगत्थाय परिहरन्ती'ति इध अपरिभोगत्थाय परिहरणे अनापत्ति वुत्ता''ति वदन्ति। **उदुक्खलमुसलानि खिय्यन्ती**ति एत्थ उदुक्खलमुसलानं खयेन पिसितकोट्टितभेसज्जेसु सचे आगन्तुकवण्णो पञ्ञायति, न वट्टति।

सुद्धं उदकं होतीति रुक्खसाखादीहि गळित्वा पतनउदकं सन्धाय वुत्तं। **पत्तो वास्स पटिग्गहेतब्बो**ति एत्थापि पत्तगतं छुपित्वा देन्तस्स हत्थलग्गेन आमिसेन दोसाभावत्थं पत्तपटिग्गहणन्ति अब्भन्तरपरिभोगत्थमेव पटिग्गहणं वेदितब्बं। **यं सामणेरस्स पत्ते पतति...पे०... पटिग्गहणं न विजहती**ति एत्थ पुनप्पुनं गण्हन्तस्स अत्तनो पत्ते पक्खित्तमेव ''अत्तनो सन्तक''न्ति सन्निट्ठानकरणतो हत्थगतं पटिग्गहणं न विजहति, परिच्छिन्दित्वा दिन्नं पन गण्हन्तस्स गहणसमयेयेव ''अत्तनो सन्तक''न्ति सन्निट्ठानस्स कतत्ता हत्थगतं पटिग्गहणं विजहति। **केसञ्चि अत्थाय ओदनं पक्खिपती**ति एत्थ अनुपसम्पन्नस्स अत्थाय पक्खिपन्तोपि ''आगन्त्वा गण्हिस्सती''ति सयमेव पक्खिपित्वा ठपनतो पटिग्गहणं न विजहति, अनुपसम्पन्नस्स हत्थे पक्खित्तं पन अनुपसम्पन्नेनेव ठपितं नाम होतीति पटिग्गहणं विजहति परिच्चत्तभावतो। तेन वुत्तं **''सामणेर...पे०... परिच्चत्तत्ता''**ति।

पटिग्गहणूपगं भारं नाम थाममज्झिमस्स पुरिसस्स उक्खेपारहं। किञ्चापि अविस्सज्जेत्वाव अञ्ञेन हत्थेन पिदहन्तस्स दोसो नत्थि, तथापि न पिदहितब्बन्ति अट्ठकथापमाणेनेव गहेतब्बं। **मच्छिकवारणत्थ**न्ति एत्थ ''सचेपि साखाय लग्गरजं पत्ते पतति, सुखेन परिभुञ्जितुं सक्काति साखाय पटिग्गहितत्ता अब्भन्तरपरिभोगत्थमेविध पटिग्गहणन्ति मूलपटिग्गहणमेव वट्टती''ति वुत्तं। अपरे पन ''मच्छिकवारणत्थन्ति एत्थ वचनमत्तं गहेत्वा बाहिरपरिभोगत्थं गहित''न्ति वदन्ति। **तस्मिम्पि असती**ति चाटिया वा कुण्डके वा असति। **अनुपसम्पन्नं गाहापेत्वा**ति तंयेव अज्झोहरणीयभण्डं अनुपसम्पन्नेन गाहापेत्वा। **थेरस्स पत्तं अनुथेरस्सा**ति थेरस्स पत्तं अत्तना गहेत्वा अनुथेरस्स देति। **तुय्हं यागुं मय्हं देही**ति एत्थ एवं वत्वा सामणेरस्स पत्तं गहेत्वा अत्तनोपि पत्तं तस्स देति। **एत्थ पना**ति पण्डितो

सामणेरोतिआदिपत्तपरिवत्तनकथाय। **कारणं उपपरिक्खितब्ब**न्ति यथा मातुआदीनं तेलादीनि हरन्तो तथारूपे किच्चे अनुपसम्पन्नेन अपरिवत्तेत्वाव परिभुञ्जितुं लभति, एवमिध पत्तपरिवत्तनं अकत्वा परिभुञ्जितुं न लभतीति एत्थ कारणं वीमंसितब्बन्ति अत्थो।

एत्थ पन ''सामणेरेहि गहिततण्डुलेसु परिक्खीणेसु अवस्सं अम्हाकं सामणेरा सङ्गहं करोन्तीति वितक्कुप्पत्ति सम्भवति, तस्मा तं परिवत्तेत्वाव परिभुञ्जितब्बं। मातापितूनं अत्थाय पन छायत्थाय वा गहणे परिभोगासा नत्थि, तस्मा तं वट्टती''ति कारणं वदन्ति। तेनेव **आचरियबुद्धदत्तत्थेरेन**पि वुत्तं –

''मातापितूनमत्थाय, तेलादिहरतोपि च।
साखं छायादिअत्थाय, इमेसं न विसेसति॥

''तस्मा हिस्स विसेसस्स, चिन्तेतब्बं तु कारणं।
तस्स सालयभावं तु, विसेसं तक्कयाम त''न्ति॥

इदमेवेत्थ युत्ततरं अवस्सं तथाविधवितक्कुप्पत्तिया सम्भवतो। न सक्का हि एत्थ वितक्कं सोधेतुन्ति। मातादीनं अत्थाय हरणे पन नावस्सं तथाविधवितक्कुप्पत्तीति सक्का वितक्कं सोधेतुं। यत्थ हि वितक्कं सोधेतुं सक्का, तत्थ नेवत्थि दोसो। तेनेव वक्खति ''सचे पन सक्कोति वितक्कं सोधेतुं, ततो लद्धं खादितुम्पि वट्टती''ति।

निच्चालेतुं न सक्कोतीति निच्चालेत्वा सक्खरा अपनेतुं न सक्कोति। **आधारके पत्तो ठपितो होती**ति पटिग्गहेतब्बपत्तं सन्धाय वुत्तं। **चालेती**ति विना कारणं चालेति। सतिपि कारणे भिक्खूनं परिभोगारहं चालेतुं न वट्टति। किञ्चापि ''अनुजानामि, भिक्खवे, अमनुस्सिकाबाधे आमकमंसं आमकलोहित''न्ति (महाव० २६४) तादिसे आबाधे अत्तनो अत्थाय आमकमंसपटिग्गहणं अनुञ्ञातं, ''आमकमंसपटिग्गहणा पटिविरतो होती''ति च सामञ्ञतो पटिक्खित्तं, तथापि अत्तनो अञ्ञस्स वा भिक्खुनो अत्थाय अग्गहितत्ता **''सीहविघासादिं…पे०… वट्टती''**ति वुत्तं। **सक्कोति वितक्कं सोधेतु**न्ति मय्हम्पि देतीति वितक्कस्स अनुप्पन्नभावं सल्लक्खेतुं सक्कोति, सामणेरस्स दस्सामीति सुद्धचित्तेन मया गहितन्ति वा सल्लक्खेतुं सक्कोति।

सचे पन मूलेपि पटिग्गहितं होतीति एत्थ ''गहेत्वा गते मय्हम्पि ददेय्युन्ति सञ्ञाय सचे पटिग्गहितं होती''ति वदन्ति। **कोट्ठासे करोती**ति भिक्खुसामणेरा च अत्तनो अत्तनो अभिरुचितं कोट्ठासं गण्हन्तूति सब्बेसं समके कोट्ठासे करोति। **गहितावसेस**न्ति सामणेरेहि गहितकोट्ठासतो अवसेसं। **गण्हित्वा**ति ''मय्हं इदं गण्हिस्सामी''ति गहेत्वा। इध गहितावसेसं नाम तेन गण्हित्वा पुन ठपितं। **पटिग्गहेत्वा**ति तदहु पटिग्गहेत्वा। तेनेव **''यावकालिकेन यावजीविकसंसग्गे दोसो नत्थी''**ति वुत्तं। सचे पन पुरिमदिवसे पटिग्गहेत्वा ठपिता होति, सामिसेन मुखेन तस्सा वट्टिया धूमं पिवितुं न वट्टति। **समुद्दोदकेना**ति अप्पटिग्गहितसमुद्दोदकेन। यस्मा कतकट्ठि उदकं पसादेत्वा विसुं तिट्ठति, तस्मा **''अब्बोहारिक''**न्ति वुत्तं। **लग्गती**ति मुखे हत्थे च उदके सुक्खे सेतवण्णं दस्सेन्तं लग्गति। **पानीयं गहेत्वा**ति अत्तनोयेव अत्थाय गहेत्वा। सचे पन पीतावसेसं तत्थेव आकिरिस्सामीति गण्हाति, पुन पटिग्गहणकिच्चं नत्थि। **विक्खम्भेत्वा**ति वियूहित्वा, अपनेत्वाति अत्थो।

महाभूतेसूति सरीरनिस्सितेसु महाभूतेसु। **पतती**ति विच्छिन्दित्वा पतति। विच्छिन्दित्वा पतितमेव हि पटिग्गहेतब्बं, न

इतरं। **अल्लदारुं रुक्खतो छिन्दित्वापि कातुं वट्टती**ति एत्थ मत्तिकत्थाय पथविं खणितुम्पि वट्टतीति वेदितब्बं। **सप्पदट्ठक्खणेयेव वट्टती**ति असति कप्पियकारके सामं गहेत्वा परिभुञ्जितुं वट्टति, अञ्ञदा पटिग्गहापेत्वा परिभुञ्जितब्बं। सेसमेत्थ उत्तानमेव। अप्पटिग्गहितता, अननुञ्ञातता, धूमादिअब्बोहारिकाभावो, अज्झोहरणन्ति इमानि पनेत्थ चत्तारि अङ्गानि।

दन्तपोनसिक्खापदवण्णना निट्ठिता।

निट्ठितो भोजनवग्गो चतुत्थो।

५. अचेलकवग्गो

१. अचेलकसिक्खापदवण्णना

२७३. अचेलकवग्गस्स पठमसिक्खापदे **तेस**न्ति तित्थियानं। **तत्था**ति भाजने। **इतो**ति पत्ततो। **सचे तित्थियो वदती**ति ''पठममेव मं सन्धाय अभिहरित्वा ठपितं मय्हं सन्तकं होति, इमस्मिं भाजने आकिरथा''ति वदति, वट्टति। सेसमेत्थ उत्तानमेव। अञ्ञतित्थियता, अज्झोहरणीयता, अज्झोहरणत्थाय सहत्था अनिक्खित्तभाजने दानन्ति इमानि पनेत्थ तीणि अङ्गानि।

अचेलकसिक्खापदवण्णना निट्ठिता।

२. उय्योजनसिक्खापदवण्णना

२७४. दुतियं उत्तानत्थमेव। अनाचारं आचरितुकामता, तदत्थमेव उपसम्पन्नस्स उय्योजना, एवं उय्योजेन्तस्स उपचारातिक्कमोति इमानि पनेत्थ तीणि अङ्गानि।

उय्योजनसिक्खापदवण्णना निट्ठिता।

३. सभोजनसिक्खापदवण्णना

२८०. ततिये **पिट्ठसङ्घाटो**ति द्वारबाहायेतं अधिवचनं। खुद्दकं नाम सयनिघरं वित्थारतो पञ्चहत्थप्पमाणं होति, तस्स च मज्झिमट्ठानं पिट्ठसङ्घाटतो अड्ढतेय्यहत्थप्पमाणमेव होति, तस्मा तादिसे सयनिघरे पिट्ठसङ्घाटतो हत्थपासं विजहित्वा निसिन्नो पिट्ठिवंसं अतिक्कमित्वा निसिन्नो नाम होति। एवं निसिन्नो च मज्झं अतिक्कमित्वा निसिन्नो नाम होतीति आह ''**इमिना मज्झातिक्कमं दस्सेती**''ति। **यथा वा तथा वा कतस्सा**ति पिट्ठिवंसं आरोपेत्वा वा अनारोपेत्वा वा कतस्स। **सचित्तक**न्ति अनुपविसित्वा निसीदनचित्तेन सचित्तकं। सेसमेत्थ उत्तानमेव। परियुट्ठितरागजायम्पतिकानं सन्निहितता, सयनिघरता, दुतियस्स भिक्खुनो अभावो, अनुपखज्ज निसीदनन्ति इमानि पनेत्थ चत्तारि अङ्गानि।

सभोजनसिक्खापदवण्णना निट्ठिता।

२८४-२८९. चतुत्थपञ्चमेसु नत्थि किञ्चि वत्तब्बं।

६. चारित्तसिक्खापदवण्णना

२९८. छट्ठे **पकतिवचनेना**ति एत्थ यं द्वादसहत्थब्भन्तरे ठितेन सोतुं सक्का भवेय्य, तं पकतिवचनं नाम। **आपुच्छितब्बो**ति ''अहं इत्थन्नामस्स घरं गच्छामी''ति वा ''चारित्तं आपज्जामी''ति वा ईदिसेन वचनेन आपुच्छितब्बो। सेसमेत्थ उत्तानमेव। पञ्चन्नं भोजनानं अञ्ञतरेन निमन्तनसादियनं, सन्तं भिक्खुं अनापुच्छना, भत्तियघरतो अञ्ञघरप्पवेसनं, मज्झन्हिकानतिक्कमो, समयस्स वा आपदानं वा अभावोति इमानि पनेत्थ पञ्च अङ्गानि।

चारित्तसिक्खापदवण्णना निट्ठिता।

७. महानामसिक्खापदवण्णना

३०३. सत्तमे **महानामो नामा**ति अनुरुद्धत्थेरस्स भाता भगवतो चूळपितु पुत्तो। सुद्धोदनो सक्कोदनो सुक्कोदनो धोतोदनो अमितोदनोति इमे हि पञ्च जना भातरो। अमिता नाम देवी तेसं भगिनी, तिस्सत्थेरो तस्सा पुत्तो। तथागतो च नन्दत्थेरो च सुद्धोदनस्स पुत्ता, महानामो च अनुरुद्धत्थेरो च सुक्कोदनस्स, आनन्दत्थेरो अमितोदनस्स। सो भगवतो कनिट्ठो, महानामो महल्लकतरो सकदागामी अरियसावको। तेन वुत्तं **''महानामो नाम…पे०… अरियसावको''**ति।

३०५-३०६. पाळियं **अज्जण्हो**ति अज्ज एकदिवसन्ति अत्थो, ''अज्जनो''ति वा अत्थो गहेतब्बो, **नो** अम्हाकं। **कालं आहरिस्सथा**ति स्वे हरिस्सथ। **ततो चे उत्तरि सादियेय्या**ति सचे तत्थ रत्तीहि वा भेसज्जेहि वा परिच्छेदो कतो होति ''एत्तकायेव वा रत्तियो एत्तकानि वा भेसज्जानि विञ्ञापेतब्बानी''ति, ततो रत्तिपरियन्ततो वा भेसज्जपरियन्ततो वा उत्तरि विञ्ञापेन्तो सादियेय्य। ''इमेहि तया भेसज्जेहि पवारितम्ह, अम्हाकञ्च इमिनाव भेसज्जेन अत्थो''ति आचिक्खित्वा विञ्ञापेतुम्पि गिलानोव लभति।

३१०. यस्मा सङ्घपवारणायमेवायं विधि, तस्मा **''ये अत्तनो पुग्गलिकाय पवारणाय पवारिता''**ति वुत्तं। सेसं उत्तानमेव। सङ्घपवारणता, भेसज्जविञ्ञत्ति, अगिलानता, परियन्तातिक्कमोति इमानि पनेत्थ चत्तारि अङ्गानि।

महानामसिक्खापदवण्णना निट्ठिता।

८. उय्युत्तसेनासिक्खापदवण्णना

३११. अट्ठमं उत्तानत्थमेव। उय्युत्तसेना, दस्सनत्थाय गमनं, अनुञ्ञातोकासतो अञ्ञत्र दस्सनं, तथारूपपच्चयस्स आपदाय वा अभावोति इमानि पनेत्थ चत्तारि अङ्गानि।

उय्युत्तसेनासिक्खापदवण्णना निट्ठिता।

९. सेनावाससिक्खापदवण्णना

३१७. नवमसिक्खापदम्पि उत्तानमेव। तिरत्तातिक्कमो, सेनाय सूरियस्स अत्थङ्गमो, गिलानतादीनं अभावोति इमानि पनेत्थ तीणि अङ्गानि।

सेनावाससिक्खापदवण्णना निट्ठिता।

१०. उय्योधिकसिक्खापदवण्णना

३२२. दसमे **कति ते लक्खानि लद्धानी**ति तव सरप्पहारस्स लक्खणभूता कित्तका जना तया लद्धाति अत्थो, कित्तका तया विद्धाति वुत्तं होति। सेसमेत्थ उत्तानमेव। उय्योधिकादिदस्सनत्थाय गमनं, अनुञ्ञातोकासतो अञ्ञत्र दस्सनं, तथारूपपच्चयस्स आपदाय वा अभावोति इमानि पनेत्थ तीणि अङ्गानि।

उय्योधिकसिक्खापदवण्णना निट्ठिता।

निट्ठितो अचेलकवग्गो पञ्चमो।

६. सुरापानवग्गो

१. सुरापानसिक्खापदवण्णना

३२६-३२८. सुरापानवग्गस्स पठमसिक्खापदे **वतिया**ति गामपरिक्खेपवतिया। पाळियं पिट्ठसुरादीसु पिट्ठं भाजने पक्खिपित्वा तज्जं उदकं दत्वा मद्दित्वा कता **पिट्ठसुरा**। एवं पूवे ओदने च भाजने पक्खिपित्वा तज्जं उदकं दत्वा मद्दित्वा कता **पूवसुरा ओदनसुरा**ति च वुच्चति। ''किण्णा''ति पन तस्सा सुराय बीजं वुच्चति। ये सुरामोदकातिपि वुच्चन्ति, ते पक्खिपित्वा कता **किण्णपक्खित्ता**। हरीतकीसासपादिनानासम्भारेहि संयोजिता **सम्भारसंयुत्ता**।

मधुकतालनाळिकेरादिपुप्फरसो चिरपरिवासितो **पुप्फासवो**। पनसादिफलरसो **फलासवो**। मुद्दिकारसो **मध्वासवो**। उच्छुरसो **गुळासवो**। हरीतकामलककटुकभण्डादिनानासम्भारानं रसो चिरपरिवासितो **सम्भारसंयुत्तो। बीजतो पट्ठाया**ति सम्भारे पटियादेत्वा चाटियं पक्खित्तकालतो, तालनाळिकेरादीनं पुप्फरसस्स गहितअभिनवकालतोयेव च पट्ठाय।

३२९. लोणसोवीरकं सुत्तञ्च अनेकेहि भेसज्जेहि अभिसङ्खतो अमज्जभूतो आसवविसेसो। **वासग्गाहापनत्थ**न्ति सुगन्धिभावग्गाहापनत्थं। **अचित्तकं लोकवज्ज**न्ति एत्थ यं वत्तब्बं, तं पठमपाराजिकवण्णनायं वुत्तनयेन वेदितब्बं। सेसमेत्थ उत्तानमेव। मज्जभावो, तस्स पानञ्चाति इमानि पनेत्थ द्वे अङ्गानि।

सुरापानसिक्खापदवण्णना निट्ठिता।

२. अङ्गुलिपतोदकसिक्खापदवण्णना

३३०. दुतिये **भिक्खुनीपि अनुपसम्पन्नट्ठाने ठिता**ति एत्थ भिक्खुपि भिक्खुनिया अनुपसम्पन्नट्ठाने ठितोति वेदितब्बो। सेसमेत्थ उत्तानमेव। हसाधिप्पायता, उपसम्पन्नस्स कायेन कायामसनन्ति इमानि पनेत्थ द्वे अङ्गानि।

अङ्गुलिपतोदकसिक्खापदवण्णना निट्ठिता।

३. हसधम्मसिक्खापदवण्णना

३३५. ततियं उत्तानत्थमेव। उपरिगोप्फकता, हसाधिप्पायेन कीळनन्ति इमानि पनेत्थ द्वे अङ्गानि।

हसधम्मसिक्खापदवण्णना निट्ठिता।

४. अनादरियसिक्खापदवण्णना

३४४. चतुत्थे **गारय्हो आचरियुग्गहो न गहेतब्बो**ति यस्मा उच्छुरसो सत्ताहकालिको, तस्स कसटो यावजीविको, द्विन्नंयेव समवायो उच्छुयट्ठि, तस्मा विकाले उच्छुयट्ठिं खादितुं वट्टति गुळहरीतकं वियाति एवमादिको गारय्हाचरियवादो न गहेतब्बो। **लोकवज्जे आचरियुग्गहो न वट्टती**ति लोकवज्जसिक्खापदे आपत्तिट्ठाने यो आचरियवादो, सो न गहेतब्बो, लोकवज्जं अतिक्कमित्वा ''इदं अम्हाकं आचरियुग्गहो''ति वदन्तस्स उग्गहो न वट्टतीति अधिप्पायो। **सुत्तानुलोमं** नाम अट्ठकथा। **पवेणिया आगतसमोधानं गच्छती**ति ''पवेणिया आगतो आचरियुग्गहोव गहेतब्बो''ति एवं वुत्ते महाअट्ठकथावादेयेव सङ्गहं गच्छतीति अधिप्पायो। सेसमेत्थ उत्तानमेव। उपसम्पन्नस्स पञ्ञत्तेन वचनं, अनादरियकरणन्ति इमानि पनेत्थ द्वे अङ्गानि।

अनादरियसिक्खापदवण्णना निट्ठिता।

५. भिंसापनसिक्खापदवण्णना

३४५. पञ्चमं उत्तानत्थमेव। उपसम्पन्नता, तस्स दस्सनसवनविसये भिंसापेतुकामताय वायमनन्ति इमानि पनेत्थ द्वे अङ्गानि।

भिंसापनसिक्खापदवण्णना निट्ठिता।

६. जोतिसिक्खापदवण्णना

३५०. छट्ठे भग्गा नाम जनपदिनो राजकुमारा, तेसं निवासो एकोपि जनपदो रुळ्हीसद्देन ''भग्गा''ति वुच्चति। तेन वुत्तं **''भग्गाति जनपदस्स नाम''**न्ति। **सुसुमारगिरे**ति एवंनामके नगरे। तस्स किर नगरस्स मापनत्थं वत्थुविज्जाचरियेन नगरट्ठानस्स परिग्गण्हनदिवसे अविदूरे सुसुमारो सद्दमकासि गिरं निच्छारेसि। अथ अनन्तरायेन नगरे मापिते तमेव सुसुमारगिरणं सुभनिमित्तं कत्वा सुसुमारगिरंत्वेवस्स नामं अकंसु। केचि पन ''सुसुमारसण्ठानत्ता सुसुमारो नाम एको गिरि, सो तस्स नगरस्स समीपे, तस्मा तं सुसुमारगिरि एतस्स अत्थीति 'सुसुमारगिरी'ति वुच्चती''ति वदन्ति। तथा वा होतु अञ्ञथा वा, नाममेतं तस्स नगरस्साति आह **''सुसुमारगिरन्ति नगरस्स नाम''**न्ति। **भेसकळा**ति घम्पण्डनामको गच्छविसेसो। केचि ''सेतरुक्खो''तिपि वदन्ति। तेसं बहुलताय पन तं वनं भेसकळावनन्त्वेव पञ्ञायित्थ। ''भेसगळावने''तिपि पाठो। ''भेसो नाम एको यक्खो अयुत्तकारी, तस्स ततो गळितट्ठानताय तं वनं भेसगळावनं नाम जात''न्ति हि केचि।

३५२. **जोतिकरणे**ति अग्गिकरणे। सेसमेत्थ उत्तानमेव। अगिलानता, अनुञ्ञातकरणाभावो, विसिब्बेतुकामता, समादहनन्ति इमानि पनेत्थ चत्तारि अङ्गानि।

जोतिसिक्खापदवण्णना निट्ठिता।

७. नहानसिक्खापदवण्णना

३५७. सत्तमसिक्खापदस्स पाळियं **असम्भिन्नेना**ति अमक्खितेन, अनट्ठेनाति अत्थो। **ओरेनद्धमासं नहायेय्या**ति नहातदिवसतो पट्ठाय अद्धमासे अपरिपुण्णे नहायेय्य। सेसमेत्थ उत्तानमेव। मज्झिमदेसो, ऊनकद्धमासे नहानं, समयानं वा नदीपारगमनस्स वा आपदानं वा अभावोति इमानि पनेत्थ तीणि अङ्गानि।

नहानसिक्खापदवण्णना निट्ठिता।

८. दुब्बण्णकरणसिक्खापदवण्णना

३६८. अट्ठमे **''चम्मकारनीलं** नाम पकतिनील''न्ति तीसुपि **गण्ठिपदेसु** वुत्तं। **गण्ठिपदे** पन ''चम्मकारा उदके तिपुमलं अयगूथञ्च पक्खिपित्वा चम्मं काळं करोन्ति, तं चम्मकारनील''न्ति वुत्तं। सेसमेत्थ उत्तानमेव। वुत्तप्पकारस्स चीवरस्स अकतकप्पता, अनट्ठचीवरादिता, निवासनं वा पारुपनं वाति इमानि पनेत्थ तीणि अङ्गानि।

दुब्बण्णकरणसिक्खापदवण्णना निट्ठिता।

९. विकप्पनसिक्खापदवण्णना

३७४. नवमे **अपच्चुद्धारण**न्ति ''मय्हं सन्तकं परिभुञ्ज वा विस्सज्जेहि वा''तिआदिना अकतपच्चुद्धारं। **येन विनयकम्मं कत**न्ति येन सद्धिं विनयकम्मं कतं। **तिंसकवण्णनाय**न्ति निस्सग्गियवण्णनायं। परिभोगेन **कायकम्मं,** अपच्चुद्धारापनेन **वचीकम्मं**। सेसमेत्थ उत्तानमेव। सामं विकप्पितस्स अपच्चुद्धारो, विकप्पनुपगचीवरता, परिभोगोति इमानि पनेत्थ तीणि अङ्गानि।

विकप्पनसिक्खापदवण्णना निट्ठिता।

१०. चीवरअपनिधानसिक्खापदवण्णना

३७७. दसमं उत्तानत्थमेव। उपसम्पन्नस्स सन्तकानं पत्तादीनं अपनिधानं, विहेसेतुकामता वा हसाधिप्पायता वाति इमानि पनेत्थ द्वे अङ्गानि।

चीवरअपनिधानसिक्खापदवण्णना निट्ठिता।

निट्ठितो सुरापानवग्गो छट्ठो।

७. सप्पाणकवग्गो

१. सञ्चिच्चसिक्खापदवण्णना

३८२. सप्पाणकवग्गस्स पठमसिक्खापदे उसुं सरं अस्सति खिपतीति **इस्सासो,** धनुसिप्पकुसलोति आह ''**धनुग्गहाचरियो**''ति। पटिसत्तुविधमनत्थं धनुं गण्हन्तीति धनुग्गहा, तेसं आचरियो **धनुग्गहाचरियो**। **अप्पमत्तेन वत्तं कातब्ब**न्ति यथा ते पाणा न मरन्ति, एवं सूपट्ठितस्सतिना सेनासने वत्तं कातब्बं। सेसमेत्थ उत्तानमेव। अङ्गानिपि मनुस्सविग्गहे वुत्तनयेन वेदितब्बानीति।

सञ्चिच्चसिक्खापदवण्णना निट्ठिता।

२. सप्पाणकसिक्खापदवण्णना

३८७. दुतिये **उदकसण्ठानकप्पदेसे**ति यत्थ भूमिभागे उदकं निक्खित्तं सन्तिट्ठति, न सहसा परिक्खयं गच्छति, तादिसे पदेसे। सेसमेत्थ उत्तानमेव। अङ्गानि सिञ्चनसिक्खापदे वुत्तनयानेव।

सप्पाणकसिक्खापदवण्णना निट्ठिता।

३. उक्कोटनसिक्खापदवण्णना

३९२. ततिये **यथापतिट्ठितभावेन पतिट्ठातुं न देन्ती**ति तेसं पवत्तिआकारदस्सनत्थं वुत्तं। यं पन धम्मेन अधिकरणं निहतं, तं सुनिहतमेव। सचे विप्पकते कम्मे पटिक्कोसति, तं सञ्ञापेत्वाव कातब्बं। इतरथा कम्मञ्च कुप्पति, कारकानञ्च आपत्ति। सेसमेत्थ उत्तानमेव। यथाधम्मं निहतभावो, जानना, उक्कोटनाति इमानि पनेत्थ तीणि अङ्गानि।

उक्कोटनसिक्खापदवण्णना निट्ठिता।

४. दुट्ठुल्लसिक्खापदवण्णना

३९९. चतुत्थे **तस्सेवा**ति यो आपन्नो, तस्सेव। **आरोचेती**ति पटिच्छादनत्थमेव मा कस्सचि आरोचेसीति वदति। **वत्थुपुग्गलो**ति आपन्नपुग्गलो। **येनस्स आरोचित**न्ति येन दुतियेन अस्स ततियस्स आरोचितं। **कोटि छिन्ना होती**ति यस्मा पटिच्छादनपच्चया आपत्तिं आपज्जित्वाव दुतियेन ततियस्स आरोचितं, तस्मा तप्पच्चया पुन तेन आपज्जितब्बापत्तिया अभावतो आपत्तिया कोटि छिन्ना नाम होति।

४००. ''**अनुपसम्पन्नस्स सुक्कविस्सट्ठि च कायसंसग्गो चाति अयं दुट्ठुल्लअज्झाचारो नामा**''ति इदं दुट्ठुल्लारोचनसिक्खापदट्ठकथाय न समेति। वुत्तञ्हि तत्थ (पाचि॰ अट्ठ॰ ८२) ''अनुपसम्पन्नस्स दुट्ठुल्लं वा अदुट्ठुल्लं वा अज्झाचारन्ति एत्थ आदितो पञ्च सिक्खापदानि दुट्ठुल्लो नाम अज्झाचारो, सेसानि अदुट्ठुल्लो, सुक्कविस्सट्ठिकायसंसग्गदुट्ठुल्लअत्तकामा पनस्स अज्झाचारो नामा''ति। ''आरोचने अनुपसम्पन्नस्स दुट्ठुल्लं अञ्ञथा अधिप्पेतं, पटिच्छादने अञ्ञथा''ति एत्थापि विसेसकारणं न दिस्सति, तस्मा अट्ठकथाय पुब्बेनापरं न समेति। अविरोधं इच्छन्तेन पन वीमंसितब्बमेत्थ कारणं। सेसमेत्थ उत्तानमेव। उपसम्पन्नस्स दुट्ठुल्लापत्तिजाननं, पटिच्छादेतुकामताय नारोचेस्सामीति धुरनिक्खेपोति इमानि पनेत्थ द्वे अङ्गानि।

दुट्ठुल्लसिक्खापदवण्णना निट्ठिता।

५. ऊनवीसतिवस्ससिक्खापदवण्णना

४०२. पञ्चमे **रूपसुत्त**न्ति हेरञ्ञिकानं सुत्तं। **दुरुत्तान**न्ति अक्कोसवसेन दुरुत्तानं, दुरुत्तत्तायेव **दुरागतानं। वचनपथान**न्ति एत्थ वचनमेव तदत्थं ञातुकामानं ञापेतुकामानञ्च पथोति वचनपथो। **दुक्खमान**न्ति दुक्खेन खमितब्बानं।

४०४. गब्भे सयितकालेन सद्धिं वीसतिमं वस्सं अस्साति **गब्भवीसो। हायनवड्ढन**न्ति गब्भमासेसु अधिकेसु उत्तरिहायनं, ऊनेसु वड्ढनन्ति वेदितब्बं। **एकूनवीसतिवस्स**न्ति द्वादसमासे मातुकुच्छिस्मिं वसित्वा महापवारणाय जातकालतो पट्ठाय एकूनवीसतिवस्सं। **पाटिपददिवसे**ति पच्छिमिकाय वस्सूपगमनदिवसे। ''तिंसरत्तिदिवो मासो''ति (अ० नि० ३.७१; ८.४३; विभ० १०२३) वचनतो **''चत्तारो मासा परिहायन्ती''**ति वुत्तं। **वस्सं उक्कड्ढन्ती**ति वस्सं उद्धं कड्ढन्ति, ततिये संवच्छरे एकमासं अधिकमासवसेन परिच्चजन्ता वस्सं उद्धं कड्ढन्तीति अत्थो, तस्मा ततियो संवच्छरो तेरसमासिको होति, संवच्छरस्स पन द्वादसमासिकत्ता अट्ठारससु वस्सेसु अधिकमासे विसुं गहेत्वा **''छ मासा वड्ढन्ती''**ति वुत्तं। **ततो**ति छमासतो। **निक्कङ्खा हुत्वा**ति अधिकमासेहि सद्धिं परिपुण्णवीसतिवस्सत्ता निब्बेमतिका हुत्वा। यं पन वुत्तं तीसु **गण्ठिपदेसु** ''अट्ठारसन्नंयेव वस्सानं अधिकमासे गहेत्वा गणितत्ता सेसवस्सद्वयस्सपि अधिकानि दिवसानि होन्तेव, तानि अधिकदिवसानि सन्धाय 'निक्कङ्खा हुत्वा'ति वुत्त''न्ति, तं न गहेतब्बं। न हि द्वीसु वस्सेसु अधिकदिवसानि नाम विसुं उपलब्भन्ति ततिये वस्से वस्सुक्कड्ढनवसेन अधिकमासे परिच्चत्तेयेव अतिरेकमाससम्भवतो। तस्मा द्वीसु वस्सेसु अतिरेकदिवसानि नाम विसुं न सम्भवन्ति।

ननु च ''ते द्वे मासे गहेत्वा वीसतिवस्सानि परिपुण्णानि होन्ती''ति कस्मा वुत्तं, एकूनवीसतिवस्सम्हि पुन अपरस्मिं वस्से पक्खित्ते वीसतिवस्सानि परिपुण्णानि होन्तीति आह **''एत्थ पन...पे०... वुत्त''**न्ति। अनेकत्थत्ता निपातानं **पन**-सद्दो हि-सद्दत्थे, एत्थ हीति वुत्तं होति। इदञ्हि वुत्तस्सेवत्थस्स समत्थनवसेन वुत्तं। इमिना च इमं दीपेति ''यं वुत्तं 'एकूनवीसतिवस्सं सामणेरं निक्खमनीयपुण्णमासिं अतिक्कम्म पाटिपददिवसे उपसम्पादेन्ती'ति, तत्थ गब्भमासेपि अग्गहेत्वा द्वीहि मासेहि अपरिपुण्णवीसतिवस्सं सन्धाय 'एकूनवीसतिवस्स'न्ति वुत्तं, तस्मा अधिकमासेसु द्वीसु गहितेसु वीसतिवस्सानि परिपुण्णानि नाम होन्ती''ति। **तस्मा**ति यस्मा गब्भमासापि गणनूपगा होन्ति, तस्मा। **एकवीसतिवस्सो होती**ति जातदिवसतो पट्ठाय वीसतिवस्सो समानो गब्भमासेहि सद्धिं एकवीसतिवस्सो होति।

४०६. **अञ्ञं उपसम्पादेती**ति उपज्झायो कम्मवाचाचरियो वा हुत्वा उपसम्पादेति। सेसमेत्थ उत्तानमेव। ऊनवीसतिवस्सता, ऊनकसञ्ञिता, उपसम्पादनन्ति इमानि पनेत्थ तीणि अङ्गानि।

ऊनवीसतिवस्ससिक्खापदवण्णना निट्ठिता।

६. थेय्यसत्थसिक्खापदवण्णना

४०७. छट्ठसिक्खापदं उत्तानत्थमेव। थेय्यसत्थकभावो, जाननं, संविधानं, अविसङ्केतेन गमनन्ति इमानि पनेत्थ चत्तारि अङ्गानि।

थेय्यसत्थसिक्खापदवण्णना निट्ठिता।

४१२. सत्तमे नत्थि किञ्चि वत्तब्बं।

८. अरिट्ठसिक्खापदवण्णना

४१७. अट्ठमे **बाधयिंसू**ति हनिंसु। तंतंसम्पत्तिया विबन्धनवसेन सत्तसन्तानस्स अन्तरे वेमज्झे एति आगच्छतीति अन्तरायो, दिट्ठधम्मिकादिअनत्थो। अनतिक्कमनट्ठेन तस्मिं अन्तराये नियुत्ता, अन्तरायं वा फलं अरहन्ति, अन्तरायस्स वा करणसीलाति **अन्तरायिका**। तेनाह **''अन्तरायं करोन्तीति अन्तरायिका''**ति। **आनन्तरियधम्मा**ति आनन्तरिकसभावा चेतनाधम्मा। तत्रायं वचनत्थो – चुतिअनन्तरफलं अनन्तरं नाम, तस्मिं अनन्तरे नियुत्ता, तंनिब्बत्तनेन अनन्तरकरणसीला, अनन्तरप्पयोजनाति वा आनन्तरिका, ते एव **आनन्तरिया**ति वुत्ता। कम्मानि एव अन्तरायिकाति **कम्मन्तरायिका। मोक्खस्सेव अन्तरायं करोति, न सग्गस्सा**ति मिच्छाचारलक्खणाभावतो वुत्तं। न हि भिक्खुनिया धम्मरक्खितभावो अत्थि। पाकतिकभिक्खुनीवसेन चेतं वुत्तं। अरियाय पन पवत्तं अपायसंवत्तनिकमेव, नन्दमाणवको चेत्थ निदस्सनं। उभिन्नं समानच्छन्दतावसेन वा न सग्गन्तरायिकता, मोक्खन्तरायिकता पन मोक्खत्थाय पटिपत्तिया विदूसनतो। अभिभवित्वा पन पवत्तियं सग्गन्तरायिकतापि न सक्का निवारेतुन्ति।

अहेतुकदिट्ठिअकिरियदिट्ठिनत्थिकदिट्ठियोव नियतभावं पत्ता **नियतमिच्छादिट्ठिधम्मा। पटिसन्धिधम्मा**ति पटिसन्धिचित्तुप्पादमाह। पण्डकादिग्गहणञ्चेत्थ निदस्सनमत्तं सब्बायपि अहेतुकपटिसन्धिया विपाकन्तरायिकभावतो। याहि अरिये उपवदति, ता चेतना **अरियूपवादा** जाता। **ततो पर**न्ति खमापनतो उपरि। यं पनेत्थ वत्तब्बं, तं दिब्बचक्खुकथायं वुत्तमेव। **सञ्चिच्च आपन्ना आपत्तियो**ति सञ्चिच्च वीतिक्कन्ता सत्त आपत्तिक्खन्धा। सञ्चिच्च वीतिक्कन्तञ्हि अन्तमसो दुक्कटदुब्भासितम्पि सग्गमग्गफलानं अन्तरायं करोति। **याव भिक्खुभावं पटिजानाति** पाराजिकं आपन्नो, **न वुट्ठाति** सेसगरुकापत्तिं आपन्नो, **न देसेति** लहुकापत्तिं आपन्नो।

अयं भिक्खूति अरिट्ठो भिक्खु। **रसेन रसं संसन्दित्वा**ति अनवज्जेन पच्चयपरिभुञ्जनरसेन सावज्जकामगुणपरिभोगरसं समानेत्वा। योनिसो पच्चवेक्खणेन नत्थि एत्थ छन्दरागोति **निच्छन्दरागो,** पच्चयपरिभोगो। **उपनेन्तो विया**ति बन्धनं उपनेन्तो विय। ''घटेन्तो विया''तिपि पाठो। **उपसंहरन्तो विया**ति सदिसतं उपसंहरन्तो विय एकन्तसावज्जे अनवज्जभावपक्खेपनतो। **पापक**न्ति लामकट्ठेन दुग्गतिसम्पापनट्ठेन च पापकं। **महासमुद्दं बन्धन्तेन विया**ति सेतुकरणवसेन महासागरं बन्धन्तेन विय। **सब्बञ्ञुतञ्ञाणेन सद्धिं पटिविरुज्झन्तो**ति सब्बञ्ञुतञ्ञाणेन ''सावज्ज''न्ति दिट्ठं ''अनवज्ज''न्ति गहणेन तेन सह पटिविरुज्झन्तो। **आणाचक्के**ति पठमपाराजिकसिक्खापदसङ्खाते, ''अब्रह्मचरियं पहाया''तिआदिदेसनासङ्खाते च आणाचक्के।

अट्ठिकङ्कलं नाम उरट्ठि वा पिट्ठिकण्टकं वा सीसट्ठि वा। तञ्हि निम्मंसत्ता ''कङ्कल''न्ति वुच्चति। विगतमंसाय हि अट्ठिसङ्खलिकाय एकट्ठिम्हि वा **कङ्कल**-सद्दो निरुळ्हो। **अनुदहनट्ठेना**ति अनुपायपटिपत्तिया सम्पति आयतिञ्च अनुदहनट्ठेन। **महाभितापनट्ठेन** अनवट्ठितसभावताय, **इत्तरपच्चुपट्ठानट्ठेन** मुहुत्तकरणीयताय, **तावकालिकट्ठेन** परेहि अभिभवनताय, **सब्बङ्गपच्चङ्गपलिभञ्जनट्ठेन** भेदनादिअधिकरणभावेन, उग्घाटसदिसताय **अधिकुट्टनट्ठेन,** अवणे वणं उप्पादेत्वा अन्तो अनुपविसनभावताय **विनिविज्झनट्ठेन,** दिट्ठधम्मिकसम्परायिकअनत्थनिमित्तताय **सासङ्कसप्पटिभयट्ठेन**।

पाळियं ''थामसा परामासा''तिआदीसु एवमत्थो वेदितब्बो। **थामसा**ति दिट्ठिथामेन, तस्सा दिट्ठिया थामगतभावेनाति

अत्थो। **परामासा**ति दिट्ठिपरामासेन, दिट्ठिसङ्खातपरामासेनाति अत्थो। दिट्ठियेव हि धम्मसभावं अतिक्कमित्वा परतो आमसनेन परामासो। **अभिनिविस्सा**ति तण्हाभिनिवेसपुब्बङ्गमेन दिट्ठाभिनिवेसेन ''इदमेत्थ सच्च''न्ति अभिनिविसित्वा। **वोहरती**ति कथेति। **यतो च खो ते भिक्खू**ति यदा ते भिक्खू। **एवंब्याखो अहं, भन्ते, भगवता**ति इदं एस अत्तनो लद्धिं निगूहितुकामताय नत्थीति वत्तुकामोपि भगवतो आनुभावेन सम्पटिच्छति। बुद्धानं किर सम्मुखा द्वे कथा कथेतुं समत्थो नाम नत्थि। **कस्स नु खो नाम त्वं मोघपुरिसा**ति त्वं मोघपुरिस कस्स खत्तियस्स वा ब्राह्मणस्स वा वेस्सस्स वा सुद्दस्स वा गहट्ठस्स वा पब्बजितस्स वा देवस्स वा मनुस्सस्स वा मया एवं धम्मं देसितं आजानासि। सेसमेत्थ उत्तानमेव। धम्मकम्मता, समनुभासना, अप्पटिनिस्सज्जनन्ति इमानि पनेत्थ तीणि अङ्गानि।

अरिट्ठसिक्खापदवण्णना निट्ठिता।

९. उक्खित्तसम्भोगसिक्खापदवण्णना

४२४. नवमे **पयोगगणनाया**ति दानग्गहणप्पयोगगणनाय। संवासे कम्मपरियोसानवसेन, सहसेय्याय एकस्मिं निपन्ने इतरस्स निपज्जनपयोगवसेन आपत्तिपरिच्छेदो वेदितब्बो। एत्थ च पदभाजने ''एकच्छन्ने''ति अविसेसेन वुत्तत्ता नानूपचारेपि एकच्छन्ने निपज्जन्तस्स आपत्ति। तेनेव **मातिकाट्ठकथायं** (कङ्खा॰ अट्ठ॰ उक्खित्तसम्भोगसिक्खापदवण्णना) वुत्तं ''सह वा सेय्यं कप्पेय्याति नानूपचारेपि एकच्छन्ने निपज्जेय्या''ति। पण्णत्तिं अजानन्तेन अरहतापि किरियाब्याकतचित्तेन आपज्जितब्बत्ता **''तिचित्त''**न्ति वुत्तं। यं पन **केनचि** वुत्तं ''तिचित्तन्ति एत्थ विपाकाब्याकतचित्तेन सह वा सेय्यं कप्पेय्याति एवमत्थो दट्ठब्बो, अञ्ञथा सचित्तकत्ता सिक्खापदस्स किरियाब्याकतं सन्धाय न युज्जती''ति, तं न गहेतब्बं। न हि सचित्तकसिक्खापदवीतिक्कमो अरहतो न सम्भवति। तेनेव पथवीखणनादीसु सचित्तकसिक्खापदेसु तिचित्तमेव वुत्तं। सेसमेत्थ उत्तानमेव। अकतानुधम्मता, जानना, सम्भोगादिकरणन्ति इमानि पनेत्थ तीणि अङ्गानि।

उक्खित्तसम्भोगसिक्खापदवण्णना निट्ठिता।

१०. कण्टकसिक्खापदवण्णना

४२८. दसमे **पिरे**ति निपातपदं। सम्बोधने वत्तमानं पर-सद्देन समानत्थं वदन्तीति आह **''पर अमामका''**ति, अम्हाकं अनज्झत्तिकभूताति अत्थो। **पिरे**ति वा ''परतो''ति इमिना समानत्थं निपातपदं, तस्मा **चर पिरे**ति परतो गच्छ, मा इध तिट्ठाति एवम्पेत्थ अत्थो वेदितब्बो। सेसमेत्थ पुरिमसिक्खापदद्वये वुत्तनयमेव।

कण्टकसिक्खापदवण्णना निट्ठिता।

निट्ठितो सप्पाणकवग्गो सत्तमो।

८. सहधम्मिकवग्गो

१. सहधम्मिकसिक्खापदवण्णना

४३४. सहधम्मिकवग्गस्स पठमसिक्खापदे **वाचाय वाचाय आपत्ती**ति अनादरियभया लेसेन एवं वदन्तस्स आपत्ति। सेसमेत्थ उत्तानमेव। उपसम्पन्नस्स पञ्ञत्तेन वचनं, असिक्खितुकामताय एवं वचनन्ति इमानि पनेत्थ द्वे

अङ्गानि।

सहधम्मिकसिक्खापदवण्णना निट्ठिता।

२. विलेखनसिक्खापदवण्णना

४३८. दुतिये विनयस्स परियापुणनं **विनयपरियत्ती**ति आह **"विनयं परियापुणन्तान"**न्तिआदि। **सुगुत्तो**ति यथा करण्डके पक्खित्तमणिक्खन्धो विय न नस्सति विपत्तिं न पापुणाति, एवं सुट्ठु गोपितो। **सुरक्खितो**ति तस्सेव परियायवचनं। यथा हि किलेसचोरेहि अविलुम्पनीयो होति, एवं सब्बदा सूपट्ठितस्सतिताय सुट्ठु रक्खितो। **कुक्कुच्चपकतान**न्ति कप्पियाकप्पियं निस्साय उप्पन्नकुक्कुच्चेन अभिभूतानं। सारज्जनं सारदो, ब्यामोहभयं। विगतो सारदो एतस्साति **विसारदो। सहधम्मेना**ति सकारणेन वचनेन। **सुनिग्गहितं निग्गण्हाती**ति यथा न पुन सीसं उक्खिपन्ति, अथ खो अप्पटिभाना मङ्कुभूतायेव होन्ति, एवं सुट्ठु निग्गण्हाति।

अलज्जिताति य-कारलोपेन निद्देसो, अलज्जितायाति वुत्तं होति। **अञ्ञाणता**तिआदीसुपि एसेव नयो। **मन्दो मोमूहो**ति अञ्ञाणभावेन **मन्दो,** अविसयतो **मोमूहो,** महामूळ्होति अत्थो।

अत्तपच्चत्थिकाति अत्तनो पच्चत्थिका। **वज्जिपुत्तका** दसवत्थुदीपका। **परूपहारअञ्ञाणकङ्खापरवितारणादिवादा**ति एत्थ ये अरहत्तं पटिजानन्तानं अप्पत्ते पत्तसञ्ञीनं अधिमानिकानं कुहकानं वा अरहत्तं पटिजानन्तानं सुक्कविस्सट्ठिं दिस्वा मारकायिका देवता "अरहतो असुचिं उपसंहरन्ती"ति मञ्ञन्ति सेय्यथापि पुब्बसेलिया अपरसेलिया च, ते **परूपहारवादा**। येसं पन अरहतो इत्थिपुरिसादीनं नामगोत्तादीसु ञाणप्पवत्तिया अभावेन अत्थि अरहतो **अञ्ञाणं,** तत्थेव सन्निट्ठानाभावेन अत्थि अरहतो **कङ्खा,** यस्मा चस्स तानि वत्थूनि परे वितारेन्ति पकासेन्ति आचिक्खन्ति, तस्मा अत्थि अरहतो **परवितारणा**ति इमा तिस्सो लद्धियो सेय्यथापि एतरहि पुब्बसेलियानं, ते अञ्ञाणकङ्खापरवितारणवादा। निग्गहो पन नेसं कथावत्थुप्पकरणे वुत्तनयेनेव वेदितब्बो।

चत्तारो मग्गा च फलानि चाति उक्कट्ठनिद्देसवसेन वुत्तं, चतस्सो पटिसम्भिदा तिस्सो विज्जा छ अभिञ्ञाति अयम्पि अधिगमसद्धम्मोयेव। **च**-कारो वा अवुत्तसम्पिण्डनत्थो दट्ठब्बो। **केचि थेरा**ति धम्मकथिका। **आहंसू**ति पंसुकूलिकत्थेरा एवं आहंसु।

कदा पनायं कथा उदपादीति? अयञ्हेत्थ अनुपुब्बिकथा (अ० नि० अट्ठ० १.१.१३०) – इमस्मिं किर दीपे चण्डालतिस्समहाभये सक्को देवराजा महाउळुम्पं मापेत्वा भिक्खूनं आरोचापेसि "महन्तं भयं भविस्सति, न सम्मा देवो वस्सिस्सति, भिक्खू पच्चयेहि किलमन्ता परियत्तिं सन्धारेतुं न सक्खिस्सन्ति, परतीरं गन्त्वा अय्येहि जीवितं रक्खितुं वट्टति। इमं महाउळुम्पं आरुय्ह गच्छथ भन्ते, येसं एत्थ निसज्जट्ठानं नप्पहोति, ते कट्ठखण्डेपि उरं ठपेत्वा गच्छन्तु, सब्बेसं भयं न भविस्सती"ति। तदा समुद्दतीरं पत्वा सट्ठि भिक्खू कतिकं कत्वा "अम्हाकं एत्थ गमनकिच्चं नत्थि, मयं इधेव हुत्वा तेपिटकं रक्खिस्सामा"ति ततो निवत्तित्वा दक्खिणमलयजनपदं गन्त्वा कन्दमूलपण्णेहि जीविकं कप्पेन्ता वसिंसु, काये वहन्ते निसीदित्वा सज्झायं करोन्ति, अवहन्ते वालिकं उस्सारेत्वा परिवारेत्वा सीसानि एकट्ठाने कत्वा परियत्तिं सम्मसन्ति। इमिना नियामेन द्वादस संवच्छरानि साट्ठकथं तेपिटकं परिपुण्णं कत्वा धारयिंसु।

भये वूपसन्ते सत्तसता भिक्खू अत्तनो गतट्ठाने साट्ठकथे तेपिटके एकक्खरम्पि एकब्यञ्जनम्पि अविनासेत्वा इममेव

दीपमागम्म कल्लगामजनपदे मण्डलारामविहारं पविसिंसु। थेरानं आगतपवत्तिं सुत्वा इमस्मिं दीपे ओहीना सट्ठि भिक्खू ''थेरे पस्सिस्सामा''ति गन्त्वा थेरेहि सद्धिं तेपिटकं सोधेन्ता एकक्खरम्पि एकब्यञ्जनम्पि असमेन्तं नाम न पस्सिंसु। तस्मिं ठाने थेरानं अयं कथा उदपादि ''परियत्ति नु खो सासनस्स मूलं, उदाहु पटिपत्ती''ति। पंसुकूलिकत्थेरा ''पटिपत्ति मूल''न्ति आहंसु, धम्मकथिका ''परियत्ती''ति। अथ ने थेरा ''तुम्हाकं द्विन्नम्पि जनानं वचनमत्तेनेव न सक्का विञ्ञातुं, जिनभासितं सुत्तं आहरथा''ति आहंसु। सुत्तं आहरितुं न भारोति –

''इमे च, सुभद्द, भिक्खू सम्मा विहरेय्युं, असुञ्ञो लोको अरहन्तेहि अस्सा''ति (दी॰ नि॰ २.२१४)। ''पटिपत्तिमूलकं, महाराज, सत्थुसासनं, पटिपत्तिसारकं, महाराज, सत्थुसासनं, पटिपत्ति तिट्ठन्ती तिट्ठती''ति (मि॰ प॰ ४.१.७) –

सुत्तं आहरिंसु।

इमं सुत्तं सुत्वा धम्मकथिका अत्तनो वादट्ठपनत्थाय इमं सुत्तं आहरिंसु –

''याव तिट्ठन्ति सुत्तन्ता, विनयो याव दिप्पति।
ताव दक्खन्ति आलोकं, सूरिये अब्भुट्ठिते यथा॥

''सुत्तन्तेसु असन्तेसु, पमुट्ठे विनयम्हि च।
तमो भविस्सति लोके, सूरिये अत्थङ्गते यथा॥

''सुत्तन्ते रक्खिते सन्ते, पटिपत्ति होति रक्खिता।
पटिपत्तियं ठितो धीरो, योगक्खेमा न धंसती''ति॥

इमस्मिं सुत्ते आहटे पंसुकूलिकत्थेरा तुण्ही अहेसुं। धम्मकथिकत्थेरानंयेव वचनं पुरतो अहोसि। यथा हि गवसतस्स गवसहस्सस्स वा अन्तरे पवेणिपालिकाय धेनुया असति सो वंसो सा पवेणी न घटीयति, एवमेव आरद्धविपस्सकानं भिक्खूनं सतेपि सहस्सेपि विज्जमाने परियत्तिया असति अरियमग्गपटिवेधो नाम न होति। यथा च निधिकुम्भिया जाननत्थाय पासाणपिट्ठे अक्खरेसु उपनिबद्धेसु याव अक्खरानि धरन्ति, ताव निधिकुम्भी नट्ठा नाम न होति, एवमेव परियत्तिया धरमानाय सासनं अन्तरहितं नाम न होतीति। **तस्साधेय्यो**ति तस्सायत्तो।

४३९. सो पनाति सो पातिमोक्खो। सेसमेत्थ उत्तानमेव। गरहितुकामता, उपसम्पन्नस्स सन्तिके सिक्खापदविवण्णनञ्चाति इमानि पनेत्थ द्वे अङ्गानि।

विलेखनसिक्खापदवण्णना निट्ठिता।

३. मोहनसिक्खापदवण्णना

४४३. ततियं उत्तानमेव। मोहारोपनं, मोहेतुकामता, वुत्तनयेन सुतभावो, मोहनन्ति इमानि पनेत्थ चत्तारि अङ्गानि।

मोहनसिक्खापदवण्णना निट्ठिता।

४. पहारसिक्खापदवण्णना

४५२. चतुत्थे **रत्तचित्तो**ति कायसंसग्गरागेन रत्तचित्तो। सचे पन मेथुनरागेन रत्तो पहारं देति, दुक्कटमेव। सेसमेत्थ उत्तानमेव। कुपितता, न मोक्खाधिप्पायता, उपसम्पन्नस्स पहारदानन्ति इमानि पनेत्थ तीणि अङ्गानि।

पहारसिक्खापदवण्णना निट्ठिता।

५. तलसत्तिकसिक्खापदवण्णना

४५७. पञ्चमे **न पहरितुकामताय दिन्नत्ता दुक्कट**न्ति एत्थ पहरितुकामताय पहटे पुरिमसिक्खापदेन पाचित्तियं, उच्चारेतुकामताय केवलं उग्गिरणमत्ते कते इमिना पाचित्तियं। इमिना पन विरज्झित्वा पहारो दिन्नो, तस्मा दुक्कटं। किमिदं दुक्कटं पहारपच्चया, उदाहु उग्गिरणपच्चयाति? तत्थ केचि ताव वदन्ति ''पहारपच्चया एव दुक्कटं, उग्गिरणपच्चया पाचित्तियन्ति सदुक्कटं पाचित्तियं युज्जति। पुरिमञ्हि उग्गिरणं, पच्छा पहारो, न च पच्छा पहारं निस्साय पुरिमं उग्गिरणं अनापत्तिवत्थुकं भवितुमरहती''ति।

मयं पनेत्थ एवं तक्कयाम ''उग्गिरणस्स अत्तनो सभावेनेव असण्ठितत्ता तप्पच्चया पाचित्तियेन न भवितब्बं, असुद्धचित्तेन कतपयोगत्ता पन न सक्का एत्थ अनापत्तिया भवितुन्ति दुक्कटं वुत्तं। 'न पहरितुकामताय दिन्नत्ता'ति इमिना च पहारपच्चया पुरिमसिक्खापदेन पाचित्तियासम्भवे कारणं वुत्तं, न पन पहारपच्चया दुक्कटसम्भवे। न हि अपहरितुकामताय पहारे दिन्ने पुरिमसिक्खापदेन पहारपच्चया पाचित्तियेन दुक्कटेन वा भवितुं युत्त''न्ति। ''तिरच्छानादीनं असुचिकरणादिं दिस्वा कुज्झित्वापि उग्गिरन्तस्स मोक्खाधिप्पायो एवा''ति वदन्ति। सेसमेत्थ उत्तानमेव। कुपितता, न मोक्खाधिप्पायता, उपसम्पन्नस्स तलसत्तिउग्गिरणन्ति इमानि पनेत्थ तीणि अङ्गानि।

तलसत्तिकसिक्खापदवण्णना निट्ठिता।

६. अमूलकसिक्खापदवण्णना

४५९. छट्ठं उत्तानत्थमेव। उपसम्पन्नता, सङ्घादिसेसस्स अमूलकता, अनुद्धंसना, तङ्खणविजाननाति इमानि पनेत्थ चत्तारि अङ्गानि।

अमूलकसिक्खापदवण्णना निट्ठिता।

७. सञ्चिच्चसिक्खापदवण्णना

४६४. सत्तमम्पि उत्तानत्थमेव। उपसम्पन्नता, अफासुकामता, कुक्कुच्चुप्पादनन्ति इमानि पनेत्थ तीणि अङ्गानि।

सञ्चिच्चसिक्खापदवण्णना निट्ठिता।

८. उपस्सुतिसिक्खापदवण्णना

४७१. अट्ठमे **सुतिसमीप**न्ति सद्दसमीपं। सुय्यतीति हि सुति, सद्दस्सेतं अधिवचनं। तस्स समीपं **उपस्सुति,** सद्दसमीपन्ति वुत्तं होति। **गण्ठिपदेसु** च सुय्यतीति सुतीति सद्दोव वुत्तो। यत्थ पन ठितेन सक्का होति सद्दं सोतुं, तत्थ तिट्ठन्तो सद्दसमीपे ठितो नाम होतीति आह **''यत्थ ठत्वा''**तिआदि। केचि पन ''सुणाति एत्थाति सुति। यत्थ ठितो सुणाति, तस्स ठानस्सेतं नामं। तस्स समीपं उपस्सुती''ति वदन्ति, एवं पन गय्हमाने यस्मिं ठाने ठितो सुणाति, तस्स आसन्ने अञ्ञस्मिं पदेसे तिट्ठतीति आपज्जति। अट्ठकथायञ्च **उपस्सुति**-सद्दस्सेव अत्थं दस्सेतुं ''यत्थ ठत्वा सक्का होति, तेसं वचनं सोतु''न्ति वुत्तं, न **सुति**-सद्दस्स। तस्मा पुब्बनयोवेत्थ पसत्थतरो। अथ वा उपेच्च सुय्यति एत्थाति **उपस्सुति,** ठानं। यं ठानं उपगतेन सक्का होति कथेन्तानं सद्दं सोतुं, तत्थाति एवमत्थो गहेतब्बो। **मन्तेन्त**न्ति भुम्मत्थे उपयोगवचनन्ति आह **''मन्तयमाने''**ति।

४७३. **एकपरिच्छेदानी**ति ''सिया किरियं, सिया अकिरिय''न्ति इमिना नयेन एकपरिच्छेदानि। इमानि हि तीणि सिक्खापदानि कदाचि किरियतो समुट्ठहन्ति, कदाचि अकिरियतो, न एकक्खणेयेव किरियाकिरियतो समुट्ठहन्ति। सेसमेत्थ उत्तानमेव। उपसम्पन्नता, चोदनाधिप्पायो, सवनन्ति इमानि पनेत्थ तीणि अङ्गानि।

उपस्सुतिसिक्खापदवण्णना निट्ठिता।

९. कम्मपटिबाहनसिक्खापदवण्णना

४७४. नवमं उत्तानत्थमेव। धम्मकम्मता, धम्मकम्मन्ति सञ्ञा, छन्दं दत्वा खिय्यनन्ति इमानि पनेत्थ तीणि अङ्गानि।

कम्मपटिबाहनसिक्खापदवण्णना निट्ठिता।

१०. छन्दं अदत्वा गमनसिक्खापदवण्णना

४७९. दसमं उत्तानत्थमेव। विनिच्छयकथाय पवत्तमानता, धम्मकम्मता, धम्मकम्मसञ्ञिता, समानसीमायं ठितता, समानसंवासकता, कोपेतुकामताय हत्थपासविजहनन्ति इमानि पनेत्थ छ अङ्गानि।

छन्दं अदत्वा गमनसिक्खापदवण्णना निट्ठिता।

११. दुब्बलसिक्खापदवण्णना

४८४. एकादसमम्पि उत्तानत्थमेव। उपसम्पन्नता, धम्मेन लद्धसम्मुतिता, सङ्घेन सद्धिं विकप्पनुपगचीवरदानं, पच्छा खीयितुकामताय खिय्यनाति इमानि पनेत्थ चत्तारि अङ्गानि।

दुब्बलसिक्खापदवण्णना निट्ठिता।

४८९. द्वादसमे नत्थि किञ्चि वत्तब्बं।

निट्ठितो सहधम्मिकवग्गो अट्ठमो।

९. राजवग्गो

१. अन्तेपुरसिक्खापदवण्णना

४९७-४९९. राजवग्गस्स पठमसिक्खापदे अट्ठकथायं सब्बं उत्तानत्थमेव। पाळियं पन अयमनुत्तानपदत्थो। **कतं वा करिस्सन्ति वा**ति मेथुनवीतिक्कमनं कतं वा करिस्सन्ति वा। **इमेस**न्ति पदं विभत्तिविपरिणामं कत्वा उभयत्थ योजेतब्बं ''इमेहि कतं इमे करिस्सन्ती''ति। **रतन**न्ति मणिरतनादीसु यंकिञ्चि। **उभतो**ति द्वीहि पक्खेहि। ''उभतो सुजातो''ति एत्तके वुत्ते येहि केहिचि द्वीहि भागेहि सुजातता विञ्ञायेय्य, **सुजात**-सद्दो च ''सुजातो चारुदस्सनो''तिआदीसु आरोहसम्पत्तिपरियायोति जातिवसेनेव सुजाततं विभावेतुं **''मातितो च पितितो चा''**ति वुत्तं। अनोरसपुत्तवसेनपि लोके मातुपितुसमञ्ञा दिस्सति, इध पन सा ओरसपुत्तवसेनेव इच्छिताति दस्सेतुं **''संसुद्धगहणिको''**ति वुत्तं। गब्भं गण्हाति धारेतीति गहणी, गब्भासयसञ्ञितो मातुकुच्छिप्पदेसो। संसुद्धा गहणी अस्साति **संसुद्धगहणिको,** संसुद्धा तस्स मातुकुच्छीति वुत्तं होति। ''समवेपाकिनिया गहणिया''ति एत्थ पन यथाभुत्तस्स आहारस्स विपाचनवसेन गण्हनतो अछड्डनतो कम्मजतेजोधातु ''गहणी''ति वुच्चति।

याव सत्तमा पितामहयुगाति एत्थ पितु पिता पितामहो, पितामहस्स युगं पितामहयुगं। ''युग''न्ति आयुप्पमाणं वुच्चति। अभिलापमत्तमेव चेतं, अत्थतो पन पितामहोयेव पितामहयुगं। पिता च माता च पितरो, पितूनं पितरो पितामहा, तेसं युगो पितामहयुगो, तस्मा याव सत्तमा पितामहयुगा, पितामहद्वन्दाति एवमेत्थ अत्थो दट्ठब्बो। एवञ्हि पितामहग्गहणेनेव मातामहोपि गहितो होति। **युग**-सद्दो चेत्थ एकसेसेन दट्ठब्बो युगो च युगो च युगोति। एवञ्हि तत्थ तत्थ द्वन्दं गहितमेव होति, तस्मा ततो उद्धं सब्बेपि पुब्बपुरिसा पितामहयुगग्गहणेनेव गहिता। एवं याव सत्तमो पितामहयुगो, ताव संसुद्धगहणिको।

नयतीति **आयतनं**। फुसतीति **फस्सो**। वेदयतीति **वेदना**। इदम्पि द्वयं द्वारवसेन छब्बिधं, विपाकवसेन गहणे बात्तिंसविधं। तस्सति परितस्सतीति **तण्हा,** सा कामतण्हादिवसेन सङ्खेपतो तिविधा, वित्थारतो अट्ठसतविधा च। उपादियतीति **उपादानं,** तं कामुपादानादिवसएन चतुब्बिधं।

भवति भावयति चाति **भवो,** सो कम्मोपपत्तिभेदतो दुविधो। जननं **जाति**। जीरणं **जरा**। मरन्ति तेनाति **मरणं**। सोचनं **सोको**। परिदेवनं **परिदेवो**। दुक्खयतीति **दुक्खं**। उप्पादट्ठितिवसेन द्वेधा खनतीति वा **दुक्खं**। दुम्मनस्स भावो **दोमनस्सं**। भुसो आयासो **उपायासो। सम्भवन्ती**ति निब्बत्तन्ति। न केवलञ्च सोकादीहेव, अथ खो सब्बपदेहि ''सम्भवन्ती''ति पदस्स योजना कातब्बा। एवञ्हि अविज्जापच्चया सङ्खारा सम्भवन्तीति पच्चयपच्चयुप्पन्नववत्थानं दस्सितं होति। तेनेवाह **''अविज्जापच्चया सङ्खारा सम्भवन्तीति इमिना नयेन सब्बपदेसु अत्थो वेदितब्बो''**ति। **एवमेतस्स...पे०... समुदयो होती**ति एत्थ पन अयमत्थो। **एव**न्ति निद्दिट्ठनयनिदस्सनं। तेन अविज्जादीहेव कारणेहि, न इस्सरनिम्मानादीहीति दस्सेति। **एतस्सा**ति यथावुत्तस्स। **केवलस्सा**ति असम्मिस्सस्स, सकलस्स वा। **दुक्खक्खन्धस्सा**ति दुक्खसमूहस्स, न सत्तस्स नापि सुभसुखादीनं। **समुदयो होती**ति निब्बत्ति सम्भवति।

अच्चन्तमेव सङ्खारेहि विरज्जति एतेनाति **विरागो,** अरियमग्गोति आह **''विरागसङ्खातेन मग्गेना''**ति। असेसं निरोधा **असेसनिरोधा,** असेसेत्वा निस्सेसेत्वा निरोधा समुच्छिन्दना अनुसयप्पहानवसेन अग्गमग्गेन अविज्जाय अच्चन्तसमुग्घाततोति अत्थो। यदिपि हेट्ठिममग्गेहिपि पहीयमाना अविज्जा अच्चन्तसमुग्घातवसेनेव पहीयति, तथापि न अनवसेसतो पहीयति। अपायगमनीया हि अविज्जा पठममग्गेन पहीयति, तथा सकिदेव इमस्मिं लोके सब्बत्थ च अनरियभूमियं उपपत्तिया पच्चयभूता अविज्जा यथाक्कमं दुतियततियमग्गेहि पहीयति, न इतराति, अरहत्तमग्गेनेव पन सा अनवसेसं पहीयतीति। **अनुप्पादनिरोधो होती**ति सब्बेसं सङ्खारानं अनवसेसं अनुप्पादनिरोधो होति। हेट्ठिमेन हि मग्गत्तयेन केचि सङ्खारा निरुज्झन्ति, केचि न निरुज्झन्ति अविज्जाय सावसेसनिरोधा, अग्गमग्गेन पनस्सा अनवसेसनिरोधा न केचि सङ्खारा न निरुज्झन्तीति। **एवं निरुद्धान**न्ति एवं अनुप्पादनिरोधेन निरुद्धानं। **केवल**-सद्दो निरवसेसवाचको च होति ''केवला अङ्गमगधा''तिआदीसु। असम्मिस्सवाचको च ''केवला सालयो''तिआदीसु। तस्मा उभयथापि अत्थं वदति **''सकलस्स, सुद्धस्स वा''**ति। तत्थ **सकलस्सा**ति अनवसेसस्स सब्बभवादिगतस्स। **सत्तविरहितस्सा**ति परपरिकप्पितजीवरहितस्स।

अपिचेत्थ किञ्चापि ''अविज्जानिरोधा सङ्खारनिरोधो, सङ्खारनिरोधा विञ्ञाणनिरोधो''ति एत्तावतापि सकलस्स दुक्खक्खन्धस्स अनवसेसतो निरोधो वुत्तो होति, तथापि यथा अनुलोमे यस्स यस्स पच्चयधम्मस्स अत्थिताय यो यो पच्चयुप्पन्नधम्मो न निरुज्झति पवत्तति एवाति इमस्स अत्थस्स दस्सनत्थं ''अविज्जापच्चया सङ्खारा...पे०... समुदयो होती''ति वुत्तं। एवं तप्पटिपक्खतो तस्स तस्स पच्चयस्स अभावे सो सो पच्चयुप्पन्नधम्मो निरुज्झति न पवत्ततीति दस्सनत्थं इध ''अविज्जानिरोधा सङ्खारनिरोधो, सङ्खारनिरोधा विञ्ञाणनिरोधो, विञ्ञाणनिरोधा नामरूपनिरोधो...पे०... दुक्खक्खन्धस्स निरोधो होती''ति वुत्तं, न पन अनुलोमे विय कालत्तयपरियापन्नस्स दुक्खक्खन्धस्स निरोधदस्सनत्थं। अनागतस्सेव हि अरियमग्गभावनाय असति उप्पज्जनारहस्स दुक्खक्खन्धस्स अरियमग्गभावनाय निरोधो इच्छितोति अयम्पि विसेसो वेदितब्बो।

यदा हवेति एत्थ **हवे**ति ब्यत्तन्ति इमस्मिं अत्थे निपातो। केचि पन ''हवेति आहवे युद्धे''ति अत्थं वदन्ति, ''योधेथ मारं पञ्ञावुधेना''ति (ध० प० ४०) हि वचनतो किलेसमारेन युज्झनसमयेति तेसं अधिप्पायो।

आरम्मणूपनिज्झानलक्खणेनाति आरम्मणूपनिज्झानसभावेन। **लक्खणूपनिज्झानलक्खणेना**ति एत्थापि एसेव नयो। तत्थ आरम्मणूपनिज्झानं नाम अट्ठ समापत्तियो कसिणारम्मणस्स उपनिज्झायनतो। लक्खणूपनिज्झानं नाम विपस्सनामग्गफलानि। विपस्सना हि तीणि लक्खणानि उपनिज्झायतीति **लक्खणूपनिज्झानं,** मग्गो विपस्सनाय आगतकिच्चं साधेतीति **लक्खणूपनिज्झानं,** फलं तथलक्खणं निरोधसच्चं उपनिज्झायतीति **लक्खणूपनिज्झानं। नो कल्लो पञ्हो**ति अयुत्तो पञ्हो, दुप्पञ्हो एसोति अत्थो। **आदि**सद्देन –

> ''फुसतीति अहं न वदामि। फुसतीति चाहं वदेय्यं, तत्रस्स कल्लो पञ्हो 'को नु खो, भन्ते, फुसती'ति? एवञ्चाहं न वदामि, एवं मं अवदन्तं यो एवं पुच्छेय्य 'किंपच्चया नु खो, भन्ते, फस्सो'ति, एस कल्लो पञ्हो। तत्र कल्लं वेय्याकरणं 'सळायतनपच्चया फस्सो, फस्सपच्चया वेदना'ति। को नु खो, भन्ते, वेदयतीति? नो कल्लो पञ्होति भगवा अवोच, वेदयतीति अहं न वदामि, वेदयतीति चाहं वदेय्यं, तत्रस्स कल्लो पञ्हो 'को नु खो, भन्ते, वेदयती'ति? एवञ्चाहं न वदामि। एवं मं अवदन्तं यो एवं पुच्छेय्य 'किंपच्चया नु खो, भन्ते, वेदना'ति, एस कल्लो पञ्हो। तत्र कल्लं वेय्याकरणं 'फस्सपच्चया वेदना, वेदनापच्चया तण्हा'''ति (सं॰ नि॰ २.१२) –

एवमादिं पाळिसेसं सङ्गण्हाति।

आदिना च नयेनाति एत्थ **आदि**-सद्देन पन ''कतमा नु खो, भन्ते, जाति, कस्स च पनायं जातीति। 'नो कल्लो पञ्हो'ति भगवा अवोचा''ति एवमादिं सङ्गण्हाति। ननु चेत्थ ''कतमं नु खो, भन्ते, जरामरण''न्ति (सं॰ नि॰ २.३५) इदं सुपुच्छितन्ति? किञ्चापि सुपुच्छितं, यथा पन सतसहस्सग्घनके सुवण्णथालके वड्ढितस्स सुभोजनस्स मत्थके आमलकमत्ते गूथपिण्डे ठपिते सब्बं भोजनं दुब्भोजनं होति छड्डेतब्बं, एवमेव ''कस्स च पनिदं जरामरण''न्ति इमिना सत्तूपलद्धिवादपदेन गूथपिण्डेन तं भोजनं दुब्भोजनं विय अयम्पि सब्बो दुप्पञ्हो जातोति।

सोळस कङ्खाति ''अहोसिं नु खो अहं अतीतमद्धानं, न नु खो अहोसिं, किं नु खो अहोसिं, कथं नु खो अहोसिं, किं हुत्वा किं अहोसिं नु खो अहं अतीतमद्धानं, भविस्सामि नु खो अहं अनागतमद्धानं, न नु खो भविस्सामि, किं नु खो भविस्सामि, कथं नु खो भविस्सामि, किं हुत्वा किं भविस्सामि नु खो अहं अनागतमद्धानं, अहं नु खोस्मि, नो नु खोस्मि, किं नु खोस्मि, कथं नु खोस्मि, अयं नु खो सत्तो कुतो आगतो, सो कुहिं गामी भविस्सती''ति (सं॰ नि॰ २.२०; म॰ नि॰ १.१८) एवमागता अतीतानागतपच्चुप्पन्नविसया सोळसविधा कङ्खा।

तत्थ (म॰ नि॰ अट्ठ॰ १.१८; सं॰ नि॰ अट्ठ॰ २.२.२०) **अहोसिं नु खो, न नु खो**ति सस्सताकारञ्च अधिच्चसमुप्पत्तिआकारञ्च निस्साय अतीते अत्तनो विज्जमानतञ्च अविज्जमानतञ्च कङ्खति, किं कारणन्ति न वत्तब्बं। उम्मत्तको विय हि बालपुथुज्जनो यथा तथा वा पवत्तति। अपिच अयोनिसोमनसिकारोयेवेत्थ कारणं। एवं अयोनिसोमनसिकारस्स पन किं कारणन्ति? स्वेव पुथुज्जनभावो अरियानं अदस्सनादीनि वा। ननु च पुथुज्जनोपि योनिसो मनसि करोतीति। को वा एवमाह ''न मनसि करोती''ति। न पन तत्थ पुथुज्जनभावो कारणं, सद्धम्मसवनकल्याणमित्तादीनि तत्थ कारणानि। न हि मच्छमंसादीनि अत्तनो पकतिया सुगन्धानि, अभिसङ्खारपच्चया पन सुगन्धानिपि होन्ति।

किं नु खो अहोसिन्ति जातिलिङ्गुपपत्तियो निस्साय ''खत्तियो नु खो अहोसिं, ब्राह्मणवेस्ससुद्दगहट्ठपब्बजितदेवमनुस्सानं अञ्ञतरो''ति कङ्खति।

कथं नु खोति सण्ठानाकारं निस्साय ''दीघो नु खो अहोसिं, रस्सओदातकण्हप्पमाणिकअप्पमाणिकादीनं अञ्ञतरो''ति कङ्खति। केचि पन ''इस्सरनिम्मानादिं निस्साय 'केन नु खो कारणेन अहोसि'न्ति हेतुतो कङ्खती''ति वदन्ति।

किं हुत्वा किं अहोसिन्ति जातिआदीनि निस्साय ''खत्तियो हुत्वा नु खो ब्राह्मणो अहोसिं...पे०... देवो हुत्वा मनुस्सो''ति अत्तनो परम्परं कङ्खति। सब्बत्थेव पन अद्धानन्ति कालाधिवचनमेतं, तञ्च भुम्मत्थे उपयोगवचनं दट्ठब्बं।

भविस्सामि नु खो, न नु खोति सस्सताकारञ्च उच्छेदाकारञ्च निस्साय अनागते अत्तनो विज्जमानतञ्च अविज्जमानतञ्च कङ्खति। सेसमेत्थ वुत्तनयमेव।

अहं नु खोस्मीति अत्तनो अत्थिभावं कङ्खति। युत्तं पनेतन्ति? युत्तं अयुत्तन्ति का एत्थ चिन्ता। अपिचेत्थ इदं वत्थुम्पि उदाहरन्ति, चूळमाताय किर पुत्तो मुण्डो, महामाताय पुत्तो अमुण्डो। तं सुत्तं मुण्डेसुं। सो उट्ठाय ''अहं नु खो चूळमाताय पुत्तो''ति चिन्तेसि। एवं ''अहं नु खोस्मी''ति कङ्खा होति।

नो नु खोस्मीति अत्तनो नत्थिभावं कङ्खति। तत्रापि इदं वत्थु — एको किर मच्छे गण्हन्तो उदके चिरट्ठानेन सीतिभूतं अत्तनो ऊरुं ''मच्छो''ति चिन्तेत्वा पहरि। अपरो सुसानपस्से खेत्तं रक्खन्तो भीतो सङ्कुटितो सयि। सो पटिबुज्झित्वा अत्तनो जण्णुकानि ''द्वे यक्खा''ति चिन्तेत्वा पहरि, एवं ''नो नु खोस्मी''ति कङ्खति।

किं नु खोस्मीति खत्तियोव समानो अत्तनो खत्तियभावं कङ्खति कण्णो विय सूतपुत्तसञ्ञी। एस नयो सेसेसु। देवो पन समानो देवभावं अजानन्तो नाम नत्थि। सोपि पन ''अहं रूपी नु खो अरूपी नु खो''तिआदिना नयेन कङ्खति। खत्तियादयो कस्मा न जानन्तीति चे? अप्पच्चक्खा तेसं तत्थ तत्थ कुले उप्पत्ति। गहट्ठापि च पातलिकादयो पब्बजितसञ्ञिनो। पब्बजितापि ''कुप्पं नु खो मे कम्म''न्तिआदिना नयेन गहट्ठसञ्ञिनो। मनुस्सापि च एकच्चे राजानो विय अत्तनि देवसञ्ञिनो होन्ति।

कथं नु खोस्मीति वुत्तनयमेव। केवलञ्हेत्थ अब्भन्तरे जीवो नाम अत्थीति गहेत्वा तस्स सण्ठानाकारं निस्साय ''दीघो नु खोस्मि, रस्सचतुरस्सछळंसअट्ठंससोळसंसादीनं अञ्ञतरप्पकारो''ति कङ्खन्तो ''कथं नु खोस्मी''ति कङ्खतीति वेदितब्बो। सरीरसण्ठानं पन पच्चुप्पन्नं अजानन्तो नाम नत्थि।

कुतो आगतो, सो कुहिं गामी भविस्सतीति अत्तभावस्स आगतिगतिट्ठानं कङ्खति।

वपयन्तीति विअपयन्ति, इकारलोपेनायं निद्देसो। ब्यपयन्तीति वुत्तं होति। तेनाह **''वपयन्ति अपगच्छन्ती''**ति। अपगमनञ्च अनुप्पत्तिनिरोधवसेनाति आह **''निरुज्झन्ती''**ति।

३. कदा पनस्स बोधिपक्खियधम्मा चतुसच्चधम्मा वा पातुभवन्ति उप्पज्जन्ति पकासन्तीति? विपस्सनामग्गञाणेसु पवत्तमानेसु। तत्थ **विपस्सनाञाणे** ताव विपस्सनाञाणसम्पयुत्ता सतिआदयो विपस्सनाञाणञ्च यथारहं अत्तनो अत्तनो विसयेसु तदङ्गप्पहानवसेन सुभसञ्ञादिके पजहन्ता कायानुपस्सनादिवसेन विसुं विसुं उप्पज्जन्ति। **मग्गक्खणे** पन ते निब्बानमालम्बित्वा समुच्छेदवसेन पटिपक्खे पजहन्ता चतूसुपि अरियसच्चेसु असम्मोहपटिवेधसाधनवसेन सकिदेव उप्पज्जन्ति। एवं तावेत्थ बोधिपक्खियधम्मानं उप्पज्जनट्ठेन पातुभावो वेदितब्बो। अरियसच्चधम्मानं पन लोकियानं **विपस्सनाक्खणे** विपस्सनाय आरम्मणकरणवसेन लोकुत्तरानं तदधिमुत्ततावसेन **मग्गक्खणे** निरोधसच्चस्स

आरम्मणाभिसमयवसेन सब्बेसम्पि किच्चाभिसमयवसेन पाकटभावतो पकासनट्ठेन पातुभावो वेदितब्बो।

इति भगवा सतिपि सब्बाकारेन सब्बधम्मानं अत्तनो ञाणस्स पाकटभावे पटिच्चसमुप्पादमुखेन विपस्सनाभिनिवेसस्स कतत्ता निपुणगम्भीरसुदुद्दसताय पच्चयाकारस्स तं पच्चवेक्खित्वा उप्पन्नबलवसोमनस्सो पटिपक्खसमुच्छेदविभावनेन सद्धिं अत्तनो तदभिसमयानुभावदीपकमेवेत्थ उदानं उदानेसि।

''कामा ते पठमा सेना''तिआदिना नयेन वुत्तप्पकारं मारसेनन्ति –

''कामा ते पठमा सेना, दुतिया अरति वुच्चति।
ततिया खुप्पिपासा ते, चतुत्थी तण्हा पवुच्चति॥

''पञ्चमी थिनमिद्धं ते, छट्ठा भीरू पवुच्चति।
सत्तमी विचिकिच्छा ते, मक्खो थम्भो च अट्ठमा॥

''लाभो सिलोको सक्कारो, मिच्छालद्धो च यो यसो।
यो चत्तानं समुक्कंसे, परे च अवजानति॥

''एसा नमुचि ते सेना, कण्हस्साभिप्पहारिनी।
न नं असूरो जिनाति, जेत्वा च लभते सुख''न्ति॥ (सु॰ नि॰ ४३८-४४१; महानि॰ २८) –

इमिना नयेन वुत्तप्पकारं मारसेनं।

तत्थ (सु॰ नि॰ अट्ठ॰ २.४३९-४१; महानि॰ अट्ठ॰ २८) यस्मा आदितोव अगारियभूते सत्ते वत्थुकामेसु किलेसकामा मोहयन्ति, ते अभिभुय्य अनगारियभावं उपगतानं पन्तेसु वा सेनासनेसु अञ्ञतरञ्ञतरेसु वा अधिकुसलेसु धम्मेसु **अरति** उप्पज्जति। वुत्तम्पि चेतं ''पब्बजितेन खो, आवुसो, अभिरति दुक्करा''ति (सं॰ नि॰ ४.३३१)। ततो ते परपटिबद्धजीविकत्ता **खुप्पिपासा** बाधति, ताय बाधितानं परियेसन **तण्हा** चित्तं किलमयति, अथ नेसं किलन्तचित्तानं **थिनमिद्धं** ओक्कमति, ततो विसेसमनधिगच्छन्तानं दुरभिसम्भवेसु अरञ्ञवनपत्थेसु सेनासनेसु विहरतं उत्राससञ्ञिता **भीरु** जायति, तेसं उस्सङ्कितपरिसङ्कितानं दीघरत्तं विवेकरसमनस्सादयमानानं विहरतं ''न सिया नु खो एस मग्गो''ति पटिपत्तियं **विचिकिच्छा** उप्पज्जति, तं विनोदेत्वा विहरतं अप्पमत्तकेन विसेसाधिगमेन **मानमक्खथम्भा** जायन्ति, तेपि विनोदेत्वा विहरतं ततो अधिकतरं विसेसाधिगमं निस्साय **लाभसक्कारसिलोका** उप्पज्जन्ति, लाभादिमुच्छिता धम्मपतिरूपकानि पकासेन्ता **मिच्छायसं** अधिगन्त्वा तत्थ ठिता जातिआदीहि **अत्तानं उक्कंसेन्ति परं वम्भेन्ति,** तस्मा कामादीनं पठमसेनादिभावो वेदितब्बो।

एवमेतं दसविधं सेनं उद्दिसित्वा यस्मा सा कण्हधम्मसमन्नागतत्ता कण्हस्स नमुचिनो उपकाराय संवत्तति, तस्मा नं ''तव सेना''ति निद्दिसन्तेन ''एसा नमुचि ते सेना, कण्हस्साभिप्पहारिनी''ति वुत्तं। तत्थ **अभिप्पहारिनी**ति समणब्राह्मणानं घातनी निप्पोथनी, अन्तरायकरीति अत्थो। **न नं असूरो जिनाति, जेत्वा च लभते सुख**न्ति एवं तव सेनं असूरो काये च जीविते च सापेक्खो पुरिसो न जिनाति, सूरो पन जिनाति, जेत्वा च मग्गसुखं फलसुखञ्च अधिगच्छतीति अत्थो। **सोपि ब्राह्मणो**ति सोपि खीणासवब्राह्मणो।

इदानि ''तेन खो पन समयेन भगवा सत्ताहं एकपल्लङ्केन निसिन्नो होति विमुत्तिसुखपटिसंवेदी। अथ खो भगवा तस्स सत्ताहस्स अच्चयेन तम्हा समाधिम्हा वुट्ठहित्वा रत्तिया पठमं यामं पटिच्चसमुप्पादं अनुलोमं साधुकं मनसाकासि। रत्तिया मज्झिमं यामं पटिच्चसमुप्पादं पटिलोमं साधुकं मनसाकासि। रत्तिया पच्छिमं यामं पटिच्चसमुप्पादं अनुलोमपटिलोमं साधुकं मनसाकासी''ति एवं वुत्ताय उदानपाळिया (उदा० १) इमिस्सा च खन्धकपाळिया अविरोधं दस्सेतुं **''उदाने पना''**तिआदि आरद्धं। एत्थ **तस्स वसेना**ति तस्स पच्चयाकारपजाननस्स पच्चयक्खयाधिगमस्स च वसेन। **एकेकमेव कोट्ठास**न्ति अनुलोमपटिलोमेसु एकेकमेव कोट्ठासं। **पाटिपदरत्तिया एवं मनसाकासी**ति रत्तिया तीसुपि यामेसु अनुलोमपटिलोमंयेव मनसाकासि। भगवा किर ठपेत्वा रतनघरसत्ताहं सेसेसु छसु सत्ताहेसु अन्तरन्तरा धम्मं पच्चवेक्खित्वा येभुय्येन विमुत्तिसुखपटिसंवेदी विहासि, रतनघरसत्ताहे पन अभिधम्मपविचयवसेनेव विहासि। तस्मा अन्तरन्तरा धम्मपच्चवेक्खणवसेन उप्पादितमनसिकारेसु पाटिपदरत्तिया उप्पादितं मनसिकारं सन्धाय इमिस्सं खन्धकपाळियं एवं वुत्तन्ति अधिप्पायो।

बोधिकथावण्णना निट्ठिता।

अजपालकथावण्णना

४. **तस्स सत्ताहस्स अच्चयेना**ति पल्लङ्कसत्ताहस्स अपगमनेन। **तम्हा समाधिम्हा वुट्ठहित्वा**ति ततो अरहत्तफलसमापत्तिसमाधितो यथाकालपरिच्छेदं वुट्ठहित्वा। **अञ्ञेपि बुद्धत्तकरा**ति विसाखपुण्णमितो पट्ठाय रत्तिन्दिवं एवं निच्चसमाहितभावहेतुभूतानं बुद्धगुणानं उपरि अञ्ञेपि बुद्धत्तसाधका। ''अयं बुद्धो''ति बुद्धभावस्स परेसं विभावना धम्मा किं नु खो सन्तीति योजना। **एकच्चानं देवतान**न्ति या अधिगतमग्गा सच्छिकतनिरोधा एकपदेसेन बुद्धगुणे जानन्ति, ता ठपेत्वा तदञ्ञासं देवतानं। **अनिमिसेही**ति धम्मपीतिविप्फारवसेन पसादविभावनिच्चलदलताय निमेसरहितेहि। **रतनचङ्कमे**ति देवताहि मापिते रतनमयचङ्कमे। ''रतनभूतानं सत्तन्नं पकरणानं तत्थ च अनुत्तरस्स धम्मरतनस्स सम्मसनेन तं ठानं रतनघरचेतियं नाम जात''न्तिपि वदन्ति। तेनेव **अट्ठसालिनियं** (ध० स० अट्ठ० निदानकथा) ''रतनघरं नाम न रतनमयं गेहं, सत्तन्नं पन पकरणानं सम्मसितट्ठानं रतनघरन्ति वेदितब्ब''न्ति वुत्तं।

कस्मा पनायं अजपालनिग्रोधो नाम जातोति आह **''तस्स किरा''**तिआदि। केचि पन ''यस्मा तत्थ वेदे सज्झायितुं असमत्था महल्लकब्राह्मणा पाकारपरिक्खेपयुत्तानि निवेसनानि कत्वा सब्बे वसिंसु, तस्मास्स 'अजपालनिग्रोधो'ति नामं जात''न्ति वदन्ति। तत्रायं वचनत्थो – न जपन्तीति अजपा, मन्तानं अनज्झायकाति अत्थो। अजपा लन्ति आदियन्ति निवासं एत्थाति **अजपालो**ति। अपरे पन वदन्ति ''यस्मा मज्झन्हिके समये अन्तो पविट्ठे अजे अत्तनो छायाय पालेति रक्खति, तस्मा 'अजपालो'तिस्स नामं रुळ्ह''न्ति। सब्बथापि नाममेतं तस्स रुक्खस्स।

विमुत्तिसुखं पटिसंवेदेन्तोति धम्मं विचिनन्तोयेव अन्तरन्तरा विमुत्तिसुखञ्च पटिसंवेदेन्तो। ''धम्मं विचिनन्तो विमुत्तिसुखञ्च पटिसंवेदेन्तो''ति एवं वा एत्थ पाठो गहेतब्बो। उदानट्ठकथायम्पि (उदा० अट्ठ० ४) हि अयमेव पाठो। धम्मं विचिनन्तो चेत्थ एवं अभिधम्मे नयमग्गं सम्मसि पठमं धम्मसङ्गणीपकरणं नाम, ततो विभङ्गप्पकरणं, धातुकथापकरणं, पुग्गलपञ्ञत्तिप्पकरणं, कथावत्थुं नाम, यमकं नाम, ततो महापकरणं पट्ठानं नामाति। तत्थस्स सण्हसुखुमट्ठानम्हि चित्ते ओतिण्णे पीति उप्पज्जि, पीतिया उप्पन्नाय लोहितं पसीदि, लोहिते पसन्ने छवि पसीदि, छविया पसन्नाय पुरत्थिमकायतो कूटागारादिप्पमाणा रस्मियो उट्ठहित्वा आकासे पक्खन्दं छद्दन्तनागकुलं विय पाचीनदिसाय अनन्तानि चक्कवाळानि पक्खन्दा। पच्छिमकायतो उट्ठहित्वा पच्छिमदिसाय, दक्खिणंसकूटतो उट्ठहित्वा दक्खिणदिसाय, वामंसकूटतो उट्ठहित्वा

उत्तरदिसाय अनन्तानि चक्कवाळानि पक्खन्दा। पादतलेहि पवाळङ्कुरवण्णा रस्मियो निक्खमित्वा महापथविं विनिब्बिज्झ उदकं द्विधा भिन्दित्वा वातक्खन्धं पदालेत्वा अजटाकासं पक्खन्दा। सीसतो संपरिवत्तियमानं मणिदामं विय नीलवण्णरस्मिवट्टि उट्ठहित्वा छ देवलोके विनिविज्झित्वा नव ब्रह्मलोके अतिक्कम्म अजटाकासं पक्खन्दा। तस्मिं दिवसे अपरिमाणेसु चक्कवाळेसु अपरिमाणा सत्ता सब्बे सुवण्णवण्णाव अहेसुं। तं दिवसञ्च पन भगवतो सरीरा निक्खन्ता यावज्जदिवसापि किर ता रस्मियो अनन्तलोकधातुयो गच्छन्तियेव। न केवलञ्च इमस्मिंयेव सत्ताहे धम्मं विचिनन्तस्स सरीरतो रस्मियो निक्खमिंसु, अथ खो रतनघरसत्ताहेपि पट्ठानं सम्मसन्तस्स एवमेव सरीरतो रस्मियो निक्खन्ता एवाति वेदितब्बं।

वुत्तञ्हेतं **अट्ठसालिनियं** (ध० स० अट्ठ० निदानकथा) –

''इमेसु च एकवीसतिया दिवसेसु एकदिवसेपि सत्थु सरीरतो रस्मियो न निक्खन्ता, चतुत्थे पन सत्ताहे पच्छिमुत्तराय दिसाय रतनघरे निसीदि। तत्थ धम्मसङ्गणिं सम्मसन्तस्सपि सरीरतो रस्मियो न निक्खन्ता। विभङ्गप्पकरणं, धातुकथं, पुग्गलपञ्ञत्तिं, कथावत्थुप्पकरणं, यमकप्पकरणं सम्मसन्तस्सपि रस्मियो न निक्खन्ता। यदा पन महापकरणं ओरुय्ह 'हेतुपच्चयो आरम्मणपच्चयो...पे०... अविगतपच्चयो'ति सम्मसनं आरभि, अथस्स चतुवीसतिसमन्तपट्ठानं सम्मसन्तस्स एकन्ततो सब्बञ्ञुतञ्ञाणं महापकरणे ओकासं लभि। यथा हि तिमिरपिङ्गलमहामच्छो चतुरासीतियोजनसहस्सगम्भीरे महासमुद्देयेव ओकासं लभति, एवमेव सब्बञ्ञुतञ्ञाणं एकन्ततो महापकरणेयेव ओकासं लभि।

''सत्थु एवं लद्धोकासेन सब्बञ्ञुतञ्ञाणेन यथासुखं सण्हसुखुमधम्मं सम्मसन्तस्स सरीरतो नीलपीतलोहितोदातमञ्जिट्ठपभस्सरवसेन छब्बण्णरस्मियो निक्खमिंसु। केसमस्सूहि चेव अक्खीनञ्च नीलट्ठानेहि **नीलरस्मियो** निक्खमिंसु, यासं वसेन गगनतलं अञ्जनचुण्णसमोकिण्णं विय उमापुप्फनीलुप्पलदलसञ्छन्नं विय वीतिपतन्तमणितालवण्टं विय सम्पसारितमेचकपटं विय च अहोसि। छवितो चेव अक्खीनञ्च पीतट्ठानेहि **पीतरस्मियो** निक्खमिंसु, यासं वसेन दिसाभागा सुवण्णरसनिसिञ्चमाना विय सुवण्णपटपसारिता विय कुङ्कुमचुण्णकणिकारपुप्फसम्परिकिण्णा विय च विरोचिंसु। मंसलोहितेहि चेव अक्खीनञ्च रत्तट्ठानेहि **लोहितरस्मियो** निक्खमिंसु, यासं वसेन दिसाभागा चीनपिट्ठचुण्णरञ्जिता विय सुपक्कलाखारसनिसिञ्चमाना विय रत्तकम्बलपरिक्खित्ता विय जयसुमनपारिबद्धकबन्धुजीवककुसुमसम्परिकिण्णा विय च विरोचिंसु। अट्ठीहि चेव दन्तेहि च अक्खीनञ्च सेतट्ठानेहि **ओदातरस्मियो** निक्खमिंसु, यासं वसेन दिसाभागा रजतकुटेहि आसिञ्चमानखीरधारासम्परिकिण्णा विय पसारितरजतपटविताना विय वीतिपतन्तरजततालवण्टा विय कुन्दकुमुदसिन्धुवारसुमनमल्लिकादिकुसुमसञ्छन्ना विय च विरोचिंसु। **मञ्जिट्ठपभस्सरा** पन तम्हा तम्हा सरीरप्पदेसा निक्खमिंसु। इति ता छब्बण्णरस्मियो निक्खमित्वा घनमहापथविं गण्हिंसु।

''चतुनहुताधिकद्वियोजनसतसहस्सबहला महापथवी निद्धन्तसुवण्णपिण्डि विय अहोसि। पथविं भिन्दित्वा हेट्ठा उदकं गण्हिंसु। पथवीसन्धारकं अट्ठनहुताधिकचतुयोजनसतसहस्सबहलं उदकं सुवण्णकलसेहि आसिञ्चमानविलीनसुवण्णं विय अहोसि। उदकं विनिविज्झित्वा वातं अग्गहेसुं। छन्नवुताधिकनवयोजनसतसहस्सबहलो वातो समुस्सितसुवण्णक्खन्धो विय अहोसि। वातं विनिविज्झित्वा हेट्ठा अजटाकासं पक्खन्दिंसु। उपरिभागेन उग्गन्त्वापि चतुमहाराजिके गण्हिंसु। ते विनिविज्झित्वा तावतिंसे, ततो

यामे, ततो तुसिते, ततो निम्मानरती, ततो परनिम्मितवसवत्ती, ततो नव ब्रह्मलोके, ततो वेहप्फले, ततो पञ्च सुद्धावासे विनिविज्झित्वा चत्तारो आरुप्पे गण्हिंसु। चत्तारो च आरुप्पे विनिविज्झित्वा अजटाकासं पक्खन्दिंसु।

''तिरियभागेहि अनन्ता लोकधातुयो पक्खन्दिंसु, एत्तके ठाने चन्दम्हि चन्दप्पभा नत्थि, सूरिये सूरियप्पभा नत्थि, तारकरूपेसु तारकरूपप्पभा नत्थि, देवतानं उय्यानविमानकप्परुक्खेसु सरीरे आभरणेसूति सब्बत्थ पभा नत्थि। तिसहस्सिमहासहस्सिलोकधातुया आलोकफरणसमत्थो महाब्रह्मापि सूरियुग्गमने खज्जोपनको विय अहोसि, चन्दसूरियतारकरूपदेवतुय्यानविमानकप्परुक्खानं परिच्छेदमत्तकमेव पञ्ञायित्थ। एत्तकं ठानं बुद्धरस्मीहियेव अज्झोत्थटं अहोसि। अयञ्च नेव बुद्धानं अधिट्ठानिद्धि, न भावनामयिद्धि। सण्हसुखुमधम्मं पन सम्मसतो लोकनाथस्स लोहितं पसीदि, वत्थुरूपं पसीदि, छविवण्णो पसीदि। चित्तसमुट्ठाना वण्णधातु समन्ता असीतिहत्थमत्ते पदेसे निच्चला अट्ठासी''ति।

एवं निसिन्नेति तम्हा समाधिम्हा वुट्ठहित्वा निसिन्ने। **एको ब्राह्मणो**ति नामगोत्तवसेन अनभिञ्ञातो अपाकटो एको ब्राह्मणो। **''हुं हु''न्ति करोन्तो विचरती**ति सब्बं अचोक्खजातिकं पस्सित्वा जिगुच्छन्तो ''हुं हु''न्ति करोन्तो विचरति। **एतदवोचा**ति (उदा॰ अट्ठ॰ ४) एतं इदानि वत्तब्बं ''कित्तावता नु खो''तिआदिवचनं अवोच। तत्थ **कित्तावता**ति कित्तकेन पमाणेन। **नु**-ति संसयत्थे निपातो, **खो**-ति पदपूरणे। **भो**-ति ब्राह्मणानं जातिसमुदागतं आलपनं। तथा हि वुत्तं ''भोवादि नाम सो होति, सचे होति सकिञ्चनो''ति (ध॰ प॰ ३९६; सु॰ नि॰ ६२५)। **गोतमा**ति भगवन्तं गोत्तेन आलपति। कथं पनायं ब्राह्मणो सम्पति समागतो भगवतो गोत्तं जानातीति? नायं सम्पति समागतो, छब्बस्सानि पधानकरणकाले उपट्ठहन्तेहि पञ्चवग्गियेहि सद्धिं चरमानो अपरभागे तं वतं छड्डेत्वा उरुवेलायं सेननिगमे एको अदुतियो हुत्वा पिण्डाय चरमानोपि तेन ब्राह्मणेन दिट्ठपुब्बो चेव सल्लपितपुब्बो च, तेन सो पुब्बे पञ्चवग्गियेहि गय्हमानं भगवतो गोत्तं अनुस्सरन्तो ''भो गोतमा''ति भगवन्तं गोत्तेन आलपति। यतो पट्ठाय वा भगवा महाभिनिक्खमनं निक्खन्तो अनोमानदीतीरे पब्बजि, ततो पभुति ''समणो गोतमो''ति चन्दो विय सूरियो विय पाकटो पञ्ञातो होति, न च तस्स गोत्तजानने कारणं गवेसितब्बं। **ब्राह्मणकरणा**ति ब्राह्मणं करोन्तीति ब्राह्मणकरणा, ब्राह्मणभावकराति अत्थो। एत्थ च ''कित्तावता''ति एतेन येहि धम्मेहि ब्राह्मणो होति, तेसं धम्मानं परिमाणं पुच्छति। **''कतमे''**ति पन इमिना तेसं सरूपं पुच्छति।

उदानं उदानेसीति ''यो ब्राह्मणो''तिआदिकं उदानं उदानेसि, न पन तस्स ब्राह्मणस्स धम्मं देसेसि। कस्मा? धम्मदेसनाय अभाजनभावतो। तथा हि तस्स ब्राह्मणस्स इमं गाथं सुत्वा न सच्चाभिसमयो अहोसि। यथा च इमस्स, एवं उपकस्स आजीवकस्स बुद्धगुणप्पकासनं सुत्वा। धम्मचक्कप्पवत्तनतो हि पुब्बभागे भगवता भासितं परेसं सुणन्तानम्पि तपुस्सभल्लिकानं सरणदानं विय वासनाभागियमेव जातं, न असेक्खभागियं वा निब्बेधभागियं वा। एसा हि धम्मताति। **वेदेहि वा अन्त**न्ति एत्थ **अन्तं** नाम सब्बसङ्खारपरियोसानं निब्बानं। **इमे उस्सदा नत्थी**ति सब्बसो इमे पहीनत्ता न सन्ति।

अजपालकथावण्णना निट्ठिता।

मुचलिन्दकथावण्णना

५. मुचलिन्दमूलेति (उदा॰ अट्ठ॰ ११) एत्थ **मुचलिन्दो** वुच्चति नीपरुक्खो, यो ''निचुलो''तिपि वुच्चति, तस्स समीपेति अत्थो। केचि पन ''मुचलोति तस्स रुक्खस्स नामं, वनजेट्ठकताय पन मुचलिन्दोति वुत्त''न्ति वदन्ति। **उदपादी**ति सकलचक्कवाळगब्भं पूरेन्तो महामेघो उदपादि। एवरूपो किर मेघो द्वीसुयेव कालेसु वस्सति चक्कवत्तिम्हि वा उप्पन्ने बुद्धे

वा, इध बुद्धुप्पादकाले उदपादि। **पोक्खरणिया निब्बत्तो**ति पोक्खरणिया हेट्ठा नागभवनं अत्थि, तत्थ निब्बत्तो। **सकभवना**ति अत्तनो नागभवनतो। **एवं भोगेहि परिक्खिपित्वा**ति सत्त वारे अत्तनो सरीरभोगेहि भगवतो कायं परिवारेत्वा। **उपरिमुद्धनि महन्तं फणं विहच्चा**ति भगवतो मुद्धप्पदेसस्स उपरि अत्तनो महन्तं फणं पसारेत्वा। ''फणं करित्वा''तिपि पाठो, सोयेवत्थो।

तस्स किर नागराजस्स एतदहोसि ''भगवा च मय्हं भवनसमीपे रुक्खमूले निसिन्नो, अयञ्च सत्ताहवद्दलिका वत्तति, वासागारमस्स लद्धुं वट्टती''ति। सो सत्तरतनमयं पासादं निम्मिनितुं सक्कोन्तोपि ''एवं कते कायसारो गहितो न भविस्सति, दसबलस्स कायवेय्यावच्चं करिस्सामी''ति महन्तं अत्तभावं कत्वा सत्थारं सत्तक्खत्तुं भोगेहि परिक्खिपित्वा उपरि फणं धारेसि। ''तस्स परिक्खेपब्भन्तरं लोहपासादे भण्डागारगब्भप्पमाणं अहोसी''ति इध वुत्तं। **मज्झिमट्ठकथायं** (म० नि० अट्ठ० १.२८४) पन –

> ''परिक्खेपस्स अन्तो ओकासो हेट्ठा लोहपासादप्पमाणो अहोसि, 'इच्छितिच्छितेन इरियापथेन सत्था विहरिस्सती'ति नागराजस्स अज्झासयो अहोसि, तस्मा एवं महन्तं ओकासं परिक्खिपि, मज्झे रतनपल्लङ्को पञ्ञत्तो होति, उपरि सुवण्णतारकविचित्तं समोसरितगन्धदामकुसुमचेलवितानं अहोसि, चतूसु कोणेसु गन्धतेलेन दीपा जलिता, चतूसु दिसासु विवरित्वा चन्दनकरण्डका ठपिता''ति –

वुत्तं। **इच्छितिच्छितेन इरियापथेन विहरिस्सती**ति च नागराजस्स अज्झासयमत्तमेतं, भगवा पन यथानिसिन्नोव सत्ताहं वीतिनामेसि।

किञ्चापि...पे०... चिन्तेतुं युत्तन्ति एत्थ केचि वदन्ति ''उण्हग्गहणं भोगपरिक्खेपस्स विपुलभावकरणे कारणकित्तनं। खुद्दके हि तस्मिं भगवन्तं नागराजस्स सरीरसम्भूता उस्मा बाधेय्य, विपुलभावकरणेन पन तादिसं मा उण्हं बाधयित्था''ति। सउपसग्गपदस्स अत्थो उपसग्गेन विनापि विञ्ञायतीति आह **''विद्धन्ति उब्बिद्ध''**न्ति, सा चस्स उब्बिद्धता उपक्किलेसविगमेन दूरभावेन उपट्ठानन्ति आह **''मेघविगमेन दूरीभूत''**न्ति। इन्दनीलमणि विय दिब्बति जोततीति **देवो,** आकासो। **विदित्वा**ति ''इदानि विगतवलाहको आकासो, नत्थि भगवतो सीतादिउपद्दवो''ति ञत्वा। **विनिवेठेत्वा**ति अपनेत्वा। **अत्तनो रूप**न्ति अत्तनो नागरूपं। **पटिसंहरित्वा**ति अन्तरधापेत्वा। **माणवकवण्ण**न्ति कुमारकरूपं।

एतमत्थं विदित्वाति ''विवेकसुखपटिसंवेदिनो यत्थ कत्थचि सुखमेव होती''ति एतं अत्थं सब्बाकारेन जानित्वा। **इमं उदान**न्ति इमं विवेकसुखानुभावदीपकं उदानं उदानेसि। **सुतधम्मस्सा**ति विस्सुतधम्मस्स। तेनाह **''पकासितधम्मस्सा''**ति। **अकुप्पनभावो**ति अकुप्पनसभावो।

मुचलिन्दकथावण्णना निट्ठिता।

राजायतनकथावण्णना

६. **ओसधहरीतकं उपनेसी**ति न केवलं ओसधहरीतकमेव, दन्तकट्ठम्पि उपनेसि। **पच्चग्घे**ति एत्थ पुरिमं अत्थविकप्पं केचि न इच्छन्ति, तेनेव **आचरियधम्मपालत्थेरेन** वुत्तं ''पच्चग्घेति अभिनवे। पच्चेकं महग्घताय पच्चग्घेति केचि, तं न सुन्दरं। न हि बुद्धा भगवन्तो महग्घं पटिग्गण्हन्ति परिभुञ्जन्ति वा''ति।

राजायतनकथावण्णना निट्ठिता।

ब्रह्मयाचनकथावण्णना

७. **आचिण्णसमाचिण्णो**ति आचरितो चेव आचरन्तेहि च सम्मदेव आचरितोति अत्थो। एतेन अयं परिवितक्को सब्बबुद्धानं पठमाभिसम्बोधियं उप्पज्जतेवाति अयमेत्थ धम्मताति दस्सेति। गम्भीरोपि धम्मो पटिपक्खविधमनेन सुपाकटो भवेय्य, पटिपक्खविधमनं पन सम्मापटिपत्तिपटिबद्धं, सा सद्धम्मसवनाधीना, तं सत्थरि धम्मे च पसादायत्तं। सो विसेसतो लोके सम्भावनीयस्स गरुकातब्बस्स अभिपत्थनाहेतुकोति परम्पराय सत्तानं धम्मसम्पटिपत्तिया ब्रह्मुनो याचनानिमित्तन्ति तं दस्सेन्तो **''ब्रह्मुना याचिते देसेतुकामताया''**तिआदिमाह।

अधिगतोति पटिविद्धो, सयम्भूञाणेन ''इदं दुक्ख''न्तिआदिना यथाभूतं अवबुद्धोति अत्थो। **धम्मो**ति चतुसच्चधम्मो तब्बिनिमुत्तस्स पटिविज्झितब्बधम्मस्स अभावतो। **गम्भीरो**ति महासमुद्दो विय मकसतुण्डसूचिया अञ्ञत्र समुपचितपरिपक्कञाणसम्भारेहि अञ्ञेसं ञाणेन अलब्भनेय्यपतिट्ठो। गम्भीरत्ताव **दुद्दसो** दुक्खेन दट्ठब्बो, न सक्का सुखेन दट्ठुं। यो हि अलब्भनेय्यपतिट्ठो, सो ओगाहितुं असक्कुणेय्यताय सरूपतो च विसेसतो च सुखेन पस्सितुं न सक्का, अथ खो किच्छेन केनचि कदाचिदेव दट्ठब्बो। दुद्दसत्ताव **दुरनुबोधो** दुक्खेन अवबुज्झितब्बो, न सक्का सुखेन अवबुज्झितुं। यञ्हि दट्ठुमेव न सक्का, तस्स ओगाहेत्वा अनुबुज्झने कथा एव नत्थि अवबोधस्स दुक्करभावतो। इमस्मिं ठाने ''तं किं मञ्ञथ, भिक्खवे, कतमं नु खो दुक्करतरं वा दुरभिसम्भवतरं वा''ति (सं० नि० ५.१११५) **सुत्तपदं** वत्तब्बं।

सन्तोति अनुपसन्तसभावानं किलेसानं सङ्खारानञ्च अभावतो वूपसन्तसब्बपरिळाहताय सन्तो निब्बुतो, सन्तारम्मणताय वा सन्तो। एत्थ च निरोधसच्चं सन्तं आरम्मणन्ति सन्तारम्मणं, मग्गसच्चं सन्तं सन्तारम्मणञ्चाति सन्तारम्मणं। पधानभावं नीतोति **पणीतो**। अथ वा **पणीतो**ति अतित्तिकरणट्ठेन अतप्पको सादुरसभोजनं विय। सन्तपणीतभावेनेव चेत्थ असेचनकताय अतप्पकता दट्ठब्बा। इदञ्हि द्वयं लोकुत्तरमेव सन्धाय वुत्तं। **अतक्कावचरो**ति उत्तमञाणविसयत्ता तक्केन अवचरितब्बो ओगाहितब्बो न होति, ञाणेनेव अवचरितब्बो। ततो एव निपुणञाणगोचरताय सण्हसुखुमसभावत्ता च **निपुणो सण्हो। पण्डितवेदनीयो**ति बालानं अविसयत्ता सम्मापटिपदं पटिपन्नेहि पण्डितेहि एव वेदितब्बो।

अल्लीयन्ति अभिरमितब्बट्ठेन सेवियन्तीति **आलया,** पञ्च कामगुणाति आह **''सत्ता पञ्चकामगुणे अल्लीयन्ति, तस्मा ते आलयाति वुच्चन्ती''**ति। तत्थ **पञ्चकामगुणे अल्लीयन्ती**ति पञ्चकामगुणे सेवन्तीति अत्थो। **ते**ति पञ्च कामगुणा। **रमन्ती**ति रतिं विन्दन्ति कीळन्ति लळन्ति। आलीयन्ति अभिरमणवसेन सेवन्तीति आलया, अट्ठसतं तण्हाविचरितानि, तेहि आलयेहि रमन्तीति **आलयरामा**ति एवम्पेत्थ अत्थो दट्ठब्बो। इमे हि सत्ता यथा कामगुणे, एवं रागम्पि अस्सादेन्ति अभिनन्दन्तियेव। यथेव हि सुसज्जितपुप्फफलभरितरुक्खादिसम्पन्नं उय्यानं पविट्ठो राजा ताय ताय सम्पत्तिया रमति, सम्मुदितो आमोदितपमोदितो होति, न उक्कण्ठति, सायम्पि निक्खमितुं न इच्छति, एवमिमेहि कामालयतण्हालयेहि सत्ता रमन्ति, संसारवट्टे सम्मोदिता अनुक्कण्ठिता वसन्ति। तेन नेसं भगवा दुविधम्पि आलयं उय्यानभूमिं विय दस्सेन्तो **''आलयरामा''**तिआदिमाह। **रता**ति निरता। **सुट्ठु मुदिता**ति अतिविय मुदिता अनुक्कण्ठनतो।

ठानं सन्धायाति ठानसद्दं सन्धाय। अत्थतो पन **ठान**न्ति च पटिच्चसमुप्पादो एव अधिप्पेतो। तिट्ठति एत्थ फलं तदायत्तवुत्तितायाति **ठानं,** सङ्खारादीनं पच्चयभूता अविज्जादयो। इमेसं सङ्खारादीनं पच्चयाति इदप्पच्चया, अविज्जादयोव।

इदप्पच्चया एव **इदप्पच्चयता** यथा देवो एव देवता। इदप्पच्चयानं वा अविज्जादीनं अत्तनो फलं पटिच्च पच्चयभावो उप्पादनसमत्थता **इदप्पच्चयता**। तेन समत्थपच्चयलक्खणो पटिच्चसमुप्पादो दस्सितो होति। पटिच्च समुप्पज्जति फलं एतस्माति **पटिच्चसमुप्पादो**। पदद्वयेनपि धम्मानं पच्चयट्ठो एव विभावितो। सङ्खारादिपच्चयानञ्हि अविज्जादीनं एतं अधिवचनं इदप्पच्चयतापटिच्चसमुप्पादोति। **सब्बसङ्खारसमथो**तिआदि सब्बं अत्थतो निब्बानमेव। यस्मा हि तं आगम्म पटिच्च अरियमग्गस्स आरम्मणपच्चयभावहेतु सब्बसङ्खारविप्फन्दितानि सम्मन्ति वूपसम्मन्ति, तस्मा ''सब्बसङ्खारसमथो''ति वुच्चति। सब्बसङ्खतविसंयुत्ते हि निब्बाने सङ्खारवूपसमपरियायो ञायागतोयेवाति। इदं पनेत्थ निब्बचनं – सब्बे सङ्खारा सम्मन्ति एत्थाति **सब्बसङ्खारसमथो**ति।

यस्मा च तं आगम्म सब्बे उपधयो पटिनिस्सट्ठा समुच्छेदवसेन परिच्चत्ता होन्ति, अट्ठसतप्पभेदा सब्बापि तण्हा खीयन्ति, सब्बे किलेसरागा विरज्जन्ति, जरामरणादिभेदं सब्बं वट्टदुक्खं निरुज्झति, तस्मा **''सब्बूपधिपटिनिस्सग्गो तण्हाक्खयो विरागो निरोधो''**ति वुच्चति, या पनेसा तण्हा तेन तेन भवेन भवन्तरं भवनिकन्तिभावेन विनति संसिब्बति, फलेन वा सद्धिं कम्मं विनति संसिब्बतीति कत्वा वानन्ति वुच्चति, ततो निक्खन्तं वानतोति **निब्बानं। किलमथो**ति कायकिलमथो। विहेसापि कायविहेसायेव, चित्ते पन उभयम्पेतं बुद्धानं नत्थि बोधिमूलेयेव समुच्छिन्नत्ता। एत्थ च चिरनिसज्जाचिरभासनेहि पिट्ठिआगिलायनतालुगलसोसादिवसेन कायकिलमथो चेव कायविहेसा च वेदितब्बा, सा च खो देसनाय अत्थं अजानन्तानञ्च अप्पटिपज्जन्तानञ्च वसेन। जानन्तानं पन पटिपज्जन्तानञ्च देसनाय कायपरिस्समोपि सत्थु अपरिस्समोव, तेनाह भगवा ''न च मं धम्माधिकरणं विहेसेती''ति। तेनेव वुत्तं **''या अजानन्तानं देसना नाम, सो मम किलमथो अस्सा''**ति।

अपिस्सूति सम्पिण्डनत्थे निपातो। सो न केवलं एतदहोसि, इमापि गाथा पटिभंसूति दीपेति। **भगवन्त**न्ति पटिसद्दयोगेन सामिअत्थे उपयोगवचनन्ति आह **''भगवतो''**ति। वुद्धिप्पत्ता अच्छरिया वा **अनच्छरिया**। वुद्धिअत्थोपि हि अ-कारो होति यथा ''असेक्खा धम्मा''ति। कप्पानं चत्तारि असङ्ख्येय्यानि सतसहस्सञ्च सदेवकस्स लोकस्स धम्मसंविभागकरणत्थमेव पारमियो पूरेत्वा इदानि समधिगतधम्मरज्जस्स तत्थ अप्पोस्सुक्कतापत्तिदीपनत्ता गाथात्थस्स अनुअच्छरियता तस्स वुद्धिप्पत्ति च वेदितब्बा। अत्थद्वारेन हि गाथानं अनच्छरियता। **गोचरा अहेसु**न्ति उपट्ठहंसु, उपट्ठानञ्च वितक्कयितब्बताति आह **''परिवितक्कयितब्बभावं पापुणिंसू''**ति।

किच्छेनाति न दुक्खप्पटिपदाय। बुद्धानञ्हि चत्तारोपि मग्गा सुखप्पटिपदाव होन्ति। पारमीपूरणकाले पन सरागसदोससमोहस्सेव सतो आगतागतानं याचकानं अलङ्कतप्पटियत्तं सीसं कन्तित्वा गललोहितं नीहरित्वा सुअञ्जितानि अक्खीनि उप्पाटेत्वा कुलवंसप्पदीपं पुत्तं मनापचारिनिं भरियन्ति एवमादीनि देन्तस्स अञ्ञानि च खन्तिवादिसदिसेसु अत्तभावेसु छेज्जभेज्जादीनि पापुणन्तस्स आगमनीयपटिपदं सन्धायेतं वुत्तं। **ह**-इति वा ब्यत्तन्ति एतस्मिं अत्थे निपातो। एकंसत्थेति केचि। **ह** ब्यत्तं एकंसेन वा **अलं** निप्पयोजनं एवं किच्छेन अधिगतं धम्मं देसेतुन्ति योजना। **हल**न्ति वा अलन्ति इमिना समानत्थं पदं ''हलन्ति वदामी''तिआदीसु विय। ''पकासित''न्तिपि पठन्ति, देसितन्ति अत्थो। एवं किच्छेन अधिगतस्स धम्मस्स अलं देसितं परियत्तं देसितं, को अत्थो देसितेनाति वुत्तं होति। **रागदोसपरेतेही**ति रागदोसफुट्ठेहि, फुट्ठविसेन विय सप्पेन रागेन दोसेन च सम्फुट्ठेहि अभिभूतेहीति अत्थो। अथ वा **रागदोसपरेतेही**ति रागदोसानुगतेहि, रागेन च दोसेन च अनुबन्धेहीति अत्थो।

पटिसोतगामिन्ति (दी॰ नि॰ अट्ठ॰ २.६५; म॰ नि॰ अट्ठ॰ १.२८१; सं॰ नि॰ अट्ठ॰ १.१.१७२) निच्चगाहादीनं

पटिसोतं अनिच्चं दुक्खमनत्ता असुभन्ति एवं गतं पवत्तं चतुसच्चधम्मन्ति अत्थो। **रागरत्ता**ति कामरागेन भवरागेन दिट्ठिरागेन च रत्ता। **न दक्खन्ती**ति अनिच्चं दुक्खमनत्ता असुभन्ति इमिना सभावेन न पस्सिस्सन्ति, ते अपस्सन्ते को सक्खिस्सति अनिच्चन्तिआदिना सभावेन याथावतो धम्मं जानापेतुन्ति अधिप्पायो। रागदोसपरेततापि नेसं सम्मुळ्हभावेनेवाति आह ''**तमोखन्धेन आवुटा**''ति, अविज्जारासिना अज्झोत्थटाति अत्थो।

अप्पोस्सुक्कताय चित्तं नमतीति कस्मा पनस्स एवं चित्तं नमि, ननु एस ''मुत्तोहं मोचेस्सामि, तिण्णोहं तारेस्सामि,

> किं मे अञ्ञातवेसेन, धम्मं सच्छिकतेनिध।
> सब्बञ्ञुतं पापुणित्वा, तारयिस्सं सदेवक''न्ति॥ (बु॰ वं॰ २.५५) –

पत्थनं कत्वा पारमियो पूरेत्वा सब्बञ्ञुतं पत्तोति? सच्चमेव, तदेव पच्चवेक्खणानुभावेन पनस्स एवं चित्तं नमि। तस्स हि सब्बञ्ञुतं पत्वा सत्तानं किलेसगहनतं धम्मस्स च गम्भीरतं पच्चवेक्खन्तस्स सत्तानं किलेसगहनता च धम्मगम्भीरता च सब्बाकारेन पाकटा जाता। अथस्स ''इमे सत्ता कञ्जियपुण्णलाबु विय तक्कभरितचाटि विय वसातेलपीतपिलोतिका विय अञ्जनमक्खितहत्थो विय च किलेसभरिता अतिसंकिलिट्ठा रागरत्ता दोसदुट्ठा मोहमुळ्हा, ते किं नाम पटिविज्झिस्सन्ती''ति चिन्तयतो किलेसगहनपच्चवेक्खणानुभावेनपि एवं चित्तं नमि।

''अयं धम्मो पथवीसन्धारकउदकक्खन्धो विय **गम्भीरो,** पब्बतेन पटिच्छादेत्वा ठपितो सासपो विय **दुद्दसो,** सतधा भिन्नस्स वालस्स कोटि विय **अणु**। मया हि इमं धम्मं पटिविज्झितुं वायमन्तेन अदिन्नं दानं नाम नत्थि, अरक्खितं सीलं नाम नत्थि, अपरिपूरिता काचि पारमी नाम नत्थि, तस्स मे निरुस्साहं विय मारबलं विधमन्तस्सपि पथवी न कम्पित्थ, पठमयामे पुब्बेनिवासं अनुस्सरन्तस्सपि न कम्पित्थ, मज्झिमयामे दिब्बचक्खुं विसोधेन्तस्सपि न कम्पित्थ, पच्छिमयामे पन पटिच्चसमुप्पादं पटिविज्झन्तस्सेव मे दससहस्सिलोकधातु कम्पित्थ। इति मादिसेनपि तिक्खञाणेन किच्छेनेवायं धम्मो पटिविद्धो, तं लोकियमहाजना कथं पटिविज्झिस्सन्ती''ति धम्मगम्भीरताय पच्चवेक्खणानुभावेनपि एवं चित्तं नमीति वेदितब्बं।

अपिच ब्रह्मुना याचिते देसेतुकामतायपिस्स एवं चित्तं नमि। जानाति हि भगवा ''मम अप्पोस्सुक्कताय चित्ते नममाने महाब्रह्मा धम्मदेसनं याचिस्सति, इमे च सत्ता ब्रह्मगरुका, ते 'सत्था किर धम्मं न देसेतुकामो अहोसि, अथ नं महाब्रह्मा याचित्वा देसापेति, सन्तो वत भो धम्मो पणीतो'ति मञ्ञमाना सुस्सूसिस्सन्ती''ति। इदम्पिस्स कारणं पटिच्च अप्पोस्सुक्कताय चित्तं नमि, नो धम्मदेसनायाति वेदितब्बं।

८. **सहम्पतिस्सा**ति सो किर कस्सपस्स भगवतो सासने सहको नाम थेरो पठमज्झानं निब्बत्तेत्वा पठमज्झानभूमियं कप्पायुकब्रह्मा हुत्वा निब्बत्तो, तत्र नं सहम्पति ब्रह्माति सञ्जानन्ति। तं सन्धायाह ''**ब्रह्मुनो सहम्पतिस्सा**''ति। **नस्सति वता**ति सो किर इमं सद्दं तथा निच्छारेति, यथा दससहस्सिलोकधातुब्रह्मानो सुत्वा सब्बे सन्निपतिंसु। **अप्परजक्खजातिका**ति पञ्ञामये अक्खिम्हि अप्पं परित्तं रागदोसमोहरजं एतेसं एवंसभावाति अप्परजक्खजातिका। अप्पं रागादिरजं येसं ते सभावा अप्परजक्खजातिकाति एवमेत्थ अत्थो दट्ठब्बो। **अस्सवनता**ति ''सयं अभिञ्ञा''तिआदीसु विय करणत्थे पच्चत्तवचनं, अस्सवनतायाति अत्थो। **भविस्सन्ती**ति पुरिमबुद्धेसु दसपुञ्ञकिरियवसेन कताधिकारा परिपाकगतपदुमानि विय सूरियरस्मिसम्फस्सं धम्मदेसनंयेव आकङ्खमाना चतुप्पदिकगाथावसाने अरियभूमिं ओक्कमनारहा न एको, न द्वे, अनेकसतसहस्सा धम्मस्स अञ्ञातारो भविस्सन्तीति दस्सेति।

पातुरहोसीति पातुभवि। **समलेहि चिन्तितो**ति समलेहि पूरणकस्सपादीहि छहि सत्थारेहि चिन्तितो। ते हि पुरेतरं उप्पज्जित्वा सकलजम्बुदीपे कण्टके पत्थरमाना विय विसं सिञ्चमाना विय च समलं मिच्छादिट्ठिधम्मं देसयिंसु। ते किर बुद्धकोलाहलानुस्सवेन सञ्जातकुतूहला लोकं वञ्चेत्वा कोहञ्ञे ठत्वा सब्बञ्ञुतं पटिजानन्ता यं किञ्चि अधम्मंयेव धम्मोति दीपेसुं। **अपापुरेत**न्ति विवर एतं। **अमतस्स द्वार**न्ति अमतस्स निब्बानस्स द्वारभूतं अरियमग्गं। इदं वुत्तं होति — एतं कस्सपस्स भगवतो सासनन्तरधानतो पभुति पिहितं निब्बाननगरस्स महाद्वारं अरियमग्गं सद्धम्मदेसनाहत्थेन अपापुर विवर उग्घाटेहीति। **सुणन्तु धम्मं विमलेनानुबुद्ध**न्ति इमे सत्ता रागादिमलानं अभावतो विमलेन सम्मासम्बुद्धेन अनुबुद्धं चतुसच्चधम्मं सुणन्तु ताव भगवाति याचति।

सेलपब्बतो उच्चो होति थिरो च, न पंसुपब्बतो मिस्सकपब्बतो वाति आह **''सेले यथा पब्बतमुद्धनिट्ठितो''**ति। तस्सत्थो ''सेलमये एकग्घने पब्बतमुद्धनि यथाठितोव। न हि तत्थ ठितस्स दस्सनत्थं गीवुक्खिपनपसारणादिकिच्चं अत्थी''ति। **तथूपम**न्ति तप्पटिभागं सेलपब्बतूपमं। **धम्ममयं पासाद**न्ति लोकुत्तरधम्ममाह। सो हि सब्बसो पसादावहो सब्बधम्मे अतिक्कम्म अब्भुग्गतट्ठेन पासादसदिसो च, पञ्ञापरियायो वा इध धम्म-सद्दो। पञ्ञा हि अब्भुग्गतट्ठेन पासादोति अभिधम्मे निद्दिट्ठा। तथा चाह —

> ''पञ्ञापासादमारुय्ह, असोको सोकिनिं पजं।
> पब्बतट्ठोव भूमट्ठे, धीरो बाले अवेक्खती''ति॥ (ध॰ प॰ २८)।

अयं पनेत्थ सङ्खेपत्थो — यथा सेलपब्बतमुद्धनि यथाठितोव चक्खुमा पुरिसो समन्ततो जनतं पस्सेय्य, तथा त्वम्पि सुमेध सुन्दरपञ्ञ सब्बञ्ञुतञ्ञाणेन समन्तचक्खु भगवा धम्ममयं पञ्ञामयं पासादमारुय्ह सयं अपेतसोको सोकावतिण्णं जातिजराभिभूतं जनतं अवेक्खस्सु उपधारय उपपरिक्खाति। अयं पनेत्थ अधिप्पायो — यथा हि पब्बतपादे समन्ता महन्तं खेत्तं कत्वा तत्थ केदारपाळीसु कुटिकायो कत्वा रत्तिं अग्गिं जालेय्युं, चतुरङ्गसमन्नागतञ्च अन्धकारं अस्स, अथ तस्स पब्बतस्स मत्थके ठत्वा चक्खुमतो पुरिसस्स भूमिं ओलोकयतो नेव खेत्तं, न केदारपाळियो, न कुटियो, न तत्थ सयितमनुस्सा पञ्ञायेय्युं अनुज्जलभावतो, कुटिकासु पन अग्गिजालामत्तमेव पञ्ञायेय्य उज्जलभावतो, एवं धम्मपासादं आरुय्ह सत्तनिकायं ओलोकयतो तथागतस्स ये ते अकतकल्याणा सत्ता, ते एकविहारे दक्खिणजाणुपस्से निसिन्नापि बुद्धचक्खुस्स आपाथं नागच्छन्ति ञाणग्गिना अनुज्जलभावतो अनुळारभावतो च, रत्तिं खित्ता सरा विय होन्ति। ये पन कतकल्याणा वेनेय्यपुग्गला, ते एवस्स दूरेपि ठिता आपाथमागच्छन्ति परिपक्कञाणग्गिताय समुज्जलभावतो उळारसन्तानताय च, सो अग्गि विय हिमवन्तपब्बतो विय च। वुत्तम्पि चेतं —

> ''दूरे सन्तो पकासेन्ति, हिमवन्तोव पब्बतो।
> असन्तेत्थ न दिस्सन्ति, रत्तिं खित्ता यथा सरा''ति॥ (ध॰ प॰ ३०४)।

उट्ठेहीति भगवतो धम्मदेसनत्थं चारिकचरणं याचन्तो भणति। **उट्ठेही**ति वा धम्मदेसनाय अप्पोस्सुक्कतासङ्खातसङ्कोचापत्तितो किलासुभावतो उट्ठह। **वीरा**तिआदीसु भगवा सातिसयचतुब्बिधसम्मप्पधानवीरियवन्तताय **वीरो,** देवपुत्तमच्चुकिलेसाभिसङ्खारानं विजितत्ता **विजितसङ्गामो,** जातिकन्तारादितो वेनेय्यसत्थं वाहनसमत्थताय निब्बानसङ्खातं खेमप्पदेसं सम्पापनसमत्थताय **सत्थवाहो,** कामच्छन्दइणस्स अभावतो **अणणो**ति वेदितब्बो। यो हि परेसं इणं गहेत्वा विनासेति, सो तेहि ''इणं देही''ति तज्जमानोपि फरुसं वुच्चमानोपि वम्भमानोपि वधियमानोपि किञ्चि पटिप्फरितुं न सक्कोति, सब्बं तितिक्खति। तितिक्खकारणञ्हिस्स

तं इणं होति, एवमेव यो यम्हि कामच्छन्देन रज्जति, तण्हागहणेन तं वत्थुं गण्हाति, सो तेन फरुसं वुच्चमानोपि वम्भमानोपि वधियमानोपि किञ्चि पटिप्पहरितुं न सक्कोति, सब्बं तितिक्खति। तितिक्खकारणञ्हिस्स सो कामच्छन्दो होति घरसामिकेहि विहेठियमानानं इत्थीनं विय। कस्मा? इणसदिसत्ता कामच्छन्दस्स।

९. **अज्झेसन**न्ति गरुट्ठानीयं पयिरुपासित्वा गरुतरं पयोजनं उद्दिस्स अभिपत्थना अज्झेसना, सापि अत्थतो याचना एव। **बुद्धचक्खुना**ति इन्द्रियपरोपरियत्तञाणेन च आसयानुसयञाणेन च। इमेसञ्हि द्विन्नं ञाणानं **बुद्धचक्खू**ति नामं, सब्बञ्ञुतञ्ञाणस्स **समन्तचक्खू**ति। हेट्ठिमानं तिण्णं मग्गञाणानं **धम्मचक्खू**ति। **अप्परजक्खे**तिआदीसु येसं वुत्तनयेनेव पञ्ञाचक्खुम्हि रागादिरजं अप्पं, ते **अप्परजक्खा**। येसं तं महन्तं, ते **महारजक्खा**। येसं सद्धादीनि इन्द्रियानि तिक्खानि, ते **तिक्खिन्द्रिया**। येसं तानि मुदूनि, ते **मुदिन्द्रिया**। येसं तेयेव सद्धादयो आकारा सुन्दरा, ते **स्वाकारा**। ये कथितकारणं सल्लक्खेन्ति, सुखेन सक्का होन्ति विञ्ञापेतुं, ते **सुविञ्ञापया**। ये परलोकञ्चेव वज्जञ्च भयतो पस्सन्ति, ते **परलोकवज्जभयदस्साविनो** नाम।

उप्पलानि एत्थ सन्तीति उप्पलिनी, गच्छोपि जलासयोपि, इध पन जलासयो अधिप्पेतो, तस्मा **उप्पलिनिय**न्ति उप्पलवनेति एवमत्थो गहेतब्बो। इतो परेसुपि एसेव नयो। **अन्तोनिमुग्गपोसीनी**ति यानि उदकस्स अन्तो निमुग्गानेव हुत्वा पुस्सन्ति वड्ढन्ति, तानि अन्तोनिमुग्गपोसीनि। **उदकं अच्चुग्गम्म तिट्ठन्ती**ति उदकं अतिक्कमित्वा तिट्ठन्ति। तत्थ यानि अच्चुग्गम्म ठितानि सूरियरस्मिसम्फस्सं आगमयमानानि, तानि अज्ज पुप्फनकानि। यानि समोदकं ठितानि, तानि स्वे पुप्फनकानि। यानि उदका अनुग्गतानि अन्तोनिमुग्गपोसीनि, तानि ततियदिवसे पुप्फनकानि। उदका पन अनुग्गतानि अञ्ञानिपि सरोगउप्पलादीनि नाम अत्थि, यानि नेव पुप्फिस्सन्ति मच्छकच्छपभक्खानेव भविस्सन्ति, तानि पाळिं नारुळ्हानि, आहरित्वा पन दीपेतब्बानीति अट्ठकथायं पकासितानि। यथेव हि तानि चतुब्बिधानि पुप्फानि, एवमेव उग्घटितञ्ञू विपञ्चितञ्ञू नेय्यो पदपरमोति चत्तारो पुग्गला।

तत्थ यस्स पुग्गलस्स सह उदाहटवेलाय धम्माभिसमयो होति, अयं ''चत्तारो सतिपट्ठाना''तिआदिना नयेन सङ्खित्तेन मातिकाय ठपियमानाय देसनानुसारेन ञाणं पेसेत्वा अरहत्तं गण्हितुं समत्थो पुग्गलो **उग्घटितञ्ञू**ति वुच्चति। यस्स पुग्गलस्स सङ्खित्तेन भासितस्स वित्थारेन अत्थे विभजियमाने धम्माभिसमयो होति, अयं वुच्चति पुग्गलो **विपञ्चितञ्ञू**। यस्स पुग्गलस्स उद्देसतो परिपुच्छतो योनिसो मनसिकरोतो कल्याणमित्ते सेवतो भजतो पयिरुपासतो अनुपुब्बेन धम्माभिसमयो होति, अयं वुच्चति पुग्गलो **नेय्यो**। यस्स पुग्गलस्स बहुम्पि सुणतो बहुम्पि भणतो बहुम्पि धारयतो बहुम्पि वाचयतो न ताय जातिया धम्माभिसमयो होति, तेन अत्तभावेन मग्गं वा फलं वा अन्तमसो झानं वा विपस्सनं वा निब्बत्तेतुं न सक्कोति, अयं वुच्चति पुग्गलो **पदपरमो**। तत्थ भगवा उप्पलवनादिसदिसं दससहस्सिलोकधातुं ओलोकेन्तो अज्ज पुप्फनकानि विय उग्घटितञ्ञू, स्वे पुप्फनकानि विय विपञ्चितञ्ञू, ततियदिवसे पुप्फनकानि विय नेय्ये, मच्छकच्छपभक्खपुप्फानि विय पदपरमे च अद्दस, पस्सन्तो च ''एत्तका अप्परजक्खा, एत्तका महारजक्खा, तत्रापि एत्तका उग्घटितञ्ञू''ति एवं सब्बाकारतोव अद्दस।

तत्थ तिण्णं पुग्गलानं इमस्मिञ्ञेव अत्तभावे भगवतो धम्मदेसना अत्थं साधेति। पदपरमानं अनागतत्थाय वासना होति। अथ भगवा इमेसं चतुन्नं पुग्गलानं अत्थावहं धम्मदेसनं विदित्वा देसेतुकम्यतं उप्पादेत्वा पुन सब्बेपि तीसु भवेसु सत्ते भब्बाभब्बवसेन द्वे कोट्ठासे अकासि। ये सन्धाय वुत्तं ''ये ते सत्ता कम्मावरणेन समन्नागता विपाकावरणेन समन्नागता किलेसावरणेन समन्नागता अस्सद्धा अच्छन्दिका दुप्पञ्ञा अभब्बा नियामं ओक्कमितुं कुसलेसु धम्मेसु

सम्मत्तं, इमे ते सत्ता अभब्बा। कतमे ते सत्ता भब्बा? ये ते सत्ता न कम्मावरणेन...पे०... इमे ते सत्ता भब्बा''ति (विभ० ८२६-८२७)। तत्थ सब्बेपि अभब्बपुग्गले पहाय भब्बपुग्गलेयेव ञाणेन परिग्गहेत्वा ''एत्तका रागचरिता, एत्तका दोस, मोह, वितक्क, सद्धा, बुद्धिचरिता''ति छ कोट्ठासे अकासि, एवं कत्वा धम्मं देसेस्सामीति चिन्तेसि। एत्थ च अप्परजक्खादिभब्बादिवसेन आवज्जेन्तस्स भगवतो ते सत्ता पुञ्जपुञ्जाव हुत्वा उपट्ठहन्ति, न एकेकाति दट्ठब्बं।

पच्चभासीति पतिअभासि। **अपारुता**ति विवटा। **अमतस्स द्वारा**ति अरियमग्गो। सो हि अमतसङ्खातस्स निब्बानस्स द्वारं, सो मया विवरित्वा ठपितो महाकरुणूपनिस्सयेन सयम्भूञाणेन अधिगतत्ताति दस्सेति। ''अपारुतं तेसं अमतस्स द्वार''न्ति केचि पठन्ति। **पमुञ्चन्तु सद्ध**न्ति सब्बे अत्तनो सद्धं मुञ्चन्तु विस्सज्जेन्तु पवेदेन्तु, मया देसिते धम्मे मयि च अत्तनो सद्दहनाकारं उट्ठापेन्तूति अत्थो। पच्छिमपदद्वये अयमत्थो – अहञ्हि अत्तनो पगुणं सुप्पवत्तितम्पि इमं पणीतं उत्तमं धम्मं कायवाचाकिलमथसञ्ञी हुत्वा न भासिं, न भासिस्सामीति चिन्तेसिं, इदानि पन सब्बो जनो सद्धाभाजनं उपनेतु, पूरेस्सामि नेसं सङ्कप्पन्ति। **अन्तरधायी**ति सत्थारं गन्धमालादीहि पूजेत्वा अन्तरहितो, सकट्ठानमेव गतोति अत्थो। सत्थुसन्तिकञ्हि उपगतानं देवानं ब्रह्मानञ्च तस्स पुरतो अन्तरधानं नाम सकट्ठानगमनमेव।

ब्रह्मयाचनकथावण्णना निट्ठिता।

पञ्चवग्गियकथावण्णना

१०. एतदहोसीति एतं अहोसि, ''कस्स नु खो अहं पठमं धम्मं देसेय्य''न्ति अयं धम्मदेसनापटिसंयुत्तो वितक्को उदपादीति अत्थो। **आळारो**ति तस्स नामं। दीघपिङ्गलो किरेस। सो हि तुङ्गसरीरताय दीघो, पिङ्गलचक्खुताय पिङ्गलो, तेनस्स ''आळारो''ति नामं अहोसि। **कालामो**ति गोत्तं। **पण्डितो**ति (म० नि० अट्ठ० १.२८४) पण्डिच्चेन समन्नागतो, समापत्तिपटिलाभसंसिद्धेन अधिगमबाहुसच्चसङ्खातेन पण्डितभावेन समन्नागतोति अत्थो। **ब्यत्तो**ति वेय्यत्तियेन समन्नागतो, समापत्तिपटिलाभपच्चयेन पारिहारिकपञ्ञासङ्खातेन ब्यत्तभावेन समन्नागतोति अत्थो। **मेधावी**ति ठानुप्पत्तिया पञ्ञाय समन्नागतो। अथ वा **मेधावी**ति तिहेतुकपटिसन्धिपञ्ञासङ्खाताय तंतंइतिकत्तब्बतापञ्ञासङ्खाताय च मेधाय समन्नागतोति एवमेत्थ अत्थो दट्ठब्बो। **अप्परजक्खजातिको**ति समापत्तिया विक्खम्भितत्ता निक्किलेसजातिको विसुद्धसत्तो। **आजानिस्सती**ति सल्लक्खेस्सति पटिविज्झिस्सति।

भगवतोपि खो ञाणं उदपादीति भगवतोपि सब्बञ्ञुतञ्ञाणं उप्पज्जि। भगवा किर देवताय कथितेनेव निट्ठं अगन्त्वा सयम्पि सब्बञ्ञुतञ्ञाणेन ओलोकेन्तो इतो सत्तमदिवसमत्थके कालं कत्वा आकिञ्चञ्ञायतने निब्बत्तोति अद्दस। तं सन्धायाह ''भगवतोपि खो ञाणं उदपादी''ति। **महाजानियो**ति सत्तदिवसब्भन्तरे पत्तब्बमग्गफलतो परिहीनत्ता महती जानि परिहानि अस्साति महाजानियो। अक्खणे निब्बत्तत्था इध धम्मदेसनट्ठानं आगमनपादापि नत्थि, अथाहं तत्थ गच्छेय्यं, गन्त्वा देसियमानं धम्मम्पिस्स सोतुं सोतपसादोपि नत्थि, एवं महाजानियो जातोति दस्सेति। किं पन भगवता तं अत्तनो बुद्धानुभावेन धम्मं ञापेतुं न सक्काति? आम न सक्का, न हि परतोघोसमन्तरेन सावकानं धम्माभिसमयो सम्भवति, अञ्ञथा इतरपच्चयरहितस्सपि धम्माभिसमयेन भवितब्बं, न च तं अत्थि। वुत्तञ्हेतं – ''द्वेमे, भिक्खवे, पच्चया सम्मादिट्ठिया उप्पादाय परतो च घोसो अज्झत्तञ्च योनिसोमनसिकारो''ति (अ० नि० २.१२७)।

उदकोति तस्स नामं, रामस्स पन पुत्तताय **रामपुत्तो। अभिदोसकालकतो**ति अड्ढरत्ते कालकतो। **भगवतोपि खो ञाणं उदपादी**ति इधापि किर भगवा देवताय कथितवचनेन सन्निट्ठानं अकत्वा सब्बञ्ञुतञ्ञाणेन ओलोकेन्तो ''हिय्यो

अट्ठरत्ते कालं कत्वा उदको रामपुत्तो नेवसञ्ञानासञ्ञायतने निब्बत्तो''ति अद्दस, तस्मा एवं वुत्तं। सेसं पुरिमसदिसमेव।

बहूपकाराति बहुउपकारा। **पधानपहितत्तं उपट्ठहिंसू**ति पधानत्थाय पेसितत्तभावं वसनट्ठाने परिवेणसम्मज्जनेन पत्तचीवरं गहेत्वा अनुबन्धनेन मुखोदकदन्तकट्ठदानादिना च उपट्ठहिंसु। के पनेते पञ्चवग्गिया नाम? ये ते –

रामो धजो लक्खणो चापि मन्ती।
कोण्डञ्ञो च भोजो सुयामो सुदत्तो।
एते तदा अट्ठ अहेसुं ब्राह्मणा।
छळङ्गवा मन्तं वियाकरिंसूति॥ (म॰ नि॰ अट्ठ॰ १.२८४; जा॰ अट्ठ॰ १.निदानकथा; अप॰ अट्ठ॰ १.अविदूरेनिदानकथा)।

बोधिसत्तस्स जातकाले सुपिनपटिग्गाहका चेव लक्खणपटिग्गाहका च अट्ठ ब्राह्मणा। तेसु तयो द्वेधा ब्याकरिंसु ''इमेहि लक्खणेहि समन्नागतो अगारं अज्झावसमानो राजा होहिति चक्कवत्ती, पब्बजमानो बुद्धो''ति। पञ्च ब्राह्मणा एकंसब्याकरणा अहेसुं ''इमेहि लक्खणेहि समन्नागतो अगारे न तिट्ठति, बुद्धोव होती''ति। तेसु पुरिमा तयो यथामन्तपदं गता। एते हि लक्खणमन्तसङ्खातवेदवचनानुरूपं पटिपन्ना द्वे गतियो भवन्ति अनञ्ञाति वुत्तनियामेन निच्छिनितुं असक्कोन्ता वुत्तमेव पटिपज्जिंसु, न महापुरिसस्स बुद्धभावप्पत्तिं पच्चासीसिंसु। इमे पन कोण्डञ्ञादयो पञ्च ''एकंसतो बुद्धो भविस्सती''ति जातनिच्छयत्ता मन्तपदं अतिक्कन्ता। ते अत्तना लद्धं तुट्ठिदानं ञातकानं विस्सज्जेत्वा ''अयं महापुरिसो अगारे न अज्झावसिस्सति, एकन्तेन बुद्धो भविस्सती''ति निब्बेमतिका बोधिसत्तं उद्दिस्स समणपब्बज्जं पब्बजिता, तेसं पुत्तातिपि वदन्ति, तं अट्ठकथायं पटिक्खित्तं। एते किर दहरकालेव बहू मन्ते जानिंसु, तस्मा ने ब्राह्मणा आचरियट्ठाने ठपयिंसु। ते ''पच्छा अम्हेहि पुत्तदारजटं छिन्दित्वा न सक्का भविस्सति पब्बजितु''न्ति दहरकालेयेव पब्बजित्वा रमणीयानि सेनासनानि परिभुञ्जन्ता विचरिंसु। कालेन कालं पन ''किं भो महापुरिसो महाभिनिक्खमनं निक्खन्तो''ति पुच्छन्ति। मनुस्सा ''कुहिं तुम्हे महापुरिसं पस्सिस्सथ, तीसु पासादेसु विविधनाटकमज्झे देवो विय सम्पत्तिं अनुभोती''ति वदन्ति। ते सुत्वा ''न ताव महापुरिसस्स ञाणं परिपाकं गच्छती''ति अप्पोस्सुक्का विहरिंसुयेव।

कस्मा पनेत्थ भगवा ''बहुकारा खो मे पञ्चवग्गिया''ति आह। किं उपकारकानंयेव एस धम्मं देसेति, अनुपकारकानं न देसेतीति? नो न देसेति। परिचयवसेन हेस आळारञ्चेव कालामं उदकञ्च रामपुत्तं ओलोकेसि। एतस्मिं पन बुद्धक्खेत्ते ठपेत्वा अञ्ञासिकोण्डञ्ञं अञ्ञो पठमं धम्मं सच्छिकातुं समत्थो नाम नत्थि। कस्मा? तथाविधउपनिस्सयत्ता। पुब्बे किर पुञ्ञकरणकाले द्वे भातरो अहेसुं। ते च एकतो सस्सं अकंसु। तत्थ जेट्ठस्स ''एकस्मिं सस्से नव वारे अग्गसस्सदानं मया दातब्ब''न्ति अहोसि। सो वप्पकाले बीजग्गं नाम दत्वा गब्भकाले कनिट्ठेन सद्धिं मन्तेसि ''गब्भकाले गब्भं फालेत्वा दस्सामी''ति। कनिट्ठो ''तरुणसस्सं नासेतुकामोसी''ति आह। जेट्ठो कनिट्ठस्स अननुवत्तनभावं ञत्वा खेत्तं विभजित्वा अत्तनो कोट्ठासतो गब्भं फालेत्वा खीरं नीहरित्वा सप्पिफाणितेन योजेत्वा अदासि, पुथुककाले पुथुकं कारेत्वा अदासि, लायने लायनग्गं, वेणिकरणे वेणग्गं, वेणियो पुरिसभारवसेन बन्धित्वा कलापकरणे कलापग्गं, खले कलापानं ठपनदिवसे खलग्गं, मद्दित्वा वीहीनं रासिकरणदिवसे खलभण्डग्गं, कोट्ठागारे धञ्ञस्स पक्खिपनदिवसे कोट्ठग्गन्ति एवं एकस्मिं सस्से नव वारे अग्गदानं अदासि। कनिट्ठो पन खलतो धञ्ञं उद्धरित्वा गहणदिवसे अदासि। तेसु जेट्ठो अञ्ञासिकोण्डञ्ञत्थेरो जातो, कनिट्ठो सुभद्दपरिब्बाजको। इति एकस्मिं सस्से नवन्नं अग्गदानानं दिन्नत्ता ठपेत्वा थेरं अञ्ञो पठमं धम्मं सच्छिकातुं

समत्थो नाम नत्थि। ''नवन्नं अग्गदानानं दिन्नत्ता''ति इदञ्च तस्स रत्तञ्ञूनं अग्गभावत्थाय कताभिनीहारानुरूपं पवत्तितसावकपारमिया चिण्णन्ते पवत्तितत्ता वुत्तं। तिण्णम्पि हि बोधिसत्तानं तंतंपारमिया सिखाप्पत्तकाले पवत्तितं पुञ्ञं अपुञ्ञं वा गरुतरविपाकमेव होति, धम्मस्स च सब्बपठमं सच्छिकिरियाय विना कथं रत्तञ्ञूनं अग्गभावसिद्धीति? ''बहुकारा खो मे पञ्चवग्गिया''ति इदं पन उपकारानुस्सरणमत्तकेनेव वुत्तं।

इसिपतने मिगदायेति तस्मिं किर पदेसे अनुप्पन्ने बुद्धे पच्चेकसम्बुद्धा गन्धमादनपब्बते सत्ताहं निरोधसमापत्तिया वीतिनामेत्वा निरोधा वुट्ठाय नागलतादन्तकट्ठं खादित्वा अनोतत्तदहे मुखं धोवित्वा पत्तचीवरमादाय आकासेन आगन्त्वा निपतन्ति। तत्थ चीवरं पारुपित्वा नगरे पिण्डाय चरित्वा कतभत्तकिच्चा गमनकालेपि ततोयेव उप्पतित्वा गच्छन्ति। इति इसयो एत्थ निपतन्ति उप्पतन्ति चाति तं ठानं ''इसिपतन''न्ति सङ्खं गतं, मिगानं पन अभयत्थाय दिन्नत्ता ''मिगदायो''ति वुच्चति। तेन वुत्तं ''इसिपतने मिगदाये''ति। अञ्ञे बुद्धा पठमं धम्मदेसनत्थाय गच्छन्ता आकासेन गन्त्वा तत्थेव ओतरन्ति, अम्हाकं पन भगवा उपकस्स आजीवकस्स उपनिस्सयं दिस्वा ''उपको इमं अद्धानं पटिपन्नो, सो मं दिस्वा सल्लपित्वा गमिस्सति, अथ पुन निब्बिन्नो आगम्म अरहत्तं सच्छिकरिस्सती''ति ञत्वा अट्ठारसयोजनं मग्गं पदसाव अगमासि। तेन वुत्तं ''येन बाराणसी, तेन चारिकं पक्कामी''ति।

११. अन्तरा च गयं अन्तरा च बोधिन्ति गयाय च बोधिस्स च विवरे तिगावुतन्तरे ठाने। बोधिमण्डतो हि गया तीणि गावुतानि, बाराणसी अट्ठारस योजनानि। उपको बोधिमण्डस्स च गयाय च अन्तरे भगवन्तं अद्दस। अन्तरा-सद्देन पन युत्तत्ता उपयोगवचनं कतं। ईदिसेसु च ठानेसु अक्खरचिन्तका ''अन्तरा गामञ्च नदिञ्च याती''ति एवं एकमेव अन्तरा-सद्दं पयुज्जन्ति, सो दुतियपदेनपि योजेतब्बो होति, अयोजियमाने उपयोगवचनं न पापुणाति सामिवचनस्स पसङ्गे अन्तरा-सद्दयोगेन उपयोगवचनस्स इच्छितत्ता। इध पन योजेत्वा एव वुत्तो। **अद्धानमग्ग**न्ति अद्धानसङ्खातं मग्गं, दीघमग्गन्ति अत्थो। अद्धानगमनसमयस्स विभङ्गे ''अद्धयोजनं गच्छिस्सामीति भुञ्जितब्ब''न्तिआदिवचनतो (पाचि० २१८) अद्धयोजनम्पि अद्धानमग्गो होति। बोधिमण्डतो पन गया तिगावुतं। **विप्पसन्नानी**ति सुट्ठु पसन्नानि। **इन्द्रियानी**ति मनच्छट्ठानि इन्द्रियानि। **परिसुद्धो**ति निद्दोसो। **परियोदातो**ति तस्सेव वेवचनं। निरुपक्किलेसतायेव हि एस ''परियोदातो''ति वुत्तो, न सेतभावेन। एतस्स परियोदाततं दिस्वाव इन्द्रियानं विप्पसन्नतं अञ्ञासि, नयग्गाहीपञ्ञा किरेसा तस्स आजीवकस्स।

सब्बाभिभूति सब्बं तेभूमकधम्मं अभिभवित्वा ठितो। **सब्बविदू**ति सब्बं चतुभूमकधम्मं अवेदिं अञ्ञासिं सब्बसो ञेय्यावरणस्स पहीनत्ता। **सब्बेसु धम्मेसु अनूपलित्तो**ति सब्बेसु तेभूमकधम्मेसु रज्जनदुस्सनमुय्हनादिना किलेसलेपेन अलित्तो। **सब्बञ्जहो**ति सब्बं तेभूमकधम्मं जहित्वा ठितो। अप्पहातब्बम्पि हि कुसलाब्याकतं तप्पटिबद्धकिलेसप्पहानेन पहीनत्ता न होतीति जहितमेव होति। **तण्हक्खये विमुत्तो**ति तण्हक्खये निब्बाने आरम्मणकरणवसेन विमुत्तो। **सयं अभिञ्ञाया**ति सब्बं चतुभूमकधम्मं अत्तनाव जानित्वा। **कमुद्दिसेय्य**न्ति कं अञ्ञं ''अयं मे आचरियो''ति उद्दिसेय्यं।

न मे आचरियो अत्थीति लोकुत्तरधम्मे मय्हं आचरियो नाम नत्थि। किञ्चापि हि लोकियधम्मानम्पि यादिसो लोकनाथस्स अधिगमो, न तादिसो अधिगमो परूपदेसो अत्थि, लोकुत्तरधम्मे पनस्स लेसोपि नत्थि। **नत्थि मे पटिपुग्गलो**ति मय्हं सीलादीहि गुणेहि पटिनिधिभूतो पुग्गलो नाम नत्थि। **सम्मासम्बुद्धो**ति हेतुना नयेन चत्तारि सच्चानि सयं बुद्धो। **सीतिभूतो**ति सब्बकिलेसग्गिनिब्बापनेन सीतिभूतो, किलेसानं येव निब्बुतत्ता **निब्बुतो**।

कासिनं पुरन्ति कासिरट्ठे नगरं। **आहञ्छ**न्ति आहनिस्सामि। **अमतदुन्दुभि**न्ति वेनेय्यानं अमताधिगमाय उग्घोसनादिं

कत्वा सत्थु धम्मदेसना ''अमतदुन्दुभी''ति वुत्ता, धम्मचक्कपटिलाभाय तं अमतभेरिं पहरिस्सामीति गच्छामीति वुत्तं होति।

अरहसि अनन्तजिनोति अनन्तजिनोपि भवितुं युत्तोति अत्थो। अनन्तञाणो जितकिलेसोति **अनन्तजिनो। हुपेय्यपावुसो**ति आवुसो एवम्पि नाम भवेय्य, एवंविधे नाम रूपरतने ईदिसेन ञाणेन भवितब्बन्ति अधिप्पायो। अयञ्हिस्स पब्बज्जाय पच्चयो जातो। कताधिकारो हेस। तथा हि भगवा तेन समागमनत्थं पदसाव तं मग्गं पटिपज्जि। **पक्कामी**ति वङ्कहारजनपदं नाम अगमासि।

तत्थेकं मिगलुद्दकगामकं निस्साय वासं कप्पेसि, जेट्ठकलुद्दको तं उपट्ठासि। तस्मिञ्च जनपदे चण्डा मक्खिका होन्ति। अथ नं एकाय चाटिया वसापेसुं। मिगलुद्दको दूरं मिगवं गच्छन्तो ''अम्हाकं अरहन्ते मा पमज्जी''ति चापं नाम धीतरं आणापेत्वा अगमासि सद्धिं पुत्तभातुकेहि। सा चस्स धीता दस्सनीया होति कोट्ठाससम्पन्ना। दुतियदिवसे उपको घरं आगतो तं दारिकं सब्बं उपचारं कत्वा परिविसितुं उपगतं दिस्वा रागेन अभिभूतो भुञ्जितुम्पि असक्कोन्तो भाजनेन भत्तं आदाय वसनट्ठानं गन्त्वा भत्तं एकमन्तं निक्खिपित्वा ''सचे चापं लभामि, जीवामि। नो चे, मरामी''ति निराहारो सयि। सत्तमे दिवसे मागविको आगन्त्वा धीतरं उपकस्स पवत्तिं पुच्छि। सा ''एकदिवसमेव आगन्त्वा पुन नागतपुब्बो''ति आह।

मागविको आगतवेसेनेव नं उपसङ्कमित्वा पुच्छिस्सामीति तङ्खणंयेव गन्त्वा ''किं, भन्ते, अफासुक''न्ति पादे परामसन्तो पुच्छि। उपको नित्थुनन्तो परिवत्ततियेव। सो ''वद भन्ते, यं मया सक्का कातुं, सब्बं करिस्सामी''ति आह। उपको ''सचे चापं लभामि, जीवामि, नो चे, मय्हमेव मरणं सेय्यो''ति आह। जानासि किर, भन्ते, किञ्चि सिप्पन्ति? न जानामीति। न, भन्ते, किञ्चि सिप्पं अजानन्तेन सक्का घरावासं अधिट्ठातुन्ति। सो आह ''नाहं किञ्चि सिप्पं जानामि, अपिच तुम्हाकं मंसहारको भविस्सामि, मंसञ्च विक्किणिस्सामी''ति। मागविको ''अम्हाकम्पि एतदेव रुच्चती''ति उत्तरसाटकं दत्वा घरं आनेत्वा धीतरं अदासि। तेसं संवासमन्वाय पुत्तो विजायि, ''सुभद्दो''तिस्स नामं अकंसु। चापा तस्स रोदनकाले ''मंसहारकस्स पुत्त मिगलुद्दकस्स पुत्त मा रोदि मा रोदी''तिआदीनि वदमाना पुत्ततोसनगीतेन उपकं उप्पण्डेसि। ''भद्दे त्वं मं अनाथोति मञ्ञसि, अत्थि मे अनन्तजिनो नाम सहायो, तस्साहं सन्तिकं गमिस्सामी''ति आह। चापा ''एवमयं अट्टीयती''ति ञत्वा पुनप्पुनं कथेसि। सो एकदिवसं अनारोचेत्वाव मज्झिमदेसाभिमुखो पक्कामि।

भगवा च तेन समयेन सावत्थियं विहरति जेतवने, अथ खो भगवा पटिकच्चेव भिक्खू आणापेसि ''यो, भिक्खवे, अनन्तजिनोति पुच्छमानो आगच्छति, तस्स मं दस्सेय्याथा''ति। उपकोपि खो ''कुहिं अनन्तजिनो वसती''ति पुच्छन्तो अनुपुब्बेन सावत्थिं आगन्त्वा विहारमज्झे ठत्वा ''कुहिं अनन्तजिनो''ति पुच्छि। तं भिक्खू भगवतो सन्तिकं नयिंसु। सो च भगवन्तं दिस्वा ''सञ्जानाथ मं भगवा''ति आह। आम उपक सञ्जानामि, कुहिं पन त्वं वसित्थाति। वङ्कहारजनपदे, भन्तेति। उपक महल्लकोसि जातो, पब्बजितुं सक्खिस्ससीति। पब्बजिस्सामि, भन्तेति। भगवा पब्बाजेत्वा तस्स कम्मट्ठानं अदासि। सो कम्मट्ठाने कम्मं करोन्तो अनागामिफले पतिट्ठाय कालं कत्वा अविहेसु निब्बत्तो, निब्बत्तिक्खणेयेव च अरहत्तं पापुणि। अविहे निब्बत्तमत्ता हि सत्त जना अरहत्तं पापुणिंसु, तेसं सो अञ्ञतरो। वुत्तञ्हेतं –

''अविहं उपपन्नासे, विमुत्ता सत्त भिक्खवो।
रागदोसपरिक्खीणा, तिण्णा लोके विसत्तिकं॥

''उपको पलगण्डो च, पुक्कुसाति च ते तयो।

भद्दियो खण्डदेवो च, बाहुरग्गि च सिङ्गियो।
ते हित्वा मानुसं देहं, दिब्बयोगं उपच्चगु''न्ति॥ (सं० नि० १.५०, १०५)।

१२. **सण्ठपेसु**न्ति ''नेव अभिवादेतब्बो''तिआदिना कतिकं अकंसु। **बाहुल्लिको**ति चीवरबाहुल्लादीनं अत्थाय पटिपन्नो। **पधानविब्भन्तो**ति पधानतो पुब्बे अनुट्ठितदुक्करचरणतो विब्भन्तो भट्ठो परिहीनो। **आवत्तो बाहुल्लाया**ति चीवरादिबहुभावत्थाय आवत्तो। **अपिच खो आसनं ठपेतब्ब**न्ति अपिच खो पनस्स उच्चकुले निब्बत्तस्स आसनमत्तं ठपेतब्बन्ति वदिंसु। **असण्ठहन्ता**ति बुद्धानुभावेन बुद्धतेजेन अभिभूता अत्तनो कतिकाय ठातुं असक्कोन्ता। **नामेन च आवुसोवादेन च समुदाचरन्ती**ति ''गोतमा''ति च ''आवुसो''ति च वदन्ति, ''आवुसो गोतम, मयं उरुवेलायं पधानकाले तुय्हं पत्तचीवरं गहेत्वा विचरिम्ह, मुखोदकं दन्तकट्ठं अदम्ह, वुत्थपरिवेणं सम्मज्जिम्ह, पच्छा ते को वत्तपटिपत्तिं अकासि, कच्चि अम्हेसु पक्कन्तेसु न चिन्तयित्था''ति एवरूपं कथं कथेन्तीति अत्थो।

न चिरस्सेवाति अचिरेनेव। **कुलपुत्ता**ति दुविधा कुलपुत्ता जातिकुलपुत्ता आचारकुलपुत्ता च, एते पन उभयथापि कुलपुत्तायेव। **अगारस्मा**ति घरा। अगाराय हितं अगारियं, कसिगोरक्खादि कुटुम्बपोसनकम्मं वुच्चति। नत्थि एत्थ अगारियन्ति **अनगारियं**। पब्बज्जायेतं अधिवचनं। **पब्बजन्ती**ति उपगच्छन्ति उपसङ्कमन्ति। **तदनुत्तर**न्ति तं अनुत्तरं। **ब्रह्मचरियपरियोसान**न्ति मग्गब्रह्मचरियस्स परियोसानं, अरहत्तफलन्ति वुत्तं होति। तस्स हि अत्थाय कुलपुत्ता पब्बजन्ति। **दिट्ठेव धम्मे**ति तस्मिंयेव अत्तभावे। **सयं अभिञ्ञा सच्छिकत्वा**ति अत्तनोयेव पञ्ञाय पच्चक्खं कत्वा, अपरप्पच्चयं कत्वाति अत्थो। **उपसम्पज्ज विहरिस्सथा**ति पापुणित्वा सम्पादेत्वा विहरिस्सथ।

इरियायाति दुक्करइरियाय। **पटिपदाया**ति दुक्करपटिपत्तिया। **दुक्करकारिकाया**ति पसतपसतमुग्गयूसादिआहरणादिना दुक्करकरणेन। **उत्तरि मनुस्सधम्मा**ति मनुस्सधम्मतो उपरि। अलं अरियं कातुन्ति अलमरियो, अरियभावाय समत्थोति वुत्तं होति, ञाणदस्सनमेव ञाणदस्सनविसेसो, अलमरियो च सो ञाणदस्सनविसेसो चाति **अलमरियञाणदस्सनविसेसो। ञाणदस्सन**न्ति च दिब्बचक्खुपि विपस्सनापि मग्गोपि फलम्पि पच्चवेक्खणञाणम्पि सब्बञ्ञुतञ्ञाणम्पि वुच्चति। ''अप्पमत्तो समानो ञाणदस्सनं आराधेती''ति (म० नि० १.३११) हि एत्थ दिब्बचक्खु ञाणदस्सनं नाम। ''ञाणदस्सनाय चित्तं अभिनीहरति अभिनिन्नामेती''ति (दी० नि० १.२३५) एत्थ विपस्सनाञाणं। ''अभब्बा ते ञाणदस्सनाय अनुत्तराय सम्बोधाया''ति (अ० नि० ४.१९६) एत्थ मग्गो। ''अयमञ्ञो उत्तरिमनुस्सधम्मा अलमरियञाणदस्सनविसेसो अधिगतो फासुविहारो''ति (म० नि० १.३२८) एत्थ फलं। ''ञाणञ्च पन मे दस्सनं उदपादि 'अकुप्पा मे चेतोविमुत्ति, अयमन्तिमा जाति, नत्थि दानि पुनब्भवो'''ति (सं० नि० ५.१०८१; महाव० १६) एत्थ पच्चवेक्खणञाणं। ''ञाणञ्च पन मे दस्सनं उदपादि 'सत्ताहकालकतो आळारो कालामो'''ति (म० नि० १.२८४; २.३४०; महाव० १०) एत्थ सब्बञ्ञुतञ्ञाणं। इध पन सब्बञ्ञुतञ्ञाणपदट्ठानो अरियमग्गो सब्बञ्ञुतञ्ञाणमेव वा अधिप्पेतं।

अभिजानाथ मे नोति अभिजानाथ नु मे। **एवरूपं पभावितमेत**न्ति एत्थ एवरूपं वाक्यभेदन्ति अत्थो, अपि नु अहं उरुवेलायं पधाने तुम्हाकं सङ्गण्हनत्थं अनुक्कण्ठनत्थं रत्तिं वा दिवा वा आगन्त्वा ''आवुसो, मयं यत्थ कत्थचि गमिस्सामाति मा वितक्कयित्थ, मय्हं ओभासो वा कम्मट्ठाननिमित्तं वा पञ्ञायती''ति एवरूपं कञ्चि वचनभेदं अकासिन्ति अधिप्पायो। ते एकपदेनेव सतिं लभित्वा उप्पन्नगारवा ''अद्धा एस बुद्धो जातो''ति सद्दहित्वा ''नो हेतं भन्ते''ति आहंसु। **असक्खि खो भगवा पञ्चवग्गिये भिक्खू सञ्ञापेतु**न्ति भगवा पञ्चवग्गिये भिक्खू ''बुद्धो अह''न्ति

जानापेतुं असक्खि। **अञ्ञा चित्तं उपट्ठापेसु**न्ति अञ्ञाय अरहत्तप्पत्तिया चित्तं उपट्ठपेसुं अभिनीहरिंसु।

धम्मचक्कप्पवत्तनसुत्तवण्णना

१३. द्वेमे, भिक्खवे, अन्ताति द्वे इमे, भिक्खवे, कोट्ठासा, द्वे भागाति अत्थो। भागवचनो हेत्थ अन्त-सद्दो ''पुब्बन्ते ञाणं अपरन्ते ञाण''न्तिआदीसु (ध० स० १०६३) विय। इमस्स पन पदस्स उच्चारणसमकालं पवत्तनिग्घोसो बुद्धानुभावेन हेट्ठा अवीचिं उपरि भवग्गं पत्वा दससहस्सिलोकधातुं फरित्वा अट्ठासि। तस्मिंयेव समये परिपक्ककुसलमूला सच्चाभिसम्बोधाय कताधिकारा अट्ठारसकोटिसङ्खा ब्रह्मानो समागच्छिंसु। पच्छिमदिसाय सूरियो अत्थमेति, पाचीनदिसाय आसाळ्हनक्खत्तेन युत्तो पुण्णचन्दो उग्गच्छति। तस्मिं समये भगवा धम्मचक्कप्पवत्तनसुत्तं आरभन्तो ''द्वेमे, भिक्खवे, अन्ता''तिआदिमाह।

तत्थ **पब्बजितेना**ति गिहिबन्धनं छेत्वा पब्बज्जुपगतेन। **न सेवितब्बा**ति न वळञ्जेतब्बा नानुयुञ्जितब्बा। **यो चायं कामेसु कामसुखल्लिकानुयोगो**ति यो च अयं वत्थुकामेसु किलेसकामसुखस्स अनुयोगो, किलेसकामसंयुत्तस्स सुखस्स अनुगतोति अत्थो। **हीनो**ति लामको। **गम्मो**ति गामवासीनं सन्तको तेहि सेवितब्बताय। **पोथुज्जनिको**ति पुथुज्जनेन अन्धबालजनेन आचिण्णो। **अनरियो**ति न अरियो न विसुद्धो न उत्तमो, न वा अरियानं सन्तको। **अनत्थसंहितो**ति न अत्थसंहितो, हितसुखावहकारणं अनिस्सितोति अत्थो। **अत्तकिलमथानुयोगो**ति अत्तनो किलमथस्स अनुयोगो, दुक्खकरणं दुक्खुप्पादनन्ति अत्थो। **दुक्खो**ति कण्टकापस्सयसेय्यादीहि अत्तबाधनेहि दुक्खावहो। **मज्झिमा पटिपदा**ति अरियमग्गं सन्धाय वुत्तं। मग्गो हि कामसुखल्लिकानुयोगो एको अन्तो, अत्तकिलमथानुयोगो एको अन्तो, एते द्वे अन्ते न उपेति न उपगच्छति, विमुत्तो एतेहि अन्तेहि, तस्मा ''मज्झिमा पटिपदा''ति वुच्चति। एतेसं मज्झे भवत्ता **मज्झिमा,** वट्टदुक्खनिस्सरणत्थिकेहि पटिपज्जितब्बतो च **पटिपदा**ति, तथा लोभो एको अन्तो, दोसो एको अन्तो। सस्सतं एकं अन्तं, उच्छेदो एको अन्तोति पुरिमनयेनेव वित्थारेतब्बं।

चक्खुकरणीतिआदीहि तमेव पटिपदं थोमेति। पञ्ञाचक्खुं करोतीति चक्खुकरणी। सा हि चतुन्नं सच्चानं दस्सनाय संवत्तति परिञ्ञाभिसमयादिभेदस्स दस्सनस्स पवत्तनट्ठेनाति ''चक्खुकरणी''ति वुच्चति। तयिदं सतिपि पटिपदाय अनञ्ञत्ते अवयववसेन सिज्झमानो अत्थो समुदायेन कतो नाम होतीति उपचारवसेन वुत्तन्ति दट्ठब्बं। दुतियपदं तस्सेव वेवचनं। **उपसमाया**ति किलेसुपसमत्थाय। **अभिञ्ञाया**ति चतुन्नं सच्चानं अभिजाननत्थाय। **सम्बोधाया**ति तेसंयेव सम्बुज्झनत्थाय। **निब्बानाया**ति निब्बानसच्छिकिरियाय। अथ वा **निब्बानाया**ति अनुपादिसेसनिब्बानाय। ''उपसमाया''ति हि इमिना सउपादिसेसनिब्बानं गहितं।

इदानि तं मज्झिमप्पटिपदं सरूपतो दस्सेतुकामो ''कतमा च सा''ति पुच्छित्वा ''अयमेवा''तिआदिना नयेन विस्सज्जेसि। तत्थ **अयमेवा**ति अवधारणवचनं अञ्ञस्स निब्बानगामिमग्गस्स अत्थिभावपटिसेधनत्थं। सत्तापटिक्खेपो हि इध पटिसेधनं अलब्भमानत्ता अञ्ञस्स मग्गस्स। **अरियो**ति किलेसानं आरकत्ता अरियो निरुत्तिनयेन। अरिपहानाय संवत्ततीतिपि **अरियो** अरयो पापधम्मा यन्ति अपगच्छन्ति एतेनाति कत्वा। अरियेन भगवता देसितत्ता अरियस्स अयन्तिपि **अरियो,** अरियभावप्पटिलाभाय संवत्ततीतिपि **अरियो**। एत्थ पन अरियकरो अरियोतिपि उत्तरपदलोपेन अरिय-सद्दसिद्धि वेदितब्बा। अट्ठहि अङ्गेहि उपेतत्ता **अट्ठङ्गिको**। मग्गङ्गसमुदाये हि मग्गवोहारो, समुदायो च समुदायीहि समन्नागतो नाम होति। अयं पनेत्थ वचनत्थो – अत्तनो अवयवभूतानि अट्ठङ्गानि एतस्स सन्तीति अट्ठङ्गिकोति। परमत्थतो पन अङ्गानियेव मग्गो पञ्चङ्गिकतूरियादीनि विय, न च अङ्गविनिमुत्तो छळङ्गो वेदो विय। किलेसे मारेन्तो गच्छतीति **मग्गो** निरुत्तिनयेन,

निब्बानं मग्गति गवेसतीति वा **मग्गो**। अरियमग्गो हि निब्बानं आरम्मणं करोन्तो गवेसन्तो विय होति। निब्बानत्थिकेहि मग्गीयतीति वा **मग्गो** विवट्टूपनिस्सयपुञ्ञकरणतो पट्ठाय तदत्थपटिपत्तितो। गम्मति वा तेहि पटिपज्जीयतीति **मग्गो**। एत्थ पन आदिअन्तविपरियायेन सद्दसिद्धि वेदितब्बा।

सेय्यथिदन्ति निपातो, तस्स कतमो सो इति चेति अत्थो, कतमानि वा तानि अट्ठङ्गानीति। सब्बलिङ्गविभत्तिवचनसाधारणो हि अयं निपातो। एकमेकम्पि अङ्गं मग्गोयेव। यथाह ''सम्मादिट्ठि मग्गो चेव हेतु चा''ति (ध॰ स॰ १०३९)। पोराणापि भणन्ति ''दस्सनमग्गो सम्मादिट्ठि, अभिनिरोपनमग्गो सम्मासङ्कप्पो...पे॰... अविक्खेपमग्गो सम्मासमाधी''ति। ननु च अङ्गानि समुदितानि मग्गो अन्तमसो सत्तङ्गविकलस्स अरियमग्गस्स अभावतोति? सच्चमेतं सच्चसम्पटिवेधे, मग्गप्पच्चयताय पन यथासकं किच्चकरणेन पच्चेकम्पि तानि मग्गोयेव, अञ्ञथा समुदितानम्पि तेसं मग्गकिच्चं न सम्भवेय्याति। सम्मादिट्ठिआदीसु सम्मा पस्सतीति **सम्मादिट्ठि,** सम्मा सङ्कप्पेति सम्पयुत्तधम्मे निब्बानसङ्खाते आरम्मणे अभिनिरोपेतीति **सम्मासङ्कप्पो,** सम्मा वदति एतायाति **सम्मावाचा,** सम्मा करोति एतेनाति सम्माकम्मं, तदेव **सम्माकम्मन्तो,** सम्मा आजीवति एतेनाति **सम्माआजीवो,** सम्मा वायमति उस्सहतीति **सम्मावायामो,** सम्मा सरति अनुस्सरतीति **सम्मासति,** सम्मा समाधियति चित्तं एतेनाति **सम्मासमाधी**ति एवं निब्बचनं वेदितब्बं। इदानि **अयं खो सा भिक्खवे**ति तमेव पटिपदं निगमेन्तो आह। तस्सत्थो – य्वायं चत्तारोपि लोकुत्तरमग्गे एकतो कत्वा कथितो अट्ठङ्गिको मग्गो, अयं खो सा भिक्खवे...पे॰... निब्बानाय संवत्ततीति।

१४. एवं मज्झिमपटिपदं सरूपतो दस्सेत्वा इदानि चत्तारि अरियसच्चानि दस्सेतुं **''इदं खो पन, भिक्खवे''**तिआदिमाह। तत्थ (विसुद्धि॰ २.५३०) **दुक्ख**न्ति एत्थ **दु**-इति अयं सद्दो कुच्छिते दिस्सति। कुच्छितञ्हि पुत्तं ''दुपुत्तो''ति वदन्ति, **खं**-सद्दो पन तुच्छे। तुच्छञ्हि आकासं ''ख''न्ति वुच्चति। इदञ्च पठमसच्चं कुच्छितं अनेकउपद्दवाधिट्ठानतो, तुच्छं बालजनपरिकप्पितधुवसुभसुखत्तभावविरहिततो, तस्मा कुच्छितत्ता तुच्छत्ता च ''दुक्ख''न्ति वुच्चति। यस्मा पनेतं बुद्धादयो अरिया पटिविज्झन्ति, तस्मा **''अरियसच्च''**न्ति वुच्चति। अरियपटिविज्झितब्बञ्हि सच्चं पुरिमपदे उत्तरपदलोपेन **''अरियसच्च''**न्ति वुत्तं। अरियस्स तथागतस्स सच्चन्तिपि अरियसच्चं। तथागतेन हि सयं अधिगतत्ता पवेदितत्ता ततो एव च अञ्ञेहि अधिगमनीयत्ता तं तस्स होतीति। अथ वा एतस्स अभिसम्बुद्धत्ता अरियभावसिद्धितो अरियसाधकं सच्चन्तिपि **अरियसच्चं** पुब्बे विय उत्तरपदलोपेन। अवितथभावेन वा अरणीयत्ता अधिगन्तब्बत्ता अरियं सच्चन्तिपि **अरियसच्चं**। सच्चत्थं पन चतुन्नम्पि सच्चानं परतो एकज्झं दस्सयिस्साम।

इदानि तं दुक्खं अरियसच्चं सरूपतो दस्सेतुं **''जातिपि दुक्खा''**तिआदिमाह। तत्रायं **जाति**-सद्दो अनेकत्थो। तथा हेस ''एकम्पि जातिं द्वेपि जातियो''ति (दी॰ नि॰ १.३१; म॰ नि॰ १.१४८) एत्थ भवे आगतो। ''अत्थि, विसाखे, निगण्ठा नाम समणजाती''ति (अ॰ नि॰ ३.७१) एत्थ निकाये। ''जाति द्वीहि खन्धेहि सङ्गहिता''ति (धातु॰ ७१) एत्थ सङ्खतलक्खणे। ''यं मातुकुच्छिस्मिं पठमं चित्तं उप्पन्नं पठमं विञ्ञाणं पातुभूतं, तदुपादाय सावस्स जाती''ति (महाव॰ १२४) एत्थ पटिसन्धियं। ''सम्पतिजातो, आनन्द, बोधिसत्तो''ति (दी॰ नि॰ २.३१; म॰ नि॰ ३.२०७) एत्थ पसूतियं। ''अक्खित्तो अनुपकुट्ठो जातिवादेना''ति (दी॰ नि॰ १.३०३) एत्थ कुले। स्वायमिध गब्भसेय्यकानं पटिसन्धितो पट्ठाय याव मातुकुच्छिम्हा निक्खमनं, ताव पवत्तेसु खन्धेसु, इतरेसं पटिसन्धिक्खणेस्वेवाति दट्ठब्बो। अयम्पि च परियायकथाव, निप्परियायतो पन तत्थ तत्थ निब्बत्तमानानं सत्तानं ये खन्धा पातुभवन्ति, तेसं पठमपातुभावो जाति नाम।

कस्मा पनेसा दुक्खाति चे? अनेकेसं दुक्खानं वत्थुभावतो। अनेकानि हि दुक्खानि। सेय्यथिदं – दुक्खदुक्खं

विपरिणामदुक्खं सङ्खारदुक्खं पटिच्छन्नदुक्खं अप्पटिच्छन्नदुक्खं परियायदुक्खं निप्परियायदुक्खन्ति। तत्थ कायिकचेतसिका दुक्खा वेदना सभावतो च नामतो च दुक्खत्ता **दुक्खदुक्ख**न्ति वुच्चति। सुखा वेदना विपरिणामदुक्खुप्पत्तिहेतुतो **विपरिणामदुक्खं**। उपेक्खा वेदना चेव सेसा च तेभूमका सङ्खारा उदयब्बयपीळितत्ता **सङ्खारदुक्खं**। कण्णसूलदन्तसूलरागजपरिळाहदोसजपरिळाहादिकायिकचेतसिका आबाधा पुच्छित्वा जानितब्बतो उपक्कमस्स च अपाकटभावतो **पटिच्छन्नदुक्खं**। द्वत्तिंसकम्मकारणादिसमुट्ठानो आबाधो अपुच्छित्वाव जानितब्बतो उपक्कमस्स च पाकटभावतो **अप्पटिच्छन्नदुक्खं**। ठपेत्वा दुक्खदुक्खं सेसदुक्खं सच्चविभङ्गे आगतं जातिआदि सब्बम्पि तस्स तस्स दुक्खस्स वत्थुभावतो **परियायदुक्खं**। दुक्खदुक्खं पन **निप्परियायदुक्ख**न्ति वुच्चति। तत्रायं जाति यं तं **बालपण्डितसुत्ता**दीसु (म॰ नि॰ ३.२४६ आदयो) भगवतापि उपमावसेन पकासितं आपायिकं दुक्खं, यञ्च सुगतियम्पि मनुस्सलोके गब्भोक्कन्तिमूलकादिभेदं दुक्खं उप्पज्जति, तस्स वत्थुभावतो दुक्खा। तेनाहु पोराणा –

''जायेथ नो चे नरकेसु सत्तो।
तत्थग्गिदाहादिकमप्पसय्हं।
लभेथ दुक्खं न कुहिं पतिट्ठं।
इच्चाह दुक्खाति मुनीध जातिं॥

''दुक्खं तिरच्छेसु कसापतोद-
दण्डाभिघातादिभवं अनेकं।
यं तं कथं तत्थ भवेय्य जातिं।
विना तहिं जाति ततोपि दुक्खा॥

''पेतेसु दुक्खं पन खुप्पिपासा-
वातातपादिप्पभवं विचित्तं।
यस्मा अजातस्स न तत्थ अत्थि।
तस्मापि दुक्खं मुनि जातिमाह॥

''तिब्बन्धकारे च असय्ह सीते।
लोकन्तरे यं असुरेसु दुक्खं।
न तं भवे तत्थ न चस्स जाति।
यतो अयं जाति ततोपि दुक्खा॥

''यञ्चापि गूथनरके विय मातु गब्भे।
सत्तो वसं चिरमतो बहि निक्खमञ्च।
पप्पोति दुक्खमतिघोरमिदम्पि नत्थि।
जातिं विना इतिपि जाति अयञ्हि दुक्खा॥

''किं भासितेन बहुना ननु यं कुहिञ्चि।
अत्थीध किञ्चिदपि दुक्खमिदं कदाचि।

नेवत्थि जातिविरहेन यतो महेसि।
दुक्खाति सब्बपठमं इममाह जाति''न्ति॥ (विसुद्धि० २.५४१; विभ० अट्ठ० १९१; महानि० अट्ठ० ५; पटि० म० अट्ठ० १.१.३२-३३)।

जरापि दुक्खाति एत्थ पन दुविधा जरा सङ्खतलक्खणञ्च खण्डिच्चादिसम्मतो सन्ततियं एकभवपरियापन्नक्खन्धपुराणभावो च, सा इध अधिप्पेता। सा पनेसा जरा सङ्खारदुक्खभावतो चेव दुक्खवत्थुतो च दुक्खा। यञ्हि अङ्गपच्चङ्गसिथिलभावइन्द्रियविकारविरूपतायोब्बनविनासवीरियाविसादसतिमतिविप्पवासपरपरिभवादिअनेकपच्चयं कायिकचेतसिकं दुक्खमुप्पज्जति, जरा तस्स वत्थु। तेनाहु पोराणा –

''अङ्गानं सिथिलीभावा, इन्द्रियानं विकारतो।
योब्बनस्स विनासेन, बलस्स उपघाततो॥

''विप्पवासा सतादीनं, पुत्तदारेहि अत्तनो।
अप्पसादनीयतो चेव, भिय्यो बालत्तपत्तिया॥

''पप्पोति दुक्खं यं मच्चो, कायिकं मानसं तथा।
सब्बमेतं जराहेतु, यस्मा तस्मा जरा दुखा''ति॥ (विसुद्धि० २.५४२; विभ० अट्ठ० १९२; महानि० अट्ठ० ५; पटि० म० अट्ठ० १.१.३२-३३)।

ब्याधिपि दुक्खोति इदं पदं विभङ्गे दुक्खसच्चनिद्देसपाळियं न आगतं, तेनेव **विसुद्धिमग्गेपि** दुक्खसच्चनिद्देसे तं न उद्धटं, **धम्मचक्कपवत्तन**सुत्तन्तपाळियंयेव पन उपलब्भति, तस्मा तत्थेविमस्स वचने अञ्ञत्थ च अवचने कारणं वीमंसितब्बं।

मरणम्पि दुक्खन्ति एत्थापि दुविधं मरणं सङ्खतलक्खणञ्च। यं सन्धाय वुत्तं ''जरामरणं द्वीहि खन्धेहि सङ्गहित''न्ति (धातु० ७१)। एकभवपरियापन्नजीवितिन्द्रियप्पबन्धविच्छेदो च। यं सन्धाय वुत्तं ''निच्चं मरणतो भय''न्ति (सु० नि० ५८१; जा० १.११.८८), तं इध अधिप्पेतं। जातिपच्चयमरणं उपक्कममरणं सरसमरणं आयुक्खयमरणं पुञ्ञक्खयमरणन्तिपि तस्सेव नामं। तयिदं दुक्खस्स वत्थुभावतो दुक्खन्ति वेदितब्बं। तेनाहु पोराणा –

''पापस्स पापकम्मादि-निमित्तमनुपस्सतो।
भद्दस्सापसहन्तस्स, वियोगं पियवत्थुकं।
मीयमानस्स यं दुक्खं, मानसं अविसेसतो॥

''सब्बेसञ्चापि यं सन्धि-बन्धनच्छेदनादिकं।
वितुज्जमानमम्मानं, होति दुक्खं सरीरजं॥

''असय्हमप्पटिकारं, दुक्खस्सेतस्सिदं यतो।
मरणं वत्थु तेनेतं, दुक्खमिच्चेव भासित''न्ति॥ (विसुद्धि० २.५४३; विभ० अट्ठ० १९३; महानि० अट्ठ० ५;

पटि० म० अट्ठ० १.१.३२-३३)।

इमस्मिञ्च ठाने ''सोकपरिदेवदुक्खदोमनस्सुपायासापि दुक्खा''ति विभङ्गे दुक्खसच्चनिद्देसे आगतं, इध पन तं नत्थि, तत्थापि कारणं परियेसितब्बं।

अप्पियेहि सम्पयोगो दुक्खोति एत्थ अप्पियसम्पयोगो नाम अमनापेहि सत्तसङ्खारेहि समोधानं। सोपि दुक्खवत्थुतो दुक्खो। तेनाहु पोराणा —

''दिस्वाव अप्पिये दुक्खं, पठमं होति चेतसि।
तदुपक्कमसम्भूत-मथ काये यतो इध॥

''ततो दुक्खद्वयस्सापि, वत्थुतो सो महेसिना।
दुक्खो वुत्तोति विञ्ञेय्यो, अप्पियेहि समागमो''ति॥

पियेहि विप्पयोगो दुक्खोति एत्थ पन पियविप्पयोगो नाम मनापेहि सत्तसङ्खारेहि विनाभावो। सोपि सोकदुक्खस्स वत्थुतो दुक्खो। तेनाहु पोराणा —

''ञातिधनादिवियोगा।
सोकसरसमप्पिता वितुज्जन्ति।
बाला यतो ततोयं।
दुक्खोति मतो पियविप्पयोगो''ति॥

यम्पिच्छं न लभतीति एत्थ ''अहो वत मयं न जातिधम्मा अस्सामा''तिआदीसु अलब्भनेय्यवत्थूसु इच्छाव ''यम्पिच्छं न लभति, तम्पि दुक्ख''न्ति वुत्ता, सापि दुक्खवत्थुतो दुक्खा। तेनाहु पोराणा —

''तं तं पत्थयमानानं, तस्स तस्स अलाभतो।
यं विघातमयं दुक्खं, सत्तानं इध जायति॥

''अलब्भनेय्यवत्थूनं, पत्थना तस्स कारणं।
यस्मा तस्मा जिनो दुक्खं, इच्छितालाभमब्रवी''ति॥

संखित्तेन पञ्चुपादानक्खन्धा दुक्खाति एत्थ पन यस्मा इन्धनमिव पावको, लक्खमिव पहरणानि, गोरूपं विय डंसमकसादयो, खेत्तमिव लायका, गामं विय गामघातका, उपादानक्खन्धपञ्चकमेव जातिआदयो नानप्पकारेहि विबाधेन्ता तिणलतादीनि विय भूमियं, पुप्फफलपल्लवानि विय रुक्खेसु उपादानक्खन्धेसुयेव निब्बत्तन्ति, उपादानक्खन्धानञ्च आदिदुक्खं जाति, मज्झेदुक्खं जरा, परियोसानदुक्खं मरणं, मनोरथविघातप्पत्तानञ्च इच्छाविघातदुक्खं इच्छितालाभोति एवं नानप्पकारतो उपपरिक्खियमाना उपादानक्खन्धाव दुक्खाति यदेतं एकमेकं दस्सेत्वा वुच्चमानं अनेकेहिपि कप्पेहि न सक्का अनवसेसतो वत्तुं, तस्मा तं सब्बम्पि दुक्खं एकजलबिन्दुम्हि सकलसमुद्दजलरसं विय येसु केसुचि पञ्चुपादानक्खन्धेसु सङ्खिपित्वा दस्सेतुं ''संखित्तेन पञ्चुपादानक्खन्धा दुक्खा''ति भगवा अवोच। तेनाहु पोराणा —

''जातिप्पभुतिकं दुक्खं, यं वुत्तमिध तादिना।
अवुत्तं यञ्च तं सब्बं, विना एते न विज्जति॥

''यस्मा तस्मा उपादान-क्खन्धा सङ्खेपतो इमे।
दुक्खाति वुत्ता दुक्खन्त-देसकेन महेसिना''ति॥

एवं सरूपतो दुक्खसच्चं दस्सेत्वा इदानि समुदयसच्चं दस्सेतुं **''इदं खो पन, भिक्खवे, दुक्खसमुदय''**न्तिआदिमाह। तत्थ **सं**-इति अयं सद्दो ''समागमो समेत''न्तिआदीसु संयोगं दीपेति, **उ**-इति अयं ''उप्पन्नं उदित''न्तिआदीसु उप्पत्तिं। **अय**-सद्दो पन कारणं दीपेति। इदञ्चापि दुतियसच्चं अवसेसपच्चयसमायोगे सति दुक्खस्सुप्पत्तिकारणन्ति दुक्खस्स संयोगे उप्पत्तिकारणत्ता ''दुक्खसमुदय''न्ति वुच्चति। **यायं तण्हा**ति या अयं तण्हा। **पोनोब्भविका**ति पुनब्भवकरणं पुनब्भवो उत्तरपदलोपेन, पुनब्भवो सीलमेतिस्साति पोनोब्भविका। नन्दीरागेन सहगताति **नन्दीरागसहगता**। इदं वुत्तं होति ''नन्दनतो रज्जनतो च नन्दीरागभावं सब्बासु अवत्थासु अप्पच्चक्खाय वुत्तिया नन्दीरागसहगता''ति। **तत्रतत्राभिनन्दिनी**ति यत्र यत्र अत्तभावो निब्बत्तति, तत्रतत्राभिनन्दिनी।

सेय्यथिदन्ति निपातो, तस्स सा कतमाति चेति अयमत्थो। रूपतण्हादिभेदेन छब्बिधायेव तण्हा पवत्तिआकारभेदतो कामतण्हादिवसेन तिविधा वुत्ता। रूपतण्हायेव हि यदा चक्खुस्स आपाथमागतं रूपारम्मणं कामस्सादवसेन अस्सादयमाना पवत्तति, तदा **कामतण्हा** नाम होति। यदा तदेवारम्मणं धुवं सस्सतन्ति पवत्ताय सस्सतदिट्ठिया सद्धिं पवत्तति, तदा **भवतण्हा** नाम होति। सस्सतदिट्ठिसहगतो हि रागो ''भवतण्हा''ति वुच्चति। यदा पन तदेवारम्मणं उच्छिज्जति विनस्सतीति पवत्ताय उच्छेददिट्ठिया सद्धिं पवत्तति, तदा **विभवतण्हा** नाम होति। उच्छेददिट्ठिसहगतो हि रागो ''विभवतण्हा''ति वुच्चति। एस नयो सद्दतण्हादीसुपि।

कस्मा पनेत्थ तण्हाव समुदयसच्चं वुत्ताति? विसेसहेतुभावतो। अविज्जा हि भवेसु आदीनवं पटिच्छादेन्ती दिट्ठिआदिउपादानञ्च तत्थ तत्थ अभिनिविसमानं तण्हं अभिवड्ढेति, दोसादयोपि कम्मस्स कारणं होन्ति, तण्हा पन तंतंभवयोनिगतिविञ्ञाणट्ठितिसत्ताआवाससत्तनिकायकुलभोगिस्सरियादिविचित्ततं अभिपत्थेन्ती कम्मविचित्तताय उपनिस्सयतं कम्मस्स च सहायभावं उपगच्छन्ती भवादिविचित्ततं नियमेति, तस्मा दुक्खस्स विसेसहेतुभावतो अञ्ञेसुपि अविज्जाउपादानकम्मादीसु सुत्ते अभिधम्मे च अवसेसकिलेसाकुसलमूलादीसु वुत्तेसु दुक्खहेतूसु विज्जमानेसु तण्हाव ''समुदयसच्च''न्ति वुत्ताति वेदितब्बं।

इदानि दुक्खनिरोधं अरियसच्चं दस्सेतुं **''इदं खो पन, भिक्खवे, दुक्खनिरोध''**न्तिआदिमाह। तत्थ यस्मा **नि**-सद्दो अभावं, **रोध**-सद्दो च चारकं दीपेति, तस्मा अभावो एत्थ संसारचारकसङ्खातस्स दुक्खरोधस्स सब्बगतिसुञ्ञत्ता, समधिगते वा तस्मिं संसारचारकसङ्खातस्स दुक्खरोधस्स अभावो होति तप्पटिपक्खत्तातिपि ''दुक्खनिरोध''न्ति वुच्चति। दुक्खस्स वा अनुप्पादनिरोधपच्चयत्ता **दुक्खनिरोधं**। दुक्खनिरोधं दस्सेन्तेन चेत्थ **''यो तस्सायेव तण्हाया''**तिआदिना नयेन समुदयनिरोधो वुत्तो, सो कस्मा वुत्तोति चे? समुदयनिरोधेन दुक्खनिरोधो। ब्याधिनिमित्तवूपसमेन ब्याधिवूपसमो विय हि हेतुनिरोधेन फलनिरोधो, तस्मा समुदयनिरोधेनेव दुक्खं निरुज्झति, न अञ्ञथा। तेनाह –

''यथापि मूले अनुपद्दवे दळ्हे।
छिन्नोपि रुक्खो पुनरेव रूहति।

एवम्पि तण्हानुसये अनूहते।
निब्बत्तती दुक्खमिदं पुनप्पुन''न्ति॥ (ध० प० ३३८)।

इति यस्मा समुदयनिरोधेनेव दुक्खं निरुज्झति, तस्मा भगवा दुक्खनिरोधं दस्सेन्तो समुदयनिरोधेन देसेसि। सीहसमानवुत्तिनो हि तथागता। ते दुक्खं निरोधेन्ता दुक्खनिरोधञ्च देसेन्ता हेतुम्हि पटिपज्जन्ति, न फले। यथा हि सीहो येनत्तनि सरो खित्तो, तत्थेव अत्तनो बलं दस्सेति, न सरे, तथा बुद्धानं कारणे पटिपत्ति, न फले। तित्थिया पन सुवानवुत्तिनो। ते दुक्खं निरोधेन्ता दुक्खनिरोधञ्च देसेन्ता अत्तकिलमथानुयोगदेसनादीहि फले पटिपज्जन्ति, न हेतुम्हि। यथा हि सुनखा केनचि लेड्डुप्पहारे दिन्ने भुस्सन्ता लेड्डुं खादन्ति, न पहारदायके उड्डहन्ति, एवं अञ्ञतित्थिया दुक्खं निरोधेतुकामा कायखेदमनुयुज्जन्ति, न किलेसनिरोधनं, एवं ताव दुक्खनिरोधस्स समुदयनिरोधवसेन देसनाय पयोजनं वेदितब्बं।

अयं पनेत्थ अत्थो। **तस्सायेव तण्हाया**ति तस्सा ''पोनोब्भविका''ति वत्वा कामतण्हादिवसेन विभत्ततण्हाय। विरागो वुच्चति मग्गो। ''विरागा विमुच्चती''ति (म० नि० १.२४५; सं० नि० ३.१२, ५९) हि वुत्तं। विरागेन निरोधो विरागनिरोधो, अनुसयसमुग्घाततो असेसो विरागनिरोधो **असेसविरागनिरोधो**। अथ वा विरागोति पहानं वुच्चति, तस्मा अनुसयसमुग्घाततो असेसो विरागो असेसो निरोधोति एवम्पेत्थ योजना दट्ठब्बा, अत्थतो पन सब्बानेव एतानि निब्बानस्स वेवचनानि। परमत्थतो हि दुक्खनिरोधो अरियसच्चन्ति निब्बानं वुच्चति। यस्मा पन तं आगम्म तण्हा विरज्जति चेव निरुज्झति च, तस्मा ''विरागो''ति च ''निरोधो''ति च वुच्चति। यस्मा च तदेव आगम्म तस्सा चागादयो होन्ति, कामगुणालयादीसु चेत्थ एकोपि आलयो नत्थि, तस्मा **चागो पटिनिस्सग्गो मुत्ति अनालयो**ति वुच्चति।

इदानि दुक्खनिरोधगामिनिपटिपदाअरियसच्चं दस्सेतुं **''इदं खो पन, भिक्खवे, दुक्खनिरोधगामिनी''**तिआदिमाह। यस्मा पनेतं अरियसच्चं दुक्खनिरोधं गच्छति आरम्मणवसएन तदभिमुखभूतत्ता, पटिपदा च होति दुक्खनिरोधप्पत्तिया, तस्मा ''दुक्खनिरोधगामिनी पटिपदा''ति वुच्चति। सेसमेत्थ वुत्तनयमेव। को पन नेसं दुक्खादीनं सच्चट्ठोति? यो पञ्ञाचक्खुना उपपरिक्खियमानानं मायाव विपरीतो, मरीचिव विसंवादको, तित्थियानं अत्ता विय अनुपलब्भसभावो च न होति, अथ खो बाधनप्पभवसन्तिनिय्यानप्पकारेन तच्छाविपरीतभूतभावेन अरियञाणस्स गोचरो होतियेव, एस अग्गिलक्खणं विय लोकपकति विय च तच्छाविपरीतभूतभावो सच्चट्ठोति वेदितब्बो। एत्थ च अग्गिलक्खणं नाम उण्हत्तं। तञ्हि कत्थचि कट्ठादिउपादानभेदे विसंवादकं विपरीतं अभूतं वा कदाचिपि न होति, ''जातिधम्मा जराधम्मा, अथो मरणधम्मिनो''ति (अ० नि० ५.५७) एवं वुत्तजातिआदिका लोकपकतीति वेदितब्बा। ''एकच्चानं तिरच्छानानं तिरियं दीघता, मनुस्सादीनं उद्धं दीघता, वुड्ढिनिट्ठप्पत्तानं पुन अवड्ढनन्ति एवमादिका च लोकपकती''ति वदन्ति।

अपिच –

नाबाधकं यतो दुक्खं, दुक्खा अञ्ञं न बाधकं।
बाधकत्तनियामेन, ततो सच्चमिदं मतं॥

तं विना नाञ्ञतो दुक्खं, न होति न च तं ततो।
दुक्खहेतुनियामेन, इति सच्चं विसत्तिका॥

नाञ्ञा निब्बानतो सन्ति, सन्तं न च न तं यतो।
सन्तभावनियामेन, ततो सच्चमिदं मतं॥

मग्गा अञ्ञं न निय्यानं, अनिय्यानो न चापि सो।
तच्छनिय्यानभावत्ता, इति सो सच्चसम्मतो॥

इति तच्छाविपल्लास-भूतभावं चतूसुपि।
दुक्खादीस्वविसेसेन, सच्चट्ठं आहु पण्डितातिा॥ (विभ० अट्ठ० १८९)।

१५. पुब्बे अननुस्सुतेसूति इतो पुब्बे ''इदं दुक्ख''न्तिआदिना न अनुस्सुतेसु अस्सुतपुब्बेसु चतुसच्चधम्मेसु। **चक्खु**न्तिआदीनि ञाणवेवचनानेव। ञाणमेव हेत्थ पच्चक्खतो दस्सनट्ठेन चक्खु वियाति **चक्खु,** ञाणट्ठेन **ञाणं,** पकारतो जाननट्ठेन **पञ्ञा,** पटिविज्झनट्ठेन **विज्जा,** सच्चप्पटिच्छादकस्स मोहन्धकारस्स विधमनतो ओभासनट्ठेन **आलोको**ति वुत्तं। तं पनेतं चतूसु सच्चेसु लोकियलोकुत्तरमिस्सकं निद्दिट्ठन्ति वेदितब्बं।

१६. यावकीवञ्चाति यत्तकं कालं। **तिपरिवट्ट**न्ति सच्चञाणकिच्चञाणकतञाणसङ्खातानं तिण्णं परिवट्टानं वसेन तिपरिवट्टं। सच्चञाणादिवसेन हि तयो परिवट्टा एतस्सातिति तिपरिवट्टन्ति वुच्चति ञाणदस्सनं। एत्थ च ''इदं दुक्खं अरियसच्चं, इदं दुक्खसमुदय''न्ति एवं चतूसु सच्चेसु यथाभूतञाणं **सच्चञाणं** नाम। तेसुयेव ''परिञ्ञेय्यं पहातब्बं सच्छिकातब्बं भावेतब्ब''न्ति एवं कत्तब्बकिच्चजाननञाणं **किच्चञाणं** नाम। ''परिञ्ञातं पहीनं सच्छिकतं भावित''न्ति एवं तस्स कतभावजाननञाणं **कतञाणं** नाम। **द्वादसाकार**न्ति तेसंयेव एकेकस्मिं सच्चे तिण्णं तिण्णं आकारानं वसेन द्वादसाकारं। **ञाणदस्सन**न्ति एतेसं तिपरिवट्टानं द्वादसन्नं आकारानं वसेन उप्पन्नञाणसङ्खातं दस्सनं।

अनुत्तरं सम्मासम्बोधिन्ति उत्तरविरहितं सब्बसेट्ठं सम्मा सामञ्च बोधिं। अथ वा पसत्थं सुन्दरञ्च बोधिं। **बोधी**ति च भगवतो अरहत्तमग्गो इधाधिप्पेतो। सावकानं अरहत्तमग्गो अनुत्तरा बोधि होति, न होतीति? न होति। कस्मा? असब्बगुणदायकत्ता। तेसञ्हि कस्सचि अरहत्तमग्गो अरहत्तफलमेव देति, कस्सचि तिस्सो विज्जा, कस्सचि छ अभिञ्ञा, कस्सचि चतस्सो पटिसम्भिदा, कस्सचि सावकपारमीञाणं। पच्चेकबुद्धानम्पि पच्चेकबोधिञाणमेव देति, बुद्धानं पन सब्बगुणसम्पत्तिं देति अभिसेको विय रञ्ञो सब्बलोकिस्सरियभावं। तस्मा अञ्ञस्स कस्सचिपि अनुत्तरा बोधि न होतीति। **अभिसम्बुद्धोति पच्चञ्ञासि**न्ति अभिसम्बुद्धो अहं पत्तो पटिविज्झित्वा ठितोति एवं पटिजानिं। **ञाणञ्च पन मे दस्सनं उदपादी**ति अधिगतगुणानं याथावतो दस्सनसमत्थं पच्चवेक्खणञाणञ्च पन मे उदपादि। **अकुप्पा मे विमुत्ती**ति अयं मय्हं अरहत्तफलविमुत्ति अकुप्पा पटिपक्खेहि न कोपेतब्बाति एवं ञाणं उदपादि। तत्थ द्वीहाकारेहि अकुप्पता वेदितब्बा मग्गसङ्खातकारणतो च आरम्मणतो च। सा हि चतूहि मग्गेहि समुच्छिन्नकिलेसानं पुन अनिवत्तनताय **कारणतोपि** अकुप्पा, अकुप्पधम्मं निब्बानं आरम्मणं कत्वा पवत्तताय **आरम्मणतोपि** अकुप्पा अनाकुप्पारम्मणानं लोकियसमापत्तीनं तदभावतो। **अन्तिमा**ति पच्छिमा। **नत्थि दानि पुनब्भवो**ति इदानि पुन अञ्ञो भवो नाम नत्थीति।

इमस्मिञ्च पन वेय्याकरणस्मिन्ति इमस्मिं निग्गाथके सुत्ते। निग्गाथकञ्हि सुत्तं पुच्छाविस्सज्जनसहितं ''वेय्याकरण''न्ति वुच्चति। **भञ्ञमाने**ति भणियमाने, देसियमानेति अत्थो। **विरज**न्ति अपायगमनीयरागरजादीनं विगमेन विरजं। **वीतमल**न्ति अनवसेसदिट्ठिविचिकिच्छामलापगमेन वीतमलं। पठममग्गवज्झकिलेसरजाभावेन वा **विरजं,** पञ्चविधदुस्सील्यमलापगमेन **वीतमलं। धम्मचक्खु**न्ति **ब्रह्मायुसुत्ते** (म० नि० २.३८३ आदयो) हेट्ठिमा तयो मग्गा वुत्ता,

चूळराहुलोवादे (म० नि० ३.४१६ आदयो) आसवक्खयो, इध पन सोतापत्तिमग्गो अधिप्पेतो। चतुसच्चसङ्खातेसु धम्मेसु तेसं दस्सनट्ठेन चक्खूति **धम्मचक्खु,** हेट्ठिमेसु वा तीसु मग्गधम्मेसु एकं सोतापत्तिमग्गसङ्खातं चक्खूति **धम्मचक्खु,** समथविपस्सनाधम्मनिब्बत्तताय सीलादितिविधधम्मक्खन्धभूतताय वा धम्ममयं चक्खूतिपि **धम्मचक्खु,** तस्स उप्पत्तिआकारदस्सनत्थं **''यं किञ्चि समुदयधम्मं, सब्बं तं निरोधधम्म''**न्ति आह। ननु च मग्गञाणं असङ्खतधम्मारम्मणं, न सङ्खतधम्मारम्मणन्ति? सच्चमेतं, यस्मा तं निरोधं आरम्मणं कत्वा किच्चवसेन सब्बसङ्खतं असम्मोहप्पटिवेधवसेन पटिविज्झन्तं उप्पज्जति, तस्मा तथा वुत्तं।

१७. **धम्मचक्के**ति पटिवेधञाणञ्चेव देसनाञाणञ्च पवत्तनट्ठेन चक्कन्ति धम्मचक्कं। बोधिपल्लङ्के निसिन्नस्स हि चतूसु सच्चेसु उप्पन्नं द्वादसाकारं पटिवेधञाणम्पि, इसिपतने निसिन्नस्स द्वादसाकाराय सच्चदेसनाय पवत्तकं देसनाञाणम्पि धम्मचक्कं नाम। उभयम्पि हेतं दसबलस्स उरे पवत्तञाणमेव। तदुभयं इमाय देसनाय पकासेन्तेन भगवता धम्मचक्कं पवत्तितं नाम। तं पनेतं धम्मचक्कं याव अञ्ञासिकोण्डञ्ञत्थेरो अट्ठारसहि ब्रह्मकोटीहि सद्धिं सोतापत्तिफले पतिट्ठाति, ताव भगवा **पवत्तेति** नाम पवत्तनकिच्चस्स अनिट्ठितत्ता। पतिट्ठिते **पवत्तितं** नाम कस्सपसम्मासम्बुद्धस्स सासनन्तरधानतो पट्ठाय याव बुद्धुप्पादो, एत्तकं कालं अप्पवत्तपुब्बस्स पवत्तितत्ता। तं सन्धाय ''पवत्तिते च पन भगवता धम्मचक्के भुम्मा देवा सद्दमनुस्सावेसु''न्तिआदि वुत्तं। तत्थ **भुम्मा**ति भूमट्ठकदेवता। **सद्दमनुस्सावेसु**न्ति एकप्पहारेनेव साधुकारं दत्वा ''एतं भगवता''तिआदीनि वदन्ता अनुस्सावयिंसु। **ओभासो**ति सब्बञ्ञुतञ्ञाणानुभावेन पवत्तो चित्तपच्चयउतुसमुट्ठानो ओभासो। सो हि तदा देवानं देवानुभावं अतिक्कमित्वा विरोचित्थ। **अञ्ञासि वत भो कोण्डञ्ञो**ति इमस्सपि उदानस्स उदाहरणघोसो दससहस्सिलोकधातुं फरित्वा अट्ठासि। भगवतो हि धम्मचक्कप्पवत्तनस्स आरम्भे विय परिसमापनेपि अतिविय उळारतमं पीतिसोमनस्सं उदपादि।

१८. दिट्ठो अरियसच्चधम्मो एतेनाति **दिट्ठधम्मो**। एस नयो सेसपदेसुपि। एत्थ च दस्सनं नाम ञाणदस्सनतो अञ्ञम्पि अत्थीति तंनिवत्तनत्थं **''पत्तधम्मो''**ति वुत्तं। पत्ति च ञाणसम्पत्तितो अञ्ञापि विज्जतीति ततो विसेसनत्थं **''विदितधम्मो''**ति वुत्तं। सा पनेसा विदितधम्मता एकदेसतोपि होतीति निप्पदेसतो विदितभावं दस्सेतुं **''परियोगाळ्हधम्मो''**ति वुत्तं। तेनस्स सच्चाभिसम्बोधिंयेव दीपेति। मग्गञाणञ्हि एकाभिसमयवसेन परिञ्ञादिकिच्चं साधेन्तं निप्पदेसेन चतुसच्चधम्मं समन्ततो ओगाळ्हं नाम होति। सप्पटिभयकन्तारसदिसा सोळसवत्थुका अट्ठवत्थुका च तिण्णा विचिकिच्छा अनेनाति **तिण्णविचिकिच्छो**। पवत्तिआदीसु ''एवं नुखो न नुखो''ति एवं पवत्तिका विगता समुच्छिन्ना कथंकथा अस्साति **विगतकथंकथो। वेसारज्जप्पत्तो**ति सारज्जकरानं पापधम्मानं पहीनत्ता तप्पटिपक्खेसु च सीलादीसु गुणेसु सुप्पतिट्ठितत्ता विसारदभावं वेय्यत्तियं पत्तो अधिगतो। स्वायं वेसारज्जप्पत्तिसुप्पतिट्ठितभावो कत्थाति आह **''सत्थुसासने''**ति। अत्तना पच्चक्खतो अधिगतत्ता न परं पच्चेति, परस्स सद्धाय एत्थ नप्पवत्ततिति, न तस्स परो पच्चेतब्बो अत्थीति **अपरप्पच्चयो**।

लभेय्याहन्ति लभेय्यं अहं, आयाचनवचनमेतं। **एही**ति आयाचितानं पब्बज्जूपसम्पदानं अनुमतभावप्पकासनवचनं, तस्मा एहि सम्पटिच्छाहि यथायाचितं पब्बज्जूपसम्पदविसेसन्ति अत्थो। **इति**-सद्दो तस्स एहिभिक्खूपसम्पदापटिलाभनिमित्तवचनपरियोसानदस्सनो। तदवसानो हि तस्स भिक्खुभावो। तेनेवाह **''एहि भिक्खूति भगवतो वचनेन अभिनिप्फन्ना साव तस्स आयस्मतो एहिभिक्खूपसम्पदा अहोसी''**ति। **चर ब्रह्मचरिय**न्ति उपरिमग्गत्तयसङ्खातं ब्रह्मचरियं समधिगच्छ। किमत्थं? **सम्मा दुक्खस्स अन्तकिरियाय**। इधापि ''अवोचा''ति सम्बन्धितब्बं। ''नव कोटिसहस्सानी''तिआदिना (विसुद्धि० १.२०; पटि० म० अट्ठ० १.१.३७) वुत्तप्पभेदानं अनेकसहस्सानं

संवरविनयानं समादियित्वा वत्तनेन उपरिभूता अग्गभूता सम्पदाति **उपसम्पदा**।

१९. **नीहारभत्तो**ति नीहटभत्तो, गामतो भिक्खं नीहरित्वा भिक्खूहि दिन्नभत्तोति अत्थो। भगवा हि दहरकुमारके विय ते भिक्खू परिहरन्तो पाटिपददिवसतो पट्ठाय पिण्डपातत्थायपि गामं अपविसित्वा अन्तोविहारेयेव वसि।

धम्मचक्कप्पवत्तनसुत्तवण्णना निट्ठिता।

अनत्तलक्खणसुत्तवण्णना

२०. **आमन्तेसी**ति आसाळ्हीपुण्णमदिवसे धम्मचक्कप्पवत्तनतो पट्ठाय अनुक्कमेन सोतापत्तिफले पतिट्ठिते अञ्ञासिकोण्डञ्ञप्पमुखे पञ्चवग्गिये ''इदानि तेसं आसवक्खयाय धम्मं देसेस्सामी''ति पञ्चमिया पक्खस्स आमन्तेसि। **अनत्ता**ति अवसवत्तनट्ठेन असामिकट्ठेन सुञ्ञतट्ठेन अत्तपटिक्खेपट्ठेनाति एवं चतूहि कारणेहि अनत्ता। तत्थ ''उप्पन्नं रूपं ठितिं मा पापुणातु, ठानप्पत्तं मा जीरतु, जरप्पत्तं मा भिज्जतु, उदयब्बयेहि मा किलमयतू''ति न एत्थ कस्सचि वसीभावो अत्थि, स्वायमस्स **अवसवत्तनट्ठो**। सामिभूतस्स कस्सचि अभावो **असामिकट्ठो**। निवासीकारकवेदकअधिट्ठायकविरहेन ततो सुञ्ञता **सुञ्ञतट्ठो**। परपरिकप्पितअत्तसभावाभावो एव **अत्तपटिक्खेपट्ठो**। इदानि अनत्ततंयेव विभावेतुं **''रूपञ्च हिदं भिक्खवे''**तिआदिमाह। तत्थ **अत्ता अभविस्सा**ति कारको वेदको सयंवसीति एवंभूतो अत्ता अभविस्साति अधिप्पायो। एवञ्हि सति रूपस्स आबाधाय संवत्तनं अयुज्जमानकं सिया। कामञ्चेत्थ ''यस्मा च खो, भिक्खवे, रूपं अनत्ता, तस्मा रूपं आबाधाय संवत्तती''ति रूपस्स अनत्तताय दुक्खता विभाविता विय दिस्सति, तथापि ''यस्मा रूपं आबाधाय संवत्तति, तस्मा अनत्ता''ति पाकटाय साबाधताय रूपस्स अत्तसाराभावो विभावितो, ततो एव च ''न च लब्भति रूपे 'एवं मे रूपं होतु, एवं मे रूपं मा अहोसी'ति'' रूपे कस्सचि अनिस्सरता तस्स च अवसवत्तनाकारो दस्सितो। **वेदना**दीसुपि एसेव नयो।

२१. **तं किंमञ्ञथ भिक्खवे**ति इदं कस्मा आरद्धं? एत्तकेन ठानेन अनत्तलक्खणमेव कथितं, न अनिच्चदुक्खलक्खणानि, इदानि तानि दस्सेत्वा समोधानेत्वा तीणिपि लक्खणानि दस्सेतुं इदमारद्धन्ति वेदितब्बं। **अनिच्चं भन्ते**ति भन्ते यस्मा हुत्वा न होति, तस्मा अनिच्चं। यस्मा पुब्बे असन्तं पच्चयसमवायेन हुत्वा उप्पज्जित्वा पुन भङ्गुपगमनेन न होति, तस्मा न निच्चन्ति अनिच्चं, अद्धुवन्ति अधिप्पायो। अथ वा उप्पादवयवन्तताय तावकालिकताय विपरिणामकोटिया निच्चप्पटिक्खेपतोति इमेहिपि कारणेहि **अनिच्चं**। एत्थ खणे खणे उप्पज्जनवसेन निरुज्झनवसेन च पवत्तनतो **उप्पादवयवन्तता**। तङ्खणिकताय **तावकालिकता**। विपरिणामवन्तताय **विपरिणामकोटि**। रूपञ्हि उप्पादादिविकारापज्जनेन विपरिणामन्तं विनासं पापुणाति। निच्चसभावाभावो एव **निच्चपटिक्खेपो**। अनिच्चा हि धम्मा, तेनेव अत्तनो अनिच्चभावेन अत्थतो निच्चतं पटिक्खिपन्ति नाम।

दुक्खं भन्तेति भन्ते पटिपीळनाकारेन दुक्खं। उप्पादजराभङ्गवसेन हि रूपस्स निरन्तरं बाधति, पटिपीळनाकारेनस्स दुक्खता। अथ वा सन्तापट्ठेन दुक्खमट्ठेन दुक्खवत्थुकट्ठेन सुखपटिक्खेपट्ठेन चाति चतूहि कारणेहि दुक्खं। एत्थ च **सन्तापो** नाम दुक्खदुक्खतादिवसेन सन्तापनं परिदहनं। ततो एवस्स दुस्सहताय **दुक्खमता**। तिस्सन्नं दुक्खतानं संसारदुक्खस्स च अधिट्ठानताय **दुक्खवत्थुकता**। सुखसभावाभावो एव **सुखपटिक्खेपो। विपरिणामधम्म**न्ति जराय मरणेन च विपरिणामसभावं। **कल्लं नू**ति युत्तं नु। **तन्ति** एवं अनिच्चं दुक्खं विपरिणामधम्मं रूपं। **एतं ममा**ति तण्हागाहो ममङ्कारभावतो। **एसोहमस्मी**ति मानगाहो अहङ्कारभावतो। **एसो मे अत्ता**ति दिट्ठिगाहो अत्तभावविपल्लासग्गाहतो।

तण्हागाहो चेत्थ अट्ठसततण्हाविचरितवसेन, **मानगाहो** नवविधमानवसेन, **दिट्ठिगाहो** द्वासट्ठिदिट्ठिवसेन वेदितब्बो। इमेसं तिण्णं तण्हामानदिट्ठिगाहानं वसेन युत्तं नु तं समनुपस्सितुन्ति वुत्तं होति।

इति भगवा अनिच्चदुक्खवसेन अनत्तलक्खणंयेव दस्सेसि। भगवा हि कत्थचि अनिच्चवसेन अनत्ततं दस्सेति, कत्थचि दुक्खवसेन, कत्थचि उभयवसेन। तथा हि ''चक्खु अत्ताति यो वदेय्य, तं न उपपज्जति, चक्खुस्स उप्पादोपि वयोपि पञ्ञायति। यस्स खो पन उप्पादोपि वयोपि पञ्ञायति, 'अत्ता मे उप्पज्जति चेव वेति चा'ति इच्चस्स एवमागतं होति, तस्मा तं न उपपज्जति। 'चक्खु अत्ता'ति यो वदेय्य, इति चक्खु अनत्ता''ति इमस्मिञ्च **छछक्कसुत्ते** (म० नि० ३.४२२) अनिच्चवसेन अनत्ततं दस्सेसि। ''रूपञ्च हिदं, भिक्खवे, अत्ता अभविस्स...पे०... एवं मे रूपं मा अहोसी''ति इमस्मिंयेव अनत्तलक्खणसुत्ते दुक्खवसेन अनत्ततं दस्सेसि। ''रूपं, भिक्खवे, अनिच्चं, यदनिच्चं तं दुक्खं, यं दुक्खं तदनत्ता, यदनत्ता, तं 'नेतं मम, नेसोहमस्मि, न मे सो अत्ता'ति एवमेतं यथाभूतं सम्मप्पञ्ञाय दट्ठब्ब''न्ति इमस्मिं **अरहन्तसुत्ते** (सं० नि० ३.७६-७७) उभयवसेन अनत्ततं दस्सेसि। कस्मा? अनिच्चं दुक्खञ्च पाकटं, अनत्ता अपाकटं। परिभोगभाजनादीसु हि भिन्नेसु ''अहो अनिच्च''न्ति वदन्ति, ''अहो अनत्ता''ति पन वत्ता नाम नत्थि। सरीरे गण्डपिळकासु वा उट्ठितासु कण्टकेन वा विद्धा ''अहो दुक्ख''न्ति वदन्ति, ''अहो अनत्ता''ति पन वत्ता नाम नत्थि। कस्मा? इदञ्हि अनत्तलक्खणं नाम अविभूतं दुद्दसं दुप्पञ्ञापनं। तथा हि सरभङ्गादयोपि सत्थारो नाद्दसंसु, कुतो पञ्ञापना, तेन नं भगवा अनिच्चवसेन वा दुक्खवसेन वा उभयवसेन वा दस्सेसि। तयिदं इमस्मिम्पि तेपरिवट्टे अनिच्चदुक्खवसेनेव दस्सितं। **वेदना**दीसुपि एसेव नयो।

२२. **तस्मातिहा**ति तस्मा इच्चेव वुत्तं। **ति**-कार **ह**-कारा निपाता, यस्मा इमे पञ्चक्खन्धा अनिच्चा दुक्खा अनत्ता, तस्माति अत्थो। **यं किञ्ची**ति अनवसेसपरियादानमेतं। **यन्ति** हि सामञ्ञेन अनियमदस्सनं, **किञ्ची**ति पकारतो भेदं आमसित्वा अनियमदस्सनं। उभयेनपि अतीतं वा...पे०... सन्तिके वा अप्पं वा बहुं वा यादिसं वा तादिसं वा नपुंसकनिद्देसारहं सब्बं ब्यापेत्वा सङ्गण्हाति, तस्मा अनवसेसपरियादानमेतं ''यं किञ्ची''ति। एवञ्च सति अञ्ञेसुपि नपुंसकनिद्देसारहेसु पसङ्गं दिस्वा तत्थ अधिप्पेतत्थं अधिच्च पवत्तनतो अतिप्पसङ्गस्स नियमनत्थं **''रूप''**न्ति वुत्तं। एवं पदद्वयेनपि रूपस्स असेसपरिग्गहो कतो होति। अथस्स अतीतादिविभागं आरभति **''अतीतानागतपच्चुप्पन्न''**न्तिआदिना। तञ्हि किञ्चि अतीतं किञ्चि अनागतादिभेदन्ति। एस नयो **वेदना**दीसुपि।

तत्थ रूपं ताव अद्धासन्ततिसमयखणवसेन चतुधा अतीतं नाम होति, तथा अनागतपच्चुप्पन्नं। तत्थ **अद्धावसेन** ताव एकस्स एकस्मिं भवे पटिसन्धितो पुब्बे अतीतं, चुतितो उद्धमनागतं, उभिन्नमन्तरे पच्चुप्पन्नं। **सन्ततिवसेन** सभागेकउतुसमुट्ठानएकाहारसमउट्ठानञ्च पुब्बापरियवसेन वत्तमानम्पि पच्चुप्पन्नं, ततो पुब्बे विसभागउतुआहारसमुट्ठानं अतीतं, पच्छा अनागतं। चित्तजं एकवीथिएकजवनएकसमापत्तिसमुट्ठानं पच्चुप्पन्नं, ततो पुब्बे अतीतं, पच्छा अनागतं। कम्मसमुट्ठानस्स पाटियेक्कं सन्ततिवसेन अतीतादिभेदो नत्थि। तेसंयेव पन उतुआहारचित्तसमुट्ठानानं उपत्थम्भकवसेन तस्स अतीतादिभावो वेदितब्बो। **समयवसेन** एकमुहुत्तपुब्बण्हसायन्हरत्तिदिवादीसु समयेसु सन्तानवसेन पवत्तमानं तंतंसमयवन्तं रूपं पच्चुप्पन्नं नाम, ततो पुब्बे अतीतं, पच्छा अनागतं। **खणवसेन** उप्पादादिक्खणत्तयपरियापन्नं पच्चुप्पन्नं, ततो पुब्बे अतीतं, पच्छा अनागतं, इदमेवेत्थ निप्परियायं, सेसा परियायकथा।

अज्झत्तं वा बहिद्धा वाति चक्खादिपञ्चविधं रूपं अत्तभावं अधिकिच्च पवत्तत्ता अज्झत्तं, सेसं ततो बाहिरत्ता बहिद्धा। अपिच नियकज्झत्तम्पि इध अज्झत्तं, परपुग्गलिकम्पि च बहिद्धाति वेदितब्बं। **ओळारिकं वा सुखुमं वा**ति

चक्खादीनि नव, आपोधातुवज्जा तिस्सो धातुयो चाति द्वादसविधं रूपं घट्टनवसेन गहेतब्बतो ओळारिकं, सेसं ततो विपरीतत्ता सुखुमं। **हीनं वा पणीतं वा**ति एत्थ हीनपणीतभावो परियायतो निप्परियायतो च। तत्थ अकनिट्ठानं रूपतो सुदस्सीनं रूपं हीनं, तदेव सुदस्सानं रूपतो पणीतं। एवं याव नरकसत्तानं रूपं, ताव परियायतो हीनपणीतता वेदितब्बा। निप्परियायतो पन यं आरम्मणं कत्वा अकुसलविपाकविञ्ञाणं उप्पज्जति, तं हीनं अनिट्ठभावतो। यं पन आरम्मणं कत्वा कुसलविपाकविञ्ञाणं उप्पज्जति, तं पणीतं इट्ठभावतो। यथा हि अकुसलविपाको सयं अनिट्ठो अनिट्ठे एव उप्पज्जति, न इट्ठे, एवं कुसलविपाकोपि सयं इट्ठो इट्ठेयेव उप्पज्जति, न अनिट्ठे। **यं दूरे सन्तिके वा**ति यं सुखुमं, तदेव दुप्पटिविज्झसभावत्ता दूरे, इतरं सुप्पटिविज्झसभावत्ता सन्तिके। अपिचेत्थ ओकासतोपि उपादायुपादाय दूरसन्तिकता वेदितब्बा। **तं सब्ब**न्ति तं अतीतादीहि पदेहि विसुं निद्दिट्ठं सब्बं रूपं। **सम्मप्पञ्ञाय दट्ठब्ब**न्ति सहविपस्सनाय मग्गपञ्ञाय दट्ठब्बं।

या काचि वेदनातिआदीसु पन सन्ततिवसेन च खणवसेन च वेदनाय अतीतानागतपच्चुप्पन्नभावो वेदितब्बो। तत्थ (विसुद्धि० २.४९७ आदयो) **सन्ततिवसेन** एकवीथिएकजवनएकसमापत्तिपरियापन्ना एकविधविसयसमायोगप्पवत्ता च दिवसम्पि बुद्धरूपं पस्सन्तस्स धम्मं सुणन्तस्स पवत्तसद्धादिसहितवेदना पच्चुप्पन्ना, ततो पुब्बे अतीता, पच्छा अनागता। **खणवसेन** खणत्तयपरियापन्ना पच्चुप्पन्ना, ततो पुब्बे अतीता, पच्छा अनागता। अज्झत्तबहिद्धाभेदो नियकज्झत्तवसेन वेदितब्बो। ओळारिकसुखुमभेदो ''अकुसला वेदना ओळारिका, कुसलाब्याकता वेदना सुखुमा''तिआदिना नयेन **विभङ्गे** (विभ० ११) वुत्तेन जातिसभावपुग्गललोकियलोकुत्तरवसेन वेदितब्बो। **जातिवसेन** ताव अकुसलवेदना सावज्जकिरियहेतुतो किलेससन्तापसभावतो च अवूपसन्तवुत्तीति कुसलवेदनाय ओळारिका, सब्यापारतो सउस्साहतो सविपाकतो किलेससन्तापसभावतो सावज्जतो च विपाकाब्याकताय ओळारिका, सविपाकतो किलेससन्तापसभावतो सब्यापज्जतो सावज्जतो च किरियाब्याकताय ओळारिका, कुसलाब्याकता पन वुत्तविपरियायतो अकुसलाय सुखुमा। द्वेपि कुसलाकुसलवेदना सब्यापारतो सउस्साहतो सविपाकतो च यथायोगं दुविधायपि अब्याकताय ओळारिका, वुत्तविपरियायेन दुविधापि अब्याकता ताहि सुखुमा। एवं ताव जातिवसेन ओळारिकसुखुमता वेदितब्बा।

सभाववसेन पन दुक्खवेदना निरस्सादतो सविप्फारतो उब्बेजनीयतो अभिभवनतो च इतराहि द्वीहि ओळारिका, इतरा पन द्वे सातततो सन्ततो पणीतततो मनापतो मज्झत्ततो च यथायोगं दुक्खाय सुखुमा। उभो पन सुखदुक्खा सविप्फारतो खोभकरणतो पाकटतो च अदुक्खमसुखाय ओळारिका, सा वुत्तविपरियायेन तदुभयतो सुखुमा। एवं सभाववसेन ओळारिकसुखुमता वेदितब्बा। **पुग्गलवसेन** पन असमापन्नस्स वेदना नानारम्मणविक्खित्तभावतो समापन्नस्स वेदनाय ओळारिका, विपरियायेन इतरा सुखुमा। एवं पुग्गलवसेन ओळारिकसुखुमता वेदितब्बा। **लोकियलोकुत्तरवसेन** पन सासवा वेदना लोकिया। सा आसवुप्पत्तिहेतुतो ओघनियतो योगनियतो गन्थनियतो नीवरणियतो उपादानियतो संकिलेसिकतो पुथुज्जनसाधारणतो च अनासवाय ओळारिका, सा विपरियायेन सासवाय सुखुमा। एवं लोकियलोकुत्तरवसेन ओळारिकसुखुमता वेदितब्बा।

तत्थ जातिआदिवसेन सम्भेदो परिहरितब्बो। अकुसलविपाककायविञ्ञाणसम्पयुत्ता हि वेदना जातिवसेन अब्याकतत्ता सुखुमापि समाना सभावादिवसेन ओळारिका होति। वुत्तञ्हेतं ''अब्याकता वेदना सुखुमा, दुक्खा वेदना ओळारिका। असमापन्नस्स वेदना ओळारिका, सासवा वेदना ओळारिका''ति (विभ० ११)। यथा च दुक्खवेदना, एवं सुखादयोपि जातिवसेन ओळारिका, सभावादिवसेन सुखुमा होन्ति। तस्मा यथा जातिआदिवसेन सम्भेदो न होति, तथा वेदनानं ओळारिकसुखुमता वेदितब्बा। सेय्यथिदं — अब्याकता जातिवसेन कुसलाकुसलाहि सुखुमा। न तत्थ ''कतमा

अब्याकता, किं दुक्खा, किं सुखा, किं समापन्नस्स, किं असमापन्नस्स, किं सासवा, किं अनासवा''ति एवं सभावादिभेदो परामसितब्बो। एस नयो सब्बत्थ।

अपिच ''तं तं वा पन वेदनं उपादायुपादाय वेदना ओळारिका सुखुमा दट्ठब्बा''ति वचनतो अकुसलादीसुपि लोभसहगताय दोससहगतवेदना अग्गि विय अत्तनो निस्सयदहनतो ओळारिका, लोभसहगता सुखुमा। दोससहगतापि नियता ओळारिका, अनियता सुखुमा। नियतापि कप्पट्ठितिका ओळारिका, इतरा सुखुमा। कप्पट्ठितिकासुपि असङ्खारिका ओळारिका, इतरा सुखुमा। लोभसहगता पन दिट्ठिसम्पयुत्ता ओळारिका, इतरा सुखुमा। सापि नियता कप्पट्ठितिका असङ्खारिका ओळारिका, इतरा सुखुमा, अविसेसेन अकुसला बहुविपाका ओळारिका, अप्पविपाका सुखुमा। कुसला पन अप्पविपाका ओळारिका, बहुविपाका सुखुमा।

अपिच कामावचरकुसला ओळारिका, रूपावचरा सुखुमा, ततो अरूपावचरा, ततो लोकुत्तरा। कामावचरा च दानमया ओळारिका, सीलमया सुखुमा, ततो भावनामया। भावनामयापि दुहेतुका ओळारिका, तिहेतुका सुखुमा। तिहेतुकापि ससङ्खारिका ओळारिका, असङ्खारिका सुखुमा। रूपावचरा पठमज्झानिका ओळारिका...पे॰... पञ्चमज्झानिका सुखुमाव। अरूपावचरा आकासानञ्चायतनसम्पयुत्ता ओळारिका...पे॰... नेवसञ्ञानासञ्ञायतनसम्पयुत्ता सुखुमाव। लोकुत्तरा च सोतापत्तिमग्गसम्पयुत्ता ओळारिका...पे॰... अरहत्तमग्गसम्पयुत्ता सुखुमाव। एस नयो तंतंभूमिविपाककिरियवेदनासु दुक्खादिअसमापन्नादिसासवादिवसेन वुत्तवेदनासु च।

ओकासवसेन चापि निरये दुक्खा ओळारिका, तिरच्छानयोनियं सुखुमा...पे॰... परनिम्मितवसवत्ती सुखुमाव। यथा च दुक्खा, एवं सुखापि सब्बत्थ यथानुरूपं योजेतब्बा। **वत्थुवसेन** चापि हीनवत्थुका या काचि वेदना ओळारिका, पणीतवत्थुका सुखुमा। हीनप्पणीतभेदे या ओळारिका, सा हीना। या च सुखुमा, सा पणीताति वेदितब्बा। दूरपदं पन अकुसला वेदना कुसलाब्याकताहि वेदनाहि दूरे, सन्तिकपदं अकुसला वेदना अकुसलाय वेदनाय सन्तिकेतिआदिना नयेन विभत्तं। तस्मा अकुसला वेदना विसभागतो असंसट्ठतो असरिक्खतो च कुसलाब्याकताहि दूरे, तथा कुसलाब्याकता अकुसलाय। एस नयो सब्बवारेसु। अकुसला पन वेदना सभागतो च संसट्ठतो च सरिक्खतो च अकुसलाय सन्तिकेति। तंतंवेदनासम्पयुत्तानं पन सञ्ञादीनम्पि एवमेव वेदितब्बं।

२३. **सुतवा**ति आगमाधिगमसङ्खातेन बाहुसच्चेन समन्नागतत्ता सुतवा। **निब्बिन्दती**ति उक्कण्ठति। एत्थ च **निब्बिदा**ति वुट्ठानगामिनीविपस्सना अधिप्पेता। **निब्बिन्दं विरज्जती**ति एत्थ विरागवसेन चत्तारो मग्गा कथिता। **विरागा विमुच्चती**ति विरागेन मग्गेनेव हेतुभूतेन पटिप्पस्सद्धिविमुत्तिवसेन विमुच्चति। इमिना चत्तारि सामञ्ञफलानि कथितानि। **विमुत्तस्मिं विमुत्तमिति ञाणं होती**ति इमिना पन पच्चवेक्खणञाणं कथितं। **खीणा जाती**तिआदीहि तस्स भूमि। तेन हि ञाणेन अरियसावको पच्चवेक्खन्तो ''खीणा जाती''तिआदीनि पजानाति। कतमा पनस्स जाति खीणा, कथञ्च नं पजानातीति? न तावस्स अतीता जाति खीणा पुब्बेव खीणत्ता, न अनागता अनागते वायामाभावतो, न पच्चुप्पन्ना। या पन मग्गस्स अभावितत्ता उप्पज्जेय्य एकचतुपञ्चवोकारभवेसु एकचतुपञ्चक्खन्धप्पभेदा जाति, सा मग्गस्स भावितत्ता अनुप्पादधम्मतं आपज्जनेन खीणा, तं सो मग्गभावनाय पहीनकिलेसे पच्चवेक्खित्वा किलेसाभावे विज्जमानम्पि कम्मं आयतिं अप्पटिसन्धिकं होतीति जानन्तो पजानाति।

वुसितन्ति वुत्थं परिवुत्थं, कतं चरितं निट्ठितन्ति अत्थो। **ब्रह्मचरिय**न्ति मग्गब्रह्मचरियं। पुथुज्जनकल्याणकेन हि सद्धिं सत्त सेक्खा मग्गब्रह्मचरियं वसन्ति नाम, खीणासवो वुत्थवासो, तस्मा अरियसावको अत्तनो ब्रह्मचरियवासं

पच्चवेक्खन्तो ''वुसितं ब्रह्मचरिय''न्ति पजानाति। **कतं करणीय**न्ति चतूसु सच्चेसु चतूहि मग्गेहि परिञ्ञापहानसच्छिकिरियाभावनावसेन सोळसविधम्पि किच्चं निट्ठापितन्ति अत्थो। पुथुज्जनकल्याणकादयो हि तं किच्चं करोन्ति, खीणासवो कतकरणीयो। तस्मा अरियसावको अत्तनो करणीयं पच्चवेक्खन्तो ''कतं करणीय''न्ति पजानाति। **नापरं इत्थत्ताया**ति इदानि पुन इत्थभावाय एवंसोळसकिच्चभावाय, किलेसक्खयाय वा मग्गभावनाकिच्चं मे नत्थीति पजानाति। अथ वा **इत्थत्ताया**ति इत्थभावा इमस्मा एवंपकारा इदानि वत्तमानक्खन्धसन्ताना अपरं खन्धसन्तानं मय्हं नत्थि, इमे पन पञ्चक्खन्धा परिञ्ञाता तिट्ठन्ति छिन्नमूलका रुक्खा विय। ते चरिमकविञ्ञाणनिरोधेन अनुपादानो विय जातवेदो निब्बायिस्सन्तीति पजानाति।

२४. अत्तमना ते भिक्खू भगवतो भासितं अभिनन्दुन्ति ते भिक्खू सकमना तुट्ठमना, पीतिसोमनस्सेहि वा समत्तमना हुत्वा करवीकरुतमञ्जुना कण्णसुखेन पण्डितजनहदयानं अमताभिसेकसदिसेन ब्रह्मस्सरेन भासतो भगवतो वचनं सुकथितं सुलपितं ''एवमेतं भगवा, एवमेतं सुगता''ति मत्थकेन सम्पटिच्छन्ता अनुमोदिंसु चेव सम्पटिच्छिंसु चाति अत्थो। अयञ्हि **अभिनन्द**-सद्दो ''अभिनन्दति अभिवदती''तिआदीसु (सं॰ नि॰ ३.५; ४.११४, ११८) तण्हायपि आगतो। ''अन्नमेवाभिनन्दन्ति, उभये देवमानुसा''तिआदीसु (सं॰ नि॰ १.४३) उपगमनेपि।

''चिरप्पवासिं पुरिसं, दूरतो सोत्थिमागतं।
ञातिमित्ता सुहज्जा च, अभिनन्दन्ति आगत''न्ति॥ (ध॰ प॰ २१९; वि॰ व॰ ८६१) –

आदीसु सम्पटिच्छनेपि। ''अभिनन्दित्वा अनुमोदित्वा''तिआदीसु (म॰ नि॰ १.२०५) अनुमोदनेपि। स्वायमिध अनुमोदनसम्पटिच्छनेसु युज्जति। तेन वुत्तं ''अनुमोदिंसु चेव सम्पटिच्छिंसु चा''ति। **अनुपादाय आसवेहि चित्तानि विमुच्चिंसू**ति अनुप्पादनिरोधेन निरुज्झमानेहि आसवेहि अनुपादाय अग्गहेत्वा कञ्चि धम्मं ''अहं ममा''ति अनादियित्वाव चित्तानि विमुच्चिंसु। **छ अरहन्तो**ति भगवता सद्धिं छ जना अरहन्तो। अञ्ञेसं पन देवब्रह्मानम्पि अरहत्तप्पत्तिसम्भवतो इदं मनुस्सअरहन्तेयेव सन्धाय वुत्तन्ति आह **''छ मनुस्सा अरहन्तो होन्ती''**ति।

अनत्तलक्खणसुत्तवण्णना निट्ठिता।

पञ्चवग्गियकथा निट्ठिता।

यसस्स पब्बज्जाकथावण्णना

२५. इदानि यसस्स पब्बज्जं दस्सेतुं **''तेन खो पन समयेना''**तिआदि आरद्धं। तत्रायं अनुत्तानपदवण्णना – **हेमन्तिको**तिआदीसु (दी॰ नि॰ अट्ठ॰ २.४२; अ॰ नि॰ अट्ठ॰ २.३.३९) यत्थ सुखं होति हेमन्तकाले वसितुं, अयं हेमन्तिको। इतरेसुपि एसेव नयो। अयं पनेत्थ वचनत्थो – हेमन्ते वासो हेमन्तं उत्तरपदलोपेन, हेमन्तं अरहतीति **हेमन्तिको**। इतरेसुपि एसेव नयो। तत्थ वस्सिको पासादो नातिउच्चो होति नातिनीचो, द्वारवातपानानिपिस्स नातिबहूनि नातितनूनि, भूमत्थरणपच्चत्थरणखज्जभोज्जानिपेत्थ मिस्सकानेव वट्टन्ति। हेमन्तिके थम्भापि भित्तियोपि नीचा होन्ति, द्वारवातपानानि तनुकानि सुखुमछिद्दानि, उण्हप्पवेसनत्थाय भित्तिनिय्यूहानि हरियन्ति, भूमत्थरणपच्चत्थरणनिवासनपारुपनानि पनेत्थ उण्हविकिरियानि कम्बलादीनि वट्टन्ति, खज्जभोज्जं सिनिद्धं कटुकसन्निस्सितञ्च। गिम्हिके थम्भापि भित्तियोपि उच्चा होन्ति, द्वारवातपानानि पनेत्थ बहूनि विपुलजातानि होन्ति,

भूमत्थरणानि सीतविकिरियानि दुकूलमयानि वट्टन्ति, खज्जभोज्जानि मधुररससीतविकिरियानि, वातपानसमीपेसु चेत्थ नवा चाटियो ठपेत्वा उदकस्स पूरेत्वा नीलुप्पलादीहि सञ्छादेन्ति, तेसु तेसु पदेसेसु उदकयन्तानि करोन्ति, येहि देवे वस्सन्ते विय उदकधारा निक्खमन्ति।

निप्पुरिसेहीति पुरिसविरहितेहि। न केवलञ्चेत्थ तूरियानेव निप्पुरिसानि, सब्बट्ठानानिपि निप्पुरिसानेव। दोवारिकापि इत्थियोव, नहापनादिपरिकम्मकरापि इत्थियोव। पिता किर ''तथारूपं इस्सरियसुखसम्पत्तिं अनुभवमानस्स पुरिसं दिस्वा परिसङ्का उप्पज्जति, सा मे पुत्तस्स मा अहोसी''ति सब्बकिच्चेसु इत्थियोव ठपापेसि। **पञ्चहि कामगुणेही**ति रूपसद्दादीहि पञ्चहि कामकोट्ठासेहि। **समप्पितस्सा**ति सम्मा अप्पितस्स, उपेतस्साति अत्थो। **समङ्गीभूतस्सा**ति तस्सेव वेवचनं। **परिचारयमानस्सा**ति परितो चारयमानस्स, तस्मिं तस्मिं कामगुणे इन्द्रियानि चारयमानस्साति अत्थो। **आळम्बर**न्ति पणवं। **विकेसिक**न्ति मुत्तकेसं, विप्पकिण्णकेसन्ति अत्थो। **विक्खेळिक**न्ति विस्सन्दमानलालं। **विप्पलपन्तियो**ति विरुद्धं पलपन्तियो वा रुदन्तियो वा। **सुसानं मञ्ञे**ति आमकसुसानं विय अद्दस सकं परिजनन्ति सम्बन्धो। **उदानं उदानेसी**ति संवेगवसेन उदानं उदानेसि, संवेगवसप्पवत्तं वाचं निच्छारेसीति अत्थो।

२६. **इदं खो यसा**ति भगवा निब्बानं सन्धायाह। तञ्हि तण्हादीहि किलेसेहि अनुपद्दुतं अनुपस्सट्ठञ्च। **अनुपुब्बिं कथ**न्ति (दी॰ नि॰ अट्ठ॰ २.७५; म॰ नि॰ अट्ठ॰ २.६९) दानानन्तरं सीलं, सीलानन्तरं सग्गं, सग्गानन्तरं मग्गन्ति एवमनुपटिपाटिकथं। तत्थ **दानकथा** नाम ''इदं दानं नाम सुखानं निदानं, सम्पत्तीनं मूलं, भोगानं पतिट्ठा, विसमगतस्स ताणं लेणं गति परायणं, इधलोकपरलोकेसु दानसदिसो अवस्सयो पतिट्ठा आरम्मणं ताणं लेणं गति परायणं नत्थि। इदञ्हि अवस्सयट्ठेन रतनमयसीहासनसदिसं, पतिट्ठानट्ठेन महापथवीसदिसं, आरम्मणट्ठेन आलम्बनरज्जुसदिसं, इदञ्हि दुक्खनित्थरणट्ठेन नावा, समस्सासनट्ठेन सङ्गामसूरो, भयपरित्ताणट्ठेन सुसङ्खतनगरं, मच्छेरमलादीहि अनुपलित्तट्ठेन पदुमं, तेसं निदहनट्ठेन अग्गि, दुरासदट्ठेन आसीविसो, असन्तासनट्ठेन सीहो, बलवन्तट्ठेन हत्थी, अभिमङ्गलसम्मतट्ठेन सेतउसभो, खेमन्तभूमिसम्पापनट्ठेन वलाहको अस्सराजा। दानं नामेतं मया गतमग्गो, मय्हेवेसो वंसो, मया दस पारमियो पूरेन्तेन वेलाममहायञ्ञा महागोविन्दमहायञ्ञा महासुदस्सनमहायञ्ञा वेस्सन्तरमहायञ्ञाति अनेके महायञ्ञा पवत्तिता, ससभूतेन जलिते अग्गिक्खन्धे अत्तानं निय्यातेन्तेन सम्पत्तयाचकानं चित्तं गहितं। दानञ्हि लोके सक्कसम्पत्तिं देति, मारसम्पत्तिं ब्रह्मसम्पत्तिं चक्कवत्तिसम्पत्तिं सावकपारमिञाणं पच्चेकबोधिञाणं अभिसम्बोधिञाणं देती''ति एवमादिना दानगुणप्पटिसंयुत्तकथा।

यस्मा पन दानं ददन्तो सीलं समादातुं सक्कोति, तस्मा तदनन्तरं सीलकथं कथेसि। दानञ्हि नाम दक्खिणेय्येसु हितज्झासयेन पूजनज्झासयेन वा अत्तनो सन्तकस्स परेसं परिच्चजनं, तस्मा दायको सत्तेसु एकन्तहितज्झासयो पुरिसपुग्गलो, परेसं वा सन्तकं हरतीति अट्ठानमेतं। तस्मा दानं ददन्तो सीलं समादातुं सक्कोतीति दानानन्तरं सीलं वुत्तं। अपिच **दानकथा** ताव पचुरजनेसुपि पवत्तिया सब्बसाधारणत्ता सुकरत्ता सीले पतिट्ठानस्स उपायभावतो च आदितो कथिता। परिच्चागसीलो हि पुग्गलो परिग्गहवत्थूसु निस्सङ्गभावतो सुखेनेव सीलानि समादियति, तत्थ च सुप्पतिट्ठितो होति। सीलेन दायकपटिग्गाहकविसुद्धितो परानुग्गहं वत्वा परपीळानिवत्तिवचनतो किरियधम्मं वत्वा अकिरियधम्मवचनतो भोगयससम्पत्तिहेतुं वत्वा भवसम्पत्तिहेतुवचनतो च दानकथानन्तरं सीलकथा कथिता।

सीलकथा नाम ''सीलं नामेतं अवस्सयो पतिट्ठा आरम्मणं ताणं लेणं गति परायणं। सीलं नामेतं मम वंसो, अहं सङ्खपालनागराजकाले भूरिदत्तनागराजकाले चम्पेय्यनागराजकाले सीलवराजकाले मातुपोसकहत्थिराजकाले

छद्दन्तहत्थिराजकालेति अनन्तेसु अत्तभावेसु सीलं परिपूरेसिं। इधलोकपरलोकसम्पत्तीनञ्हि सीलसदिसो अवस्सयो सीलसदिसा पतिट्ठा आरम्मणं ताणं लेणं गति परायणं नत्थि, सीलालङ्कारसदिसो अलङ्कारो नत्थि, सीलपुप्फसदिसं पुप्फं नत्थि, सीलगन्धसदिसो गन्धो नत्थि। सीलालङ्कारेन हि अलङ्कतं सीलकुसुमपिळन्धनं सीलगन्धानुलित्तं सदेवकोपि लोको ओलोकेन्तो तित्तिं न गच्छती''ति एवमादिसीलगुणप्पटिसंयुत्तकथा।

इदं पन सीलं निस्साय अयं सग्गो लब्भतीति दस्सनत्थं सीलानन्तरं सग्गकथं कथेसि। **सग्गकथा** नाम ''अयं सग्गो नाम इट्ठो कन्तो मनापो, निच्चमेत्थ कीळा, निच्चं सम्पत्तियो लब्भन्ति, चातुमहाराजिका देवा नवुतिवस्ससतसहस्सानि दिब्बसुखं दिब्बसम्पत्तिं पटिलभन्ति, तावतिंसा तिस्सो च वस्सकोटियो सट्ठि च वस्ससतसहस्सानी''ति एवमादिसग्गगुणपटिसंयुत्तकथा। सग्गसम्पत्तिं कथयन्तानञ्हि बुद्धानं मुखं नप्पहोति। वुत्तम्पि चेतं ''अनेकपरियायेन खो अहं, भिक्खवे, सग्गकथं कथेय्य''न्तिआदि।

एवं सग्गकथाय पलोभेत्वा पुन हत्थिं अलङ्करित्वा तस्स सोण्डं छिन्दन्तो विय अयम्पि सग्गो अनिच्चो अद्धुवो, न एत्थ छन्दरागो कातब्बोति दस्सनत्थं ''अप्पस्सादा कामा बहुदुक्खा बहुपायासा, आदीनवो एत्थ भिय्यो''तिआदिना (म० नि० १.१७७; पाचि० ४१७) नयेन कामानं आदीनवं ओकारं संकिलेसं कथेसि। तत्थ **आदीनवो**ति दोसो, अनिच्चतादिना अप्पस्सादतादिना च दूसितभावोति अत्थो। अथ वा आदीनं वाति पवत्ततीति **आदीनवो,** परमकपणता। तथा च कामा यथाभूतं पच्चवेक्खन्तानं पच्चुपतिट्ठन्ति। **ओकारो**ति लामकभावो निहीनभावो असेट्ठेहि सेवितब्बता सेट्ठेहि न सेवितब्बता च। **संकिलेसो**ति तेहि सत्तानं संकिलिस्सनं, विबाधेतब्बता उपतापेतब्बताति अत्थो।

एवं कामादीनवेन तज्जेत्वा **नेक्खम्मे आनिसंसं पकासेसि**। यत्तका च कामेसु आदीनवा, पटिपक्खतो तत्तकाव नेक्खम्मे आनिसंसा। अपिच ''नेक्खम्मं नामेतं असम्बाधं असंकिलिट्ठं, निक्खन्तं कामेहि, निक्खन्तं कामसञ्ञाय, निक्खन्तं कामवितक्केहि, निक्खन्तं कामपरिळाहेहि, निक्खन्तं ब्यापारतो''तिआदिना नयेन नेक्खम्मे आनिसंसं पकासेसि, पब्बज्जाय झानादीसु च गुणे विभावेसि वण्णेसि। एत्थ च सग्गं कथेत्वा स्वायं सग्गो रागादीहि उपक्किलिट्ठो, सब्बथापि अनुपक्किलिट्ठो अरियमग्गोति दस्सनत्थं सग्गानन्तरं मग्गो कथेतब्बो। मग्गञ्च कथेन्तेन तदधिगमुपायसन्दस्सनत्थं सग्गपरियापन्नापि पगेव इतरे सब्बेपि कामा नाम बह्वादीनवा अनिच्चा अद्धुवा विपरिणामधम्माति कामानं आदीनवो, हीना गम्मा पोथुज्जनिका अनरिया अनत्थसञ्हिताति तेसं ओकारो लामकभावो, सब्बेपि भवा किलेसानं वत्थुभूताति तत्थ संकिलेसो, सब्बसंकिलेसविप्पमुत्तं निब्बानन्ति नेक्खम्मे आनिसंसो च कथेतब्बोति कामेसु आदीनवो ओकारो संकिलेसो नेक्खम्मे च आनिसंसो पकासितोति दट्ठब्बं।

कल्लचित्तन्ति कम्मनियचित्तं, हेट्ठा पवत्तितदेसनाय अस्सद्धियादीनं चित्तदोसानं विगतत्ता उपरिदेसनाय भाजनभावूपगमनेन कम्मक्खमचित्तन्ति अत्थो। अस्सद्धियादयो वा यस्मा चित्तस्स रोगभूता तदा तस्स विगता, तस्मा कल्लचित्तं अरोगचित्तन्ति अत्थो। दिट्ठिमानादिकिलेसविगमेन **मुदुचित्तं,** कामच्छन्दादिविगमेन **विनीवरणचित्तं,** सम्मापटिपत्तियं उळारपीतिपामोज्जयोगेन **उदग्गचित्तं**। तत्थ सद्धासम्पत्तिया पसन्नचित्तं यदा भगवा अञ्ञासीति सम्बन्धो। अथ वा **कल्लचित्त**न्ति कामच्छन्दविगमेन अरोगचित्तं। **मुदुचित्त**न्ति ब्यापादविगमेन मेत्तावसेन अकठिनचित्तं। **विनीवरणचित्त**न्ति उद्धच्चकुक्कुच्चविगमेन विक्खेपस्स विगतत्ता तेन अपिहितचित्तं। **उदग्गचित्त**न्ति थिनमिद्धविगमेन सम्पग्गहवसेन अलीनचित्तं। **पसन्नचित्त**न्ति विचिकिच्छाविगमेन सम्मापटिपत्तियं अधिमुत्तचित्तन्ति एवम्पेत्थ अत्थो वेदितब्बो। **सामुक्कंसिका**ति सामं उक्कंसिका, अत्तनायेव उद्धरित्वा गहिता, सयम्भूञाणेन दिट्ठा असाधारणा अञ्ञेसन्ति

अत्थो। का च पन साति? अरियसच्चदेसना। तेनेवाह ''दुक्खं समुदयं निरोधं मग्ग''न्ति।

सेय्यथापीतिआदिना उपमावसेन तस्स किलेसप्पहानं अरियमग्गुप्पादञ्च दस्सेति। **अपगतकाळक**न्ति विगतकाळकं। **सम्मदेवा**ति सुट्ठु एव। **रजन**न्ति नीलपीतादिरङ्गजातं। **पटिग्गण्हेय्या**ति गण्हेय्य, पभस्सरं भवेय्य। **तस्मिंयेव आसने**ति तस्संयेव निसज्जायं। एतेनस्स लहुविपस्सकता तिक्खपञ्ञता सुखपटिपदखिप्पाभिञ्ञता च दस्सिता होति। **विरज**न्तिआदि वुत्तनयमेव। तत्रिदं उपमासंसन्दनं – वत्थं विय चित्तं, वत्थस्स आगन्तुकमलेहि किलिट्ठभावो विय चित्तस्स रागादिमलेहि संकिलिट्ठभावो, धोवनसिला विय अनुपुब्बिकथा, उदकं विय सद्धा, उदकेन तेमेत्वा तेमेत्वा ऊसगोमयछारिकखारकेहि काळकपदेसे सम्मद्दित्वा वत्थस्स धोवनपयोगो विय सद्धासिनेहेन तेमेत्वा तेमेत्वा सतिसमाधिपञ्ञाहि दोसे सिथिले कत्वा सीलसुतादिविधिना चित्तस्स सोधने वीरियारम्भो, तेन पयोगेन वत्थे काळकापगमो विय वीरियारम्भेन किलेसविक्खम्भनं, रङ्गजातं विय अरियमग्गो, तेन सुद्धस्स वत्थस्स पभस्सरभावो विय विक्खम्भितकिलेसस्स चित्तस्स मग्गेन परियोदपनन्ति।

२७. **अस्सदूते**ति आरुळ्हअस्से दूते। **इद्धाभिसङ्खार**न्ति इद्धिकिरियं। **अभिसङ्खरेसी**ति अभिसङ्खरि, अकासीति अत्थो। किमत्थन्ति चे? उभिन्नं पटिलभितब्बविसेसन्तरायनिसेधनत्थं। यदि हि सो पुत्तं पस्सेय्य, पुत्तस्सपि अरहत्तप्पत्ति सेट्ठिस्सपि धम्मचक्खुपटिलाभो न सिया। अदिट्ठसच्चोपि हि ''देहि ते मातुया जीवित''न्ति याचन्तो कथञ्हि नाम विक्खेपं पटिबाहित्वा भगवतो धम्मदेसनानुसारेन ञाणं पेसेत्वा धम्मचक्खुं पटिलभेय्य, यसो च एवं तेन याचियमानो कथं तं विक्खेपं पटिबाहित्वा अरहत्ते पतिट्ठहेय्य।

एतदवोचाति भगवतो धम्मदेसनं अब्भनुमोदमानो एतं ''अभिक्कन्तं भन्ते''तिआदिवचनं अवोच। **अभिक्कन्त**-सद्दो चायमिध अब्भनुमोदने, तस्मा साधु साधु भन्तेति वुत्तं होति।

''भये कोधे पसंसायं, तुरिते कोतूहलच्छरे।
हासे सोके पसादे च, करे आमेडितं बुधो''ति॥ –

इमिनाव लक्खणेन इध पसादवसेन पसंसावसेन चायं द्विक्खत्तुं वुत्तोति वेदितब्बो। **सेय्यथापी**तिआदिना चतूहि उपमाहि भगवतो देसनं थोमेति। तत्थ **निक्कुज्जित**न्ति अधोमुखठपितं, हेट्ठामुखजातं वा। **उक्कुज्जेय्या**ति उपरिमुखं करेय्य। **पटिच्छन्न**न्ति तिणपण्णादिछादितं। **विवरेय्या**ति उग्घाटेय्य। **मूळ्हस्सा**ति दिसामूळ्हस्स। **मग्गं आचिक्खेय्या**ति हत्थे गहेत्वा ''एस मग्गो''ति वदेय्य। **अन्धकारे**ति काळपक्खचातुद्दसी अड्ढरत्ति घनवनसण्डमेघपटलेहि चतुरङ्गतमे।

सीलब्बतपरामासन्ति सीलञ्च वतञ्च परामसित्वा गहितग्गहणमत्तं। **सारतो पच्चागच्छन्तो**ति सारभावेन जानन्तो। **अब्यापज्जाधिमुत्तो**ति अब्यापज्जं अरहत्तं ब्याकरोति। इमिनाव नयेन सब्बवारेसु अत्थो दट्ठब्बो। अपिचेत्थ ''नेक्खम्माधिमुत्तोति इमस्मिंयेव अरहत्तं कथितं, सेसेसु पञ्चसु निब्बान''न्ति एके वदन्ति। अपरे ''असम्मोहाधिमुत्तोति एत्थेव निब्बानं कथितं, सेसेसु अरहत्त''न्ति वदन्ति। अयं पनेत्थ सारो – ''सब्बेस्वेवेतेसु अरहत्तम्पि निब्बानम्पि कथितमेवाति।

भुसाति बलवन्तो दिब्बरूपसदिसा। **नेवस्स चित्तं परियादियन्ती**ति एतस्स खीणासवस्स चित्तं गहेत्वा ठातुं न सक्कोन्ति। किलेसा हि उप्पज्जमाना चित्तं गण्हन्ति नाम। **अमिस्सीकत**न्ति अमिस्सकतं। किलेसा हि आरम्मणेन सद्धिं चित्तं मिस्सं करोन्ति, तेसं अभावा अमिस्सीकतं। **ठित**न्ति पतिट्ठितं। **आनेञ्जप्पत्त**न्ति अचलनप्पत्तं। **वयञ्चस्सानुपस्सती**ति तस्स चेस चित्तस्स उप्पादम्पि वयम्पि पस्सति। **भुसा वातवुट्ठी**ति बलवा वातक्खन्धो। **नेव नं सङ्कम्पेय्या**ति एकभागेन चालेतुं न सक्कुणेय्य। **न सम्पकम्पेय्या**ति थूणं विय सब्बभागतो कम्पेतुं न सक्कुणेय्य। **न सम्पवेधेय्या**ति वेधेत्वा पवेधेत्वा पातेतुं न सक्कुणेय्य।

नेक्खम्मं अधिमुत्तस्साति अरहत्तं पटिविज्झित्वा ठितस्स। सेसपदेसुपि अरहत्तमेव कथितं। **उपादानक्खयस्स चा**ति उपयोगत्थे सामिवचनं। **असम्मोहञ्च चेतसो**ति चित्तस्स च असम्मोहं अधिमुत्तस्स। **दिस्वा आयतनुप्पाद**न्ति आयतनानं उप्पादञ्च वयञ्च दिस्वा। **सम्मा चित्तं विमुच्चती**ति सम्मा हेतुना नयेन इमाय विपस्सनाय पटिपत्तिया फलसमापत्तिवसेन

चित्तं विमुच्चति, निब्बानारम्मणे अधिमुच्चति। अथ वा इमिना खीणासवस्स पुब्बभागपटिपदा कथिता। तस्स हि आयतनुप्पादं दिस्वा इमाय विपस्सनाय अधिगतस्स अरियमग्गस्स आनुभावेन सब्बकिलेसेहि सम्मा चित्तं विमुच्चति। एवं **तस्स सम्मा विमुत्तस्स...पे०... न विज्जति**। तत्थ **सन्तचित्तस्सा**ति निब्बुतचित्तस्स। सेसमेत्थ उत्तानत्थमेव।

सोणस्स पब्बज्जाकथावण्णना निट्ठिता।

सब्बनीलिकादिपटिक्खेपकथावण्णना

२४६. **अद्दारिट्ठकवण्णा**ति अभिनवारिट्ठफलवण्णा। उदकेन तिन्तकाकपत्तवण्णातिपि वदन्ति।

अज्झारामे उपाहनपटिक्खेपकथावण्णना

२४८. अभिजीवन्ति एतेनाति **अभिजीवनिकं**। किन्तं? सिप्पं। तेनाह **''येन सिप्पेना''**तिआदि।

कट्ठपादुकादिपटिक्खेपकथावण्णना

२५१. **उण्णाहि कतपादुका**ति उण्णालोममयकम्बलेहि, उण्णालोमेहि एव वा कतपादुका। **न, भिक्खवे, गावीनं विसाणेसु गहेतब्ब**न्तिआदीसु ''मोक्खाधिप्पायेन विसाणादीसु गहेतुं वट्टती''ति **गण्ठिपदेसु** वुत्तं।

यानादिपटिक्खेपकथावण्णना

२५३. **अनुजानामि, भिक्खवे, पुरिसयुत्तं हत्थवट्टक**न्ति एत्थ ''अनुजानामि, भिक्खवे, पुरिसयुत्तं, अनुजानामि, भिक्खवे, हत्थवट्टक''न्ति एवं पच्चेकवाक्यपरिसमापनं अधिप्पेतन्ति आह **''पुरिसयुत्तं इत्थिसारथि वा...पे०... पुरिसा वा, वट्टतियेवा''**ति। **पीठकसिविक**न्ति पीठकयानं। **पाटङ्कि**न्ति अन्दोलिकायेतं अधिवचनं।

उच्चासयनमहासयनपटिक्खेपकथावण्णना

२५४. **वाळरूपानी**ति आहरिमानि वाळरूपानि। ''अकप्पियरूपाकुलो अकप्पियमञ्चो पल्लङ्को''ति **सारसमासे** वुत्तं। ''**दीघलोमको महाकोजवो**ति चतुरङ्गुलाधिकलोमो काळकोजवो। ''चतुरङ्गुलाधिकानि किर तस्स लोमानी''ति वचनतो चतुरङ्गुलतो हेट्ठा वट्टतीति वदन्ति। **वानचित्रो उण्णामयत्थरणो**ति भित्तिच्छेदादिवसेन विचित्रो उण्णामयत्थरणो। **घनपुप्फको उण्णामयत्थरणो**ति उण्णामयलोहितत्थरणो। **पकतितूलिका**ति रुक्खतूललतातूलपोटकीतूलसङ्खातानं तिण्णं तूलानं अञ्ञतरपुण्णा तूलिका। ''**उद्दलोमी**ति उभतोदसं उण्णामयत्थरणं। **एकन्तलोमी**ति एकतोदसं उण्णामयत्थरण''न्ति **दीघनिकायट्ठकथायं** (दी० नि० अट्ठ० १.१५) वुत्तं, **सारसमासे** पन ''उद्दलोमीति एकतो उग्गतपुप्फं। एकन्तलोमीति उभतो उग्गतपुप्फ''न्ति वुत्तं। ''**कोसेय्यकट्टिस्समय**न्ति कोसेय्यकसटमय''न्ति **आचरियधम्मपालत्थेरेन** वुत्तं। **सुद्धकोसेय्य**न्ति रतनपरिसिब्बनरहितं। **दीघनिकायट्ठकथायं** पनेत्थ ''ठपेत्वा तूलिकं सब्बानेव गोनकादीनि रतनपरिसिब्बितानि वट्टन्ती''ति वुत्तं। तत्थ ''ठपेत्वा तूलिक''न्ति एतेन रतनपरिसिब्बनरहितापि तूलिका न वट्टतीति दीपेति। ''रतनपरिसिब्बितानि वट्टन्ती''ति इमिना पन यानि रतनपरिसिब्बितानि, तानि भूमत्थरणवसेन यथानुरूपं मञ्चादीसु च उपनेतुं वट्टतीति दीपितन्ति वेदितब्बं। एत्थ च विनयपरियायं पत्वा गरुके ठातब्बत्ता इध वुत्तनयेनेवेत्थ विनिच्छयो वेदितब्बो। सुत्तन्तिकदेसनायं पन गहट्ठानम्पि वसेन वुत्तत्ता तेसं सङ्गण्हनत्थं ''ठपेत्वा तूलिकं...पे०... वट्टन्ती''ति वुत्तन्ति अपरे।

अजिनचम्मेहीति अजिनमिगचम्मेहि। तानि किर चम्मानि सुखुमतरानि, तस्मा दुपट्टतिपट्टानि कत्वा सिब्बन्ति। तेन वुत्तं "**अजिनपवेणी**"ति। उत्तरं उपरिभागं छादेतीति **उत्तरच्छदो,** वितानं, तञ्च लोहितवितानं इधाधिप्पेतन्ति आह "**उपरिबद्धेन रत्तवितानेना**"ति। "रत्तवितानेसु च कासावं वट्टति, कुसुम्भादिरत्तमेव न वट्टती"ति **गण्ठिपदेसु** वुत्तं। **महाउपधान**न्ति पमाणातिक्कन्तं उपधानं। एत्थ च किञ्चापि **दीघनिकायट्ठकथायं** (दी॰ नि अट्ठ॰ १.१५) "अलोहितकानि द्वेपि वट्टन्तियेव, ततो उत्तरि लभित्वा अञ्ञेसं दातब्बानि, दातुं असक्कोन्तो मञ्चे तिरियं अत्थरित्वा उपरि पच्चत्थरणं दत्वा निपज्जितुम्पि लभती"ति अविसेसेन वुत्तं, **सेनासनक्खन्धकवण्णनायं** (चूळव॰ अट्ठ॰ २९७) पन "अगिलानस्स सीसुपधानञ्च पादुपधानञ्चाति द्वयमेव वट्टति, गिलानस्स बिम्बोहनानि सन्थरित्वा उपरि पच्चत्थरणं दत्वा निपज्जितुम्पि वट्टती"ति वुत्तत्ता गिलानोयेव मञ्चे तिरियं अत्थरित्वा निपज्जितुं लभतीति वेदितब्बं।

उच्चासयनमहासयनपटिक्खेपकथावण्णना निट्ठिता।

गिहिविकतानुञ्ञातादिकथावण्णना

२५६. अभिनिस्साय निसीदितुन्ति अपस्साय निसीदितुं।

सोणकुटिकण्णवत्थुकथावण्णना

२५७. पपतके पब्बतेति एत्थ "पवत्ते पब्बते"तिपि पठन्ति, पवत्तनामके पब्बतेति अत्थो। **सोणो उपासको**तिआदीसु (उदा॰ अट्ठ॰ ४६) नामेन सोणो नाम, तीहि सरणगमनेहि उपासकत्तपटिवेदनेन उपासको, कोटिअग्घनकस्स कण्णपिळन्धनस्स धारणेन "कोटिकण्णो"ति च वत्तब्बे "कुटिकण्णो"ति एवं अभिञ्ञातो, न सुकुमारसोणोति अधिप्पायो। अयञ्हि आयस्मतो महाकच्चानस्स सन्तिके धम्मं सुत्वा सासने अभिप्पसन्नो सरणेसु च सीलेसु च पतिट्ठितो पपतके पब्बते छायूदकसम्पन्ने ठाने विहारं कारेत्वा थेरं तत्थ वसापेत्वा चतूहि पच्चयेहि उपट्ठाति। तेन वुत्तं "**आयस्मतो महाकच्चानस्स उपट्ठाको होती**"ति।

सो कालेन कालं थेरस्स उपट्ठानं गच्छति, थेरो चस्स धम्मं देसेति, तेन संवेगबहुलो धम्मचरियायं उस्साहजातो विहरति। सो एकदा सत्थेन सद्धिं वाणिज्जत्थाय उज्जेनिं गच्छन्तो अन्तरामग्गे अटवियं सत्थे निविट्ठे रत्तियं जनसम्बाधभयेन एकमन्तं अपक्कम्म निद्दं उपगञ्छि। सत्थो पच्चूसवेलायं उट्ठाय गतो, न एकोपि सोणं पबोधेसि, सब्बे विस्सरित्वा अगमिंसु। सो पभाताय रत्तिया पबुज्झित्वा उट्ठाय कञ्चि अपस्सन्तो सत्थेन गतमग्गं गहेत्वा सीघं सीघं गच्छन्तो एकं वटरुक्खं उपगञ्छि। तत्थ अद्दस एकं महाकायं विरूपदस्सनं बीभच्छं पुरिसं अट्ठितो मुत्तानि अत्तनो मंसानि सयमेव खादन्तं, दिस्वान "कोसि त्व"न्ति पुच्छि। पेतोस्मि, भन्तेति। कस्मा एवं करोसीति? अत्तनो पुब्बकम्मेनाति। किं पन तं कम्मन्ति? अहं पुब्बे भारुकच्छनगरवासी कूटवाणिजो हुत्वा परेसं सन्तकं वञ्चेत्वा खादिं, समणे च भिक्खाय उपगते "तुम्हाकं मंसं खादथा"ति अक्कोसिं, तेन कम्मेन एतरहि इमं दुक्खं अनुभवामीति। तं सुत्वा सोणो अतिविय संवेगं पटिलभि।

ततो परं गच्छन्तो मुखतो पग्घरितकाळलोहिते द्वे पेतदारके पस्सित्वा तथेव पुच्छि, तेपिस्स अत्तनो कम्मं कथेसुं। ते किर भारुकच्छनगरे दारककाले गन्धवाणिज्जाय जीविकं कप्पेन्ता अत्तनो मातरि खीणासवे निमन्तेत्वा भोजेन्तिया गेहं गन्त्वा "अम्हाकं सन्तकं कस्मा समणानं देसि, तया दिन्नं भोजनं भुञ्जनकसमणानं मुखतो काळलोहितं पग्घरतू"ति

अक्कोसिंसु। ते तेन कम्मेन निरये पच्चित्वा तस्स विपाकावसेसेन पेतयोनियं निब्बत्तित्वा तदा इमं दुक्खं अनुभवन्ति। तम्पि सुत्वा सोणो अतिविय संवेगजातो अहोसि।

सो उज्जेनिं गन्त्वा तं करणीयं तीरेत्वा कुररघरं पच्चागतो थेरं उपसङ्कमित्वा कतपटिसन्थारो तमत्थं आरोचेसि। थेरोपिस्स पवत्तिनिवत्तीसु आदीनवानिसंसे विभावेन्तो धम्मं देसेसि। सो थेरं वन्दित्वा गेहं गतो सायमासं भुञ्जित्वा सयनं उपगतो थोकंयेव निद्दायित्वा पबुज्झित्वा सयनतले निसज्ज यथासुतं धम्मं पच्चवेक्खितुं आरद्धो। तस्स तं धम्मं पच्चवेक्खतो ते च पेतत्तभावे अनुस्सरतो संसारदुक्खं अतिविय भयानकं हुत्वा उपट्ठासि, पब्बज्जाय चित्तं नमि। सो विभाताय रत्तिया सरीरपटिजग्गनं कत्वा थेरं उपगन्त्वा अत्तनो अज्झासयं आरोचेत्वा पब्बज्जं याचि। तेन वुत्तं ''**अथ खो सोणो उपासको...पे०... पब्बाजेतु मं, भन्ते, अय्यो महाकच्चानो**''ति।

तत्थ **यथा यथा**तिआदिपदानं अयं सङ्खेपत्थो – येन येन आकारेन अय्यो महाकच्चानो धम्मं देसेति आचिक्खति पञ्ञपेति पट्ठपेति विवरति विभजति उत्तानिं करोति पकासेति, तेन तेन मे उपपरिक्खतो एवं होति ''यदेतं सिक्खत्तयब्रह्मचरियं एकम्पि दिवसं अखण्डं कत्वा चरिमकचित्तं पापेतब्बताय **एकन्तपरिपुण्णं,** एकदिवसम्पि किलेसमलेन अमलीनं कत्वा चरिमकचित्तं पापेतब्बताय **एकन्तपरिसुद्धं, सङ्खलिखितं** लिखितसङ्खसदिसं धोतसङ्खसप्पटिभागं चरितब्बं, इदं न सुकरं अगारं अज्झावसता अगारमज्झे वसन्तेन एकन्तपरिपुण्णं...पे०... चरितु''न्ति।

एवं अत्तनो परिवितक्कितं सोणो उपासको थेरस्स आरोचेत्वा तं पटिपज्जितुकामो ''**इच्छामहं भन्ते**''तिआदिमाह। थेरो पन ''न तावस्स ञाणं परिपाकं गत''न्ति उपधारेत्वा ञाणपरिपाकं आगमयमानो ''**दुक्करं खो**''तिआदिना पब्बज्जाछन्दं निवारेसि। तत्थ **एकसेय्य**न्ति अदुतियसेय्यं। एत्थ च सेय्यासीसेन ''एको तिट्ठति, एको गच्छति, एको निसीदती''तिआदिना नयेन वुत्तं चतूसु इरियापथेसु कायविवेकं दीपेति, न एकिका हुत्वा सयनमत्तं। **एकभत्त**न्ति ''एकभत्तिको होति रत्तूपरतो विरतो विकालभोजना''ति (दी० नि० १.१०, १९४; म० नि० १.२९३ अ० नि० ३.७१) एवं वुत्तं विकालभोजना विरतिं सन्धाय वदति। **ब्रह्मचरिय**न्ति मेथुनविरतिब्रह्मचरियं, सिक्खत्तयानुयोगसङ्खातं सासनब्रह्मचरियं वा। **इङ्घा**ति चोदनत्थे निपातो। **तत्थेवा**ति गेहेयेव। **बुद्धानं सासनं अनुयुञ्जा**ति निच्चसीलउपोसथसीलनियमादिभेदं पञ्चङ्गं अट्ठङ्गं दसङ्गञ्च सीलं तदनुरूपञ्च समाधिपञ्ञाभावनं अनुयुञ्ज। एतञ्हि उपासकेन पुब्बभागे अनुयुञ्जितब्बं बुद्धसासनं नाम। तेनाह ''**कालयुत्तं एकसेय्यं एकभत्तं ब्रह्मचरिय**''न्ति।

तत्थ **कालयुत्त**न्ति चातुद्दसीपञ्चद्दसीअट्ठमीपाटिहारिकपक्खसङ्खातेन कालेन युत्तं, यथावुत्तकाले वा तुय्हं अनुयुञ्जन्तस्स युत्तं पतिरूपं सक्कुणेय्यं, न सब्बकालं सब्बन्ति अधिप्पायो। सब्बमेतं ञाणस्स अपरिपक्कत्ता तस्स कामानं दुप्पहानताय सम्मा पटिपत्तियं योग्यं कारापेतुं वदति, न पब्बज्जाछन्दं निवारेतुं। **पब्बज्जाभिसङ्खारो**ति पब्बजितुं आरम्भो उस्साहो। **पटिप्पस्सम्भी**ति इन्द्रियानं अपरिपक्कत्ता संवेगस्स च नातितिक्खभावतो वूपसमि। किञ्चापि पटिप्पस्सम्भि, थेरेन वुत्तविधिं पन अनुतिट्ठन्तो कालेन कालं थेरं उपसङ्कमित्वा पयिरुपासन्तो धम्मं सुणाति। तस्स वुत्तनयेनेव दुतियम्पि पब्बज्जाय चित्तं उप्पज्जि, थेरस्स च आरोचेसि, दुतियम्पि थेरो पटिक्खिपि। ततियवारे पन ञाणस्स परिपक्कभावं ञत्वा ''इदानि नं पब्बाजेतुं कालो''ति थेरो पब्बाजेसि, पब्बजितञ्च तं तीणि संवच्छरानि अतिक्कमित्वा गणं परियेसित्वा उपसम्पादेसि। तं सन्धाय वुत्तं ''**दुतियम्पि खो सोणो...पे०... उपसम्पादेसी**''ति।

तत्थ **अप्पभिक्खुको**ति कतिपयभिक्खुको। तदा किर भिक्खू येभुय्येन मज्झिमदेसेयेव वसिंसु, तस्मा तत्थ कतिपया एव अहेसुं। ते च एकस्मिं गामे एको, एकस्मिं निगमे द्वेति एवं विसुं विसुं वसिंसु। **किच्छेना**ति दुक्खेन। **कसिरेना**ति

आयासेन। **ततो ततो**ति तस्मा तस्मा गामनिगमादितो। थेरेन हि कतिपये भिक्खू आनेत्वा अञ्ञेसु आनीयमानेसु पुब्बे आनीता केनचिदेव करणीयेन पक्कमिंसु, कञ्चि कालं आगमेत्वा पुन तेसु आनीयमानेसु इतरे पक्कमिंसु। एवं पुनप्पुनं आनयनेन सन्निपातो चिरेनेव अहोसि। थेरोपि तदा एकविहारी अहोसि। तेन वुत्तं "**तिण्णं वस्सानं...पे॰... सन्निपातापेत्वा**"ति।

वस्संवुत्थस्साति वस्सं उपगन्त्वा वुसितवतो। **एदिसो च एदिसो चा**ति एवरूपो च एवरूपो च। "एवरूपाय नाम रूपकायसम्पत्तिया समन्नागतो, एवरूपाय धम्मकायसम्पत्तिया समन्नागतो"ति **सुतोयेव मे सो भगवा। न च मया सम्मुखा दिट्ठो**ति एत्थ पन पुथुज्जनसद्धाय एव आयस्मा सोणो भगवन्तं दट्ठुकामो अहोसि। अपरभागे पन सत्थारा सद्धिं एकगन्धकुटियं वसित्वा पच्चूससमयं अज्झिट्ठो सोळस अट्ठकवग्गियानि सत्थु सम्मुखा अट्ठिं कत्वा मनसि कत्वा सब्बं चेतसा समन्नाहरित्वा अत्थधम्मपटिसंवेदी हुत्वा भणन्तो धम्मुपसञ्हितपामोज्जादिमुखेन समाहितो सरभञ्ञपरियोसाने विपस्सनं पट्ठपेत्वा सङ्खारे सम्मसन्तो अनुपुब्बेन अरहत्तं पापुणि। एतदत्थमेव हिस्स भगवता अत्तना सद्धिं एकगन्धकुटियं वासो आणत्तोति वदन्ति।

केचि पनाहु "न च मया सम्मुखा दिट्ठोति इदं रूपकायदस्सनमेव सन्धाय वुत्तं। आयस्मा हि सोणो पब्बजित्वा थेरस्स सन्तिके कम्मट्ठानं गहेत्वा घटेन्तो वायमन्तो अनुपसम्पन्नोव सोतापन्नो हुत्वा उपसम्पज्जित्वा 'उपासकापि सोतापन्ना होन्ति, अहम्पि सोतापन्नो, किमेत्थ चित्त'न्ति उपरिमग्गत्थाय विपस्सनं वड्ढेत्वा अन्तोवस्सेयेव छळभिञ्ञो हुत्वा विसुद्धिपवारणाय पवारेसि। अरियसच्चदस्सनेन भगवतो धम्मकायो दिट्ठो नाम होति। वुत्तञ्हेतं 'यो खो, वक्कलि, धम्मं पस्सति, सो मं पस्सती'ति (सं॰ नि॰ ३.८७)। तस्मास्स धम्मकायदस्सनं पगेव सिद्धं, पवारेत्वा पन रूपकायं दट्ठुकामो अहोसी"ति।

पासादिकन्तिआदिपदानं अत्थो अट्ठकथायमेव वुत्तो। तत्थ **विसूकायिकविप्फन्दितान**न्ति पटिपक्खभूतानं दिट्ठिचित्तविप्फन्दितानन्ति अत्थो। **पासादिक**न्ति (उदा॰ अट्ठ॰ १०) वा द्वत्तिंसमहापुरिसलक्खणअसीतिअनुब्यञ्जनब्यामप्पभाकेतुमालालङ्कताय समन्तपासादिकाय अत्तनो सरीरप्पभाय सम्पत्तिया रूपकायदस्सनब्यावटस्स जनस्स सब्बभागतो पसादावहं। **पसादनीय**न्ति दसबलचतुवेसारज्जछअसाधारणञाणअट्ठारसआवेणिकबुद्धधम्मप्पभुतिअपरिमाणगुणगणसमन्नागताय धम्मकायसम्पत्तिया परिक्खकजनस्स पसादनीयं पसीदितब्बयुत्तं पसादकं वा। **सन्तिन्द्रिय**न्ति चक्खादिपञ्चिन्द्रियलोलताविगमेन वूपसन्तपञ्चिन्द्रियं। **सन्तमानस**न्ति छट्ठस्स मनिन्द्रियस्स निब्बिसेवनभावूपगमनेन वूपसन्तमानसं। **उत्तमदमथसमथं अनुप्पत्त**न्ति लोकुत्तरपञ्ञाविमुत्तिचेतोविमुत्तिसङ्खातं उत्तमं दमथं समथञ्च अनुप्पत्वा अधिगन्त्वा ठितं। **दन्त**न्ति सुपरिसुद्धकायसमाचारताय हत्थपादकुक्कुच्चाभावतो दवादिअभावतो च कायेन दन्तं। **गुत्त**न्ति सुपरिसुद्धवचीसमाचारताय निरत्थकवाचाभावतो रवादिअभावतो च वाचाय गुत्तं। **यतिन्द्रिय**न्ति सुपरिसुद्धमनोसमाचारताय अरियिद्धियोगेन अब्यावटअप्पटिसङ्खुपेक्खाभावतो च मनिन्द्रियवसेन यतिन्द्रियं। **नाग**न्ति छन्दादिवसेन अगमनतो, पहीनानं रागादिकिलेसानं अपुनागमनतो अपच्चागमनतो कस्सचिपि आगुस्स सब्बथापि अकरणतो, पुनब्भवस्स च अगमनतोति इमेहि कारणेहि नागं। एत्थ च "पासादिक"न्ति इमिना रूपकायेन भगवतो पमाणभूततं दीपेति, "पसादनीय"न्ति इमिना धम्मकायेन। "सन्तिन्द्रिय"न्तिआदिना सेसेहि पमाणभूततं दीपेति, तेन चतुप्पमाणिके लोकसन्निवासे अनवसेसतो सत्तानं भगवतो पमाणभावो पकासितोति वेदितब्बो। **एकविहारे**ति एकगन्धकुटियं। गन्धकुटि हि इध "विहारो"ति अधिप्पेतो। **वत्थु**न्ति वसितुं।

२५८. **अज्झोकासे वीतिनामेत्वा**ति (उदा॰ अट्ठ॰ ४६) अज्झोकासे निसज्जाय वीतिनामेत्वा। ''यस्मा भगवा आयस्मतो सोणस्स समापत्तिसमापज्जनेन पटिसन्थारं करोन्तो सावकसाधारणा सब्बा समापत्तियो अनुलोमपटिलोमं समापज्जन्तो बहुदेव रत्तिं अज्झोकासे निसज्जाय वीतिनामेत्वा पादे पक्खालेत्वा विहारं पाविसि, तस्मा आयस्मापि सोणो भगवतो अधिप्पायं ञत्वा तदनुरूपं सब्बा ता समापत्तियो समापज्जन्तो बहुदेव रत्तिं अज्झोकासे निसज्जाय वीतिनामेत्वा पादे पक्खालेत्वा विहारं पाविसी''ति केचि वदन्ति। पविसित्वा च भगवता अनुञ्ञातो चीवरं तिरोकरणीयं कत्वापि भगवतो पादपस्से निसज्जाय वीतिनामेसि। **अज्झेसी**ति आणापेसि। **पटिभातु तं भिक्खु धम्मो भासितु**न्ति भिक्खु तुय्हं धम्मो भासितुं उपट्ठातु ञाणमुखं आगच्छतु, यथासुतं यथापरियत्तं धम्मं भणाहीति अत्थो।

सब्बानेव अट्ठकवग्गिकानीति अट्ठकवग्गभूतानि **कामसुत्ता**दीनि (महानि॰ १) सोळस सुत्तानि। **सरेन अभासी**ति सुत्तुस्सारणसरेन अभासि, सरभञ्ञवसेन कथेसीति अत्थो। **सरभञ्ञपरियोसाने**ति उस्सारणावसाने। **सुग्गहितानी**ति सम्मा उग्गहितानि। **सुमनसिकतानी**ति सुट्ठु मनसि कतानि। एकच्चो उग्गहणकाले सम्मा उग्गहेत्वापि पच्छा सज्झायादिवसेन मनसिकरणकाले ब्यञ्जनानि वा मिच्छा रोपेति, पदपच्चाभट्ठं वा करोति, न एवमयं। इमिना पन सम्मदेव यथुग्गहितं मनसि कतानि। तेन वुत्तं ''सुमनसिकतानीति सुट्ठु मनसि कतानी''ति। **सूपधारितानी**ति अत्थतोपि सुट्ठु उपधारितानि। अत्थे हि सुट्ठु उपधारिते सक्का पाळि सम्मा उस्सारेतुं। **कल्याणियापि वाचाय समन्नागतो**ति सिथिलधनितादीनं यथाविधानं वचनेन परिमण्डलपदब्यञ्जनाय पोरिया वाचाय समन्नागतो। **विस्सट्ठाया**ति विमुत्ताय। एतेनस्स विमुत्तवादितं दस्सेति। **अनेलगलाया**ति एलं वुच्चति दोसो, तं न पग्घरतीति अनेलगला, ताय निद्दोसायाति अत्थो। अथ वा **अनेलगलाया**ति अनेलाय च अगलाय च, निद्दोसाय अगलितपदब्यञ्जनाय अपरिहीनपदब्यञ्जनायाति अत्थो। तथा हि नं भगवा ''एतदग्गं, भिक्खवे, मम सावकानं भिक्खूनं कल्याणवाक्करणानं यदिदं सोणो कुटिकण्णो''ति (अ॰ नि॰ १.१९८, २०६) एतदग्गे ठपेसि। **अत्थस्स विञ्ञापनिया**ति यथाधिप्पेतं अत्थं ञापेतुं समत्थाय।

कतिवस्सोति सो किर मज्झिमवयस्स ततिये कोट्ठासे ठितो आकप्पसम्पन्नो च परेसं चिरतरपब्बजितो विय खायति। तं सन्धाय भगवा पुच्छीति केचि, तं अकारणं। एवं सन्तं समाधिसुखं अनुभवितुं युत्तो, एत्तकं कालं कस्मा पमादं आपन्नोसीति पन अनुयुञ्जितुं सत्था ''कतिवस्सोसी''ति तं पुच्छि। तेनेवाह **''किस्स पन त्वं भिक्खु एवं चिरं अकासी''**ति। तत्थ **किस्सा**ति किंकारणा। **एवं चिरं अकासी**ति एवं चिरायि, केन कारणेन एवं चिरकालं पब्बज्जं अनुपगन्त्वा अगारमज्झे वसीति अत्थो। **चिरं दिट्ठो मे**ति चिरेन चिरकालेन मया दिट्ठो। **कामेसू**ति वत्थुकामेसु किलेसकामेसु च। **आदीनवो**ति दोसो। **अपिचा**ति कामेसु आदीनवे केनचि पकारेन दिट्ठेपि न तावाहं घरावासतो निक्खमितुं असक्खिं। कस्मा? **सम्बाधो घरावासो,** उच्चावचेहि किच्चकरणीयेहि समुपब्यूळ्हो अगारियभावो। तेनेवाह **''बहुकिच्चो बहुकरणीयो''**ति।

एतमत्थं विदित्वाति कामेसु यथाभूतं आदीनवदस्सिनो चित्तं चिरायित्वापि घरावासे न पक्खन्दति, अञ्ञदत्थु पदुमपलासे उदकबिन्दु विय विनिवत्ततियेवाति एतमत्थं सब्बाकारतो विदित्वा। **इमं उदान**न्ति पवत्तिं निवत्तिञ्च सम्मदेव जानन्तो पवत्तियं तंनिमित्ते च न कदाचिपि रमतीति इदमत्थदीपकं इमं उदानं उदानेसि।

तत्थ **दिस्वा आदीनवं लोके**ति सब्बस्मिम्पि सङ्खारलोके ''अनिच्चो दुक्खो विपरिणामधम्मो''तिआदीनवं दोसं पञ्ञाचक्खुना पस्सित्वा। एतेन विपस्सनाचारो कथितो। **ञत्वा धम्मं निरूपधि**न्ति सब्बूपधिपटिनिस्सग्गत्ता निरुपधिं निब्बानधम्मं यथाभूतं ञत्वा, निस्सरणविवेकासङ्खतामतसभावतो मग्गञाणेन पटिविज्झित्वा। ''दिस्वा ञत्वा''ति इमेसं

पदानं ''घतं पिवित्वा बलं होति, सीहं दिस्वा भयं होति, पञ्ञाय चस्स दिस्वा आसवा परिक्खीणा होन्ती''तिआदीसु (म॰ नि॰ १.२७१) विय हेतुअत्थता दट्ठब्बा। **अरियो न रमती पापे**ति किलेसेहि आरकत्ता अरियो सप्पुरिसो अणुमत्तेपि पापे न रमति। कस्मा? **पापे न रमती सुची**ति सुविसुद्धकायसमाचारादिताय सुचि सुद्धपुग्गलो राजहंसो विय उच्चारट्ठाने पापे संकिलिट्ठधम्मे न रमति नाभिनन्दति। ''पापो न रमती सुचि''न्तिपि पाठो, तस्सत्थो – पापो पुग्गलो सुचिं अनवज्जं वोदानधम्मं न रमति, अञ्ञदत्थु गामसूकरादयो विय उच्चारट्ठानं असुचिं संकिलेसधम्मंयेव रमतीति पटिपक्खतो देसनं परिवत्तेति।

सोणकुटिकण्णवत्थुकथावण्णना निट्ठिता।

२५९. काळसीहोति काळमुखवानरजाति। सेसमेत्थ पाळितो अट्ठकथातो च सुविञ्ञेय्यमेवाति।

चम्मक्खन्धकवण्णना निट्ठिता।

६. भेसज्जक्खन्धकं

पञ्चभेसज्जादिकथावण्णना

२६१. भेसज्जक्खन्धके **नच्छादेन्ती**ति रुचिं न उप्पादेन्ति।

२६२. सुसुकाति समुद्दे भवा एका मच्छजाति। कुम्भीलातिपि वदन्ति। **संसट्ठ**न्ति परिस्सावितं। **तेलपरिभोगेना**ति सत्ताहकालिकपरिभोगं सन्धाय वुत्तं।

२६३. पिट्ठेहीति पिसितेहि। **उब्भिदं** नाम ऊसरपंसुमयं।

२६४. छकणन्ति गोमयं। **पाकतिकचुण्णं** नाम अपक्ककसावचुण्णं। तेन ठपेत्वा गन्धचुण्णं सब्बं वट्टतीति वदन्ति।

२६५. सुवण्णगेरुकोति सुवण्णतुत्थादि। **अञ्जनूपपिसन**न्ति अञ्जनत्थाय उपपिसितब्बं यं किञ्चि चुण्णजातं।

२६८. सामं गहेत्वाति एत्थ सप्पदट्ठस्स अत्थाय अञ्ञेन भिक्खुना गहितम्पि सामं गहितसङ्ख्यमेव गच्छतीति वेदितब्बं।

२६९. घरदिन्नकाबाधो नाम वसीकरणत्थाय घरणिया दिन्नभेसज्जसमुट्ठितो आबाधो। तेनाह **''वसीकरणपाणकसमुट्ठितरोगो''**ति। **घर**-सद्दो चेत्थ अभेदेन घरणिया वत्तमानो अधिप्पेतो। **''अकटयूसेना**ति अनभिसङ्खतेन मुग्गयूसेन। **कटाकटेना**ति मुग्गे पचित्वा अचालेत्वाव परिस्सावितेन मुग्गसूपेना''ति **गण्ठिपदेसु** वुत्तं।

गुळादिअनुजाननकथावण्णना

२७२. गुळकरणन्ति गुळकरणट्ठानं, उच्छुसालन्ति वुत्तं होति।

२७४. अविस्सत्थाति सासङ्का।

२७६. अप्पमत्तकेपि पवारेन्तीति अप्पमत्तकेपि गहिते पवारेन्ति, ''बहुम्हि गहिते अञ्ञेसं नप्पहोती''ति मञ्ञमाना अप्पमत्तकं गहेत्वा पवारेन्तीति अधिप्पायो। **पटिसङ्खापि पटिक्खिपन्ती**ति ''दिवा भोजनत्थाय भविस्सती''ति सल्लक्खेत्वापि पटिक्खिपन्ति।

२७९. सम्बाधे दहनकम्मं पटिक्खेपाभावो वट्टति।

२८०. उभतोपसन्नाति उभयतो पसन्ना। **माघातो**ति ''मा घातेथ पाणिनो''ति एवं माघातघोसितदिवसो।

यागुमधुगोळकादिकथावण्णना

२८२. मधुगोळकन्ति सक्करादिसंयुत्तपूवं। **आयुं देती**ति आयुदानं देति। **वण्ण**न्ति सरीरवण्णं। **सुख**न्ति कायिकचेतसिकसुखं। **बल**न्ति सरीरथामं। **पटिभान**न्ति युत्तमुत्तपटिभानं। **वातं अनुलोमेती**ति वातं अनुलोमेत्वा हरति। **वत्थिं सोधेती**ति धमनियो सुद्धं करोति। **आमावसेसं पाचेती**ति सचे आमावसेसकं होति, तं पाचेति। **अनुप्पवेच्छती**ति देति। वातञ्च ब्यपनेतीति सम्बन्धितब्बं।

२८३. ननु च ''परम्परभोजनेन कारेतब्बो''ति कस्मा वुत्तं। परम्परभोजनञ्हि पञ्चन्नं भोजनानं अञ्ञतरेन निमन्तितस्स तं ठपेत्वा अञ्ञं पञ्चन्नं भोजनानं अञ्ञतरं भुञ्जन्तस्स होति, इमे च भिक्खू भोज्जयागुं परिभुञ्जिंसु, पञ्चसु भोजनेसु अञ्ञतरन्ति आह **''भोज्जयागुया हि पवारणा होती''**ति। यस्मा पञ्चन्नं भोजनानं अञ्ञतरं पटिक्खिपन्तस्स वुत्ता पवारणा भोज्जयागुं पटिक्खिपन्तस्सपि होतियेव, तस्मा भोज्जयागुपि ओदनगतिकायेवाति अधिप्पायो।

२८४. सुखुमोजं पक्खिपिंसूति ''भगवा परिभुञ्जिस्सती''ति मञ्ञमाना पक्खिपिंसु।

पाटलिगामवत्थुकथावण्णना

२८५. पाटलिगामोति (उदा॰ अट्ठ॰ ७६) एवंनामको मगधरट्ठे एको गामो। तस्स किर गामस्स मापनदिवसे गामङ्गणट्ठाने द्वे तयो पाटलङ्कुरा पथवितो उब्भिज्जित्वा निक्खमिंसु। तेन तं ''पाटलिगामो'' त्वेव वोहरिंसु। **तदवसरी**ति तं पाटलिगामं अवसरि अनुपापुणि। **पाटलिगामिका**ति पाटलिगामवासिनो। **उपासका**ति ते किर भगवतो पठमदस्सनेन केचि सरणेसु च सीलेसु च पतिट्ठिता। तेन वुत्तं ''उपासका''ति। **येन भगवा तेनुपसङ्कमिंसू**ति पाटलिगामे किर अजातसत्तुनो लिच्छविराजूनञ्च मनुस्सा कालेन कालं गन्त्वा गेहसामिके गेहतो नीहरित्वा मासम्पि अड्ढमासम्पि वसन्ति। तेन पाटलिगामवासिनो मनुस्सा निच्चुपद्दुता ''एतेसञ्चेव आगतकाले वसनट्ठानं भविस्सतीति एकपस्से इस्सरानं भण्डपटिसामनट्ठानं, एकपस्से वसनट्ठानं, एकपस्से आगन्तुकानं अद्धिकमनुस्सानं, एकपस्से दलिद्दानं कपणमनुस्सानं, एकपस्से गिलानानं वसनट्ठानं भविस्सती''ति सब्बेसं अञ्ञमञ्ञं अघट्टेत्वा वसनप्पहोनकं नगरमज्झे महतिं सालं कारेसुं, तस्स नामं **आवसथागार**न्ति। आगन्त्वा वसन्ति एत्थ आगन्तुकाति आवसथो, तदेव आगारं **आवसथागारं**।

तं दिवसञ्च तं निट्ठानं अगमासि। ते तत्थ गन्त्वा इट्ठककम्मसुधाकम्मचित्तकम्मादिवसेन सुपरिनिट्ठितं सुसज्जितं देवविमानसदिसं द्वारकोट्ठकतो पट्ठाय ओलोकेत्वा ''इदं आवसथागारं अतिविय मनोरमं सस्सिरिकं, केन नु खो पठमं

परिभुत्तं अम्हाकं दीघरत्तं हिताय सुखाय अस्सा''ति चिन्तेसुं, तस्मिंयेव च खणे ''भगवा तं गामं अनुप्पत्तो''ति अस्सोसुं, तेन ते उप्पन्नपीतिसोमनस्सा ''अम्हेहि भगवा गन्त्वापि आनेतब्बो सिया, सो सयमेव अम्हाकं वसनट्ठानं सम्पत्तो, अज्ज मयं भगवन्तं इध वसापेत्वा पठमं परिभुञ्जापेस्साम, तथा भिक्खुसङ्घं, भिक्खुसङ्घे आगते तेपिटकं बुद्धवचनं आगतमेव भविस्सति, सत्थारं मङ्गलं वदापेस्साम, धम्मं कथापेस्साम, इति तीहि रतनेहि परिभुत्ते पच्छा अम्हाकं परेसञ्च परिभोगो भविस्सति, एवं नो दीघरत्तं हिताय सुखाय भविस्सती''ति सन्निट्ठानं कत्वा एतदत्थमेव भगवन्तं उपसङ्कमिंसु। तस्मा एवमाहंसु **''अधिवासेतु नो, भन्ते, भगवा आवसथागार''**न्ति। **तेनुपसङ्कमिंसू**ति (दी० नि० अट्ठ० ३.२९७-२९८; म० नि० अट्ठ० २.२२) किञ्चापि तं दिवसमेव परिनिट्ठितत्ता देवविमानं विय सुसज्जितं सुपटिजग्गितं, बुद्धारहं पन कत्वा न पञ्ञत्तं। बुद्धा हि नाम अरञ्ञज्झासया अरञ्ञारामा, अन्तोगामे वसेय्युं वा नो वा, तस्मा भगवतो रुचिं जानित्वाव पञ्ञपेस्सामाति चिन्तेत्वा ते भगवन्तं उपसङ्कमिंसु, इदानि भगवतो रुचिं जानित्वा तथा पञ्ञापेतुकामा येनावसथागारं तेनुपसङ्कमिंसु। **सब्बसन्थरिं आवसथागारं सन्थरित्वा**ति एत्थ सन्थरणं सन्थरि, सब्बो सकलो सन्थरि एत्थाति **सब्बसन्थरि**। अथ वा सन्थतन्ति सन्थरि, सब्बं सन्थरि सब्बसन्थरि, तं **सब्बसन्थरिं**। भावनपुंसकनिद्देसोवायं, यथा सब्बमेव सन्थतं होति, एवं सन्थरित्वाति अत्थो। सब्बपठमं ताव ''गोमयं नाम सब्बमङ्गलेसु वट्टती''ति सुधापरिकम्मकतम्पि भूमिं अल्लगोमयेन ओपुञ्जापेत्वा परिसुक्खभावं ञत्वा यथा अक्कन्तट्ठाने पदं पञ्ञायति, एवं चातुज्जातियगन्धेहि लिम्पेत्वा उपरि नानावण्णकटसारके सन्थरित्वा तेसं उपरि महापिट्ठिककोजवे आदिं कत्वा हत्थत्थरणादीहि नानावण्णेहि अत्थरणेहि सन्थरितब्बयुत्तकं सब्बोकासं सन्थरापेसुं। तेन वुत्तं ''सब्बसन्थरिं आवसथागारं सन्थरित्वा''ति।

आसनानीति मज्झट्ठाने ताव मङ्गलत्थम्भं निस्साय महारहं बुद्धासनं पञ्ञपेत्वा तत्थ यं यं मुदुकञ्च मनोरमञ्च पच्चत्थरणं, तं तं अत्थरित्वा उभतोलोहितकं मनुञ्ञदस्सनं उपधानं उपदहित्वा उपरि सुवण्णरजततारकविचित्तवितानं बन्धित्वा गन्धदामपुप्फदामपत्तादामादीहि अलङ्करित्वा समन्ता द्वादसहत्थे ठाने पुप्फजालं कारेत्वा तिंसहत्थमत्तं ठानं पटसाणिया परिक्खिपापेत्वा पच्छिमभित्तिं निस्साय भिक्खुसङ्घस्स पल्लङ्कपीठअपस्सयपीठमुण्डपीठादीनि पञ्ञपापेत्वा उपरि सेतपच्चत्थरणेहि पच्चत्थरापेत्वा सालाय पाचीनपस्सं अत्तनो निसज्जायोग्गं कारेसुं। तं सन्धाय वुत्तं ''आसनानि पञ्ञपेत्वा''ति।

उदकमणिकन्ति महाकुच्छिकं समेखलं उदकचाटिं। एवं भगवा भिक्खुसङ्घो च यथारुचिया हत्थपादे धोविस्सन्ति, मुखं विक्खालेस्सन्तीति तेसु तेसु ठानेसु मणिवण्णस्स उदकस्स पूरेत्वा वासत्थाय नानापुप्फानि चेव उदकवासचुण्णानि च पक्खिपित्वा कदलिपण्णेहि पिदहित्वा पतिट्ठपेसुं। तेन वुत्तं ''उदकमणिकं पतिट्ठापेत्वा''ति।

तेलपदीपं आरोपेत्वाति रजतसुवण्णादिमयदण्डासु दण्डदीपिकासु योनकरूपकादीनं हत्थे ठपितसुवण्णरजतादिमयकपल्लिकासु च तेलपदीपे जलयित्वा। **येन भगवा तेनुपसङ्कमिंसू**ति एत्थ पन ते पाटलिगामिकउपासका न केवलं आवसथागारमेव, अथ खो सकलस्मिम्पि गामे वीथियो सज्जापेत्वा धजे उस्सापेत्वा गेहद्वारेसु पुण्णघटे च कदलिआदयो च ठपापेत्वा सकलगामं दीपमालाहि विप्पकिण्णतारकं विय कत्वा ''खीरपके दारके खीरं पायेथ, दहरकुमारे लहुं लहुं भोजेत्वा सयापेथ, उच्चासद्दं मा करित्थ, अज्ज एकरत्तिं सत्था अन्तोगामे वसिस्सति, बुद्धा नाम अप्पसद्दकामा होन्ती''ति भेरिं चरापेत्वा सयं दण्डदीपिका आदाय येन भगवा तेनुपसङ्कमिंसु।

अथ खो भगवा निवासेत्वा पत्तचीवरमादाय सद्धिं भिक्खुसङ्घेन येन आवसथागारं तेनुपसङ्कमीति ''यस्स

दानि, भन्ते, भगवा कालं मञ्ञती''ति एवं किर तेहि काले आरोचिते भगवा लाखारसेन तिन्तरत्तकोविळारपुप्फवण्णं सुरत्तं दुपट्टं कत्तरिया पदुमं कन्तेन्तो विय, संविधाय तिमण्डलं पटिच्छादेन्तो निवासेत्वा सुवण्णपामङ्गेन पदुमकलापं परिक्खिपन्तो विय, विज्जुलतासस्सिरिकं कायबन्धनं बन्धित्वा रत्तकम्बलेन गजकुम्भं परियोनन्धन्तो विय, रतनसतुब्बेधे सुवण्णग्घिके पवाळजालं खिपमानो विय, महति सुवण्णचेतिये रत्तकम्बलकञ्चुकं पटिमुञ्चन्तो विय, गच्छन्तं पुण्णचन्दं रत्तवलाहकेन पटिच्छादयमानो विय, कञ्चनगिरिमत्थके सुपक्कलाखारसं परिसिञ्चन्तो विय, चित्तकूटपब्बतमत्थकं विज्जुलताजालेन परिक्खिपन्तो विय च सचक्कवाळसिनेरुयुगन्धरमहापथविं चालेत्वा गहितनिग्रोधपल्लवसमानवण्णं रत्तवरपंसुकूलं पारुपित्वा वनगहनतो केसरसीहो विय, उदयपब्बतकूटतो पुण्णचन्दो विय, बालसूरियो विय च अत्तना निसिन्नतरुसण्डतो निक्खमि।

अथस्स कायतो मेघमुखतो विज्जुकलापा विय रस्मियो निक्खमित्वा सुवण्णरसधारापरिसेकपिञ्जरपत्तपुप्फफलसाखाविटपे विय समन्ततो रुक्खे करिंसु। तावदेव अत्तनो अत्तनो पत्तचीवरमादाय महाभिक्खुसङ्घो भगवन्तं परिवारेसि। ते च नं परिवारेत्वा ठितभिक्खू एवरूपा अहेसुं अप्पिच्छा सन्तुट्ठा पविवित्ता असंसट्ठा आरद्धवीरिया वत्तारो वचनक्खमा चोदका पापगरहिनो सीलसम्पन्ना समाधिसम्पन्ना पञ्ञासम्पन्ना विमुत्तिसम्पन्ना विमुत्तिञाणदस्सनसम्पन्ना। तेहि परिवारितो भगवा रत्तकम्बलपरिक्खित्तो विय सुवण्णक्खन्धो, रत्तपदुमसण्डमज्झगता विय सुवण्णनावा, पवाळवेदिकापरिक्खित्तो विय सुवण्णपासादो विरोचित्थ। महाकस्सपप्पमुखा पन महाथेरा मेघवण्णं पंसुकूलचीवरं पारुपित्वा मणिवम्मवम्मिता विय महानागा परिवारयिंसु वीतरागा भिन्नकिलेसा विजटितजटा छिन्नबन्धना कुले वा गणे वा अलग्गा।

इति भगवा सयं वीतरागो वीतरागेहि, वीतदोसो वीतदोसेहि, वीतमोहो वीतमोहेहि, नित्तण्हो नित्तण्हेहि, निक्किलेसो निक्किलेसेहि, सयं बुद्धो अनुबुद्धेहि परिवारितो पत्तपरिवारितं विय केसरं, केसरपरिवारिता विय कण्णिका, अट्ठनागसहस्सपरिवारितो विय छद्दन्तो नागराजा, नवुतिहंससहस्सपरिवारितो विय धतरट्ठो हंसराजा, सेनङ्गपरिवारितो विय चक्कवत्ती, मरुगणपरिवारितो विय सक्को देवराजा, ब्रह्मगणपरिवारितो विय हारितमहाब्रह्मा, तारागणपरिवुतो विय पुण्णचन्दो असमेन बुद्धवेसेन अपरिमाणेन बुद्धविलासेन पाटलिगामीनं मग्गं पटिपज्जि।

अथस्स पुरत्थिमकायतो सुवण्णवण्णा घनबुद्धरस्मियो उट्ठहित्वा असीतिहत्थं ठानं अग्गहेसुं, पच्छिमकायतो दक्खिणपस्सतो वामपस्सतो सुवण्णवण्णा घनरस्मियो उट्ठहित्वा असीतिहत्थं ठानं अग्गहेसुं, उपरिकेसन्ततो पट्ठाय सब्बकेसावत्तेहि मोरगीववण्णा घनबुद्धरस्मियो उट्ठहित्वा गगनतले असीतिहत्थं ठानं अग्गहेसुं, हेट्ठापादतलेहि पवाळवण्णा रस्मियो उट्ठहित्वा घनपथवियं असीतिहत्थं ठानं अग्गहेसुं, दन्ततो अक्खीनं सेतट्ठानतो, नखानञ्च मंसविनिमुत्तट्ठानतो ओदाता घनबुद्धरस्मियो उट्ठहित्वा असीतिहत्थं ठानं अग्गहेसुं, रत्तपीतवण्णानं सम्भिन्नट्ठानतो मञ्जिट्ठवण्णा रस्मियो उट्ठहित्वा असीतिहत्थं ठानं अग्गहेसुं, सब्बत्थकमेव पभस्सरा रस्मियो उट्ठहिंसु। एवं समन्ता असीतिहत्थमत्तं ठानं छब्बण्णा बुद्धरस्मियो विज्जोतमाना विप्फन्दमाना विधावमाना कञ्चनदण्डदीपिकाहि निच्छरित्वा आकासं पक्खन्दमाना महापदीपजाला विय, चातुद्दीपिकमहामेघतो निक्खन्तविज्जुलता विय च दिसोदिसं पक्खन्दिंसु। याहि सब्बदिसाभागा सुवण्णचम्पकपुप्फेहि विकिरियमाना विय, सुवण्णघटतो निक्खन्तसुवण्णरसधाराहि आसिञ्चियमाना विय, पसारितसुवण्णपट्टपरिक्खित्ता विय, वेरम्भवातसमुद्धतकिंसुककणिकारकिकिरातपुप्फचुण्णसमोकिण्णा विय चीनपिट्ठचुण्णसम्परिरञ्जिता विय च विरोचिंसु।

भगवतोपि असीतिअनुब्यञ्जनब्यामप्पभापरिक्खेपसमुज्जलं द्वत्तिंसमहापुरिसलक्खणपटिमण्डितं सरीरं अब्भमहिकादिउपक्किलेसविमुत्तं समुज्जलतारकपभासितं विय गगनतलं, विकसितं विय पदुमवनं, सब्बपालिफुल्लो विय योजनसतिको पारिच्छत्तको, पटिपाटिया ठपितानं द्वत्तिंसचन्दानं द्वत्तिंससूरियानं द्वत्तिंसचक्कवत्तीनं द्वत्तिंसदेवराजानं द्वत्तिंसमहाब्रह्मानं सिरिया सिरिं अभिभवमानं विय विरोचित्थ, यथा तं दसहि पारमीहि दसहि उपपारमीहि दसहि परमत्थपारमीहीति सम्मदेव परिपूरिताहि समतिंसाय पारमीहि अलङ्कतं कप्पसतसहस्साधिकानि चत्तारि असङ्ख्येय्यानि दिन्नेन दानेन रक्खितेन सीलेन कतेन कल्याणकम्मेन एकस्मिं अत्तभावे समोसरित्वा विपाकं दातुं ओकासं अलभमानेन सम्बाधप्पत्तेन विय निब्बत्तितं नावासहस्सस्स भण्डं एकं नावं आरोपनकालो विय, सकटसहस्सस्स भण्डं एकं सकटं आरोपनकालो विय, पञ्चवीसतिया गङ्गानं सम्भिज्ज मुखद्वारे एकतो रासीभूतकालो विय च अहोसि।

इमाय बुद्धरस्मिया ओभासमानस्सपि भगवतो पुरतो अनेकानि दण्डदीपिकासहस्सानि उक्खिपिंसु, तथा पच्छतो वामपस्से दक्खिणपस्से। जातिसुमनचम्पकवनमालिकारत्तुप्पलनीलुप्पलबकुलसिन्दुवारादिपुप्फानि चेव नीलपीतादिवण्णसुगन्धगन्धचुण्णानि च चातुद्दीपिकमहआमेघविस्सट्ठा सलिलवुट्ठियो विय विप्पकिरिंसु। पञ्चङ्गिकतूरियनिग्घोसा चेव बुद्धधम्मसङ्घगुणपटिसंयुत्ता थुतिघोसा च सब्बा दिसा पूरयमाना मुखरा विय अकंसु। देवसुपण्णनागयक्खगन्धब्बमनुस्सानं अक्खीनि अमतपानं विय लभिंसु। इमस्मिं पन ठाने ठत्वा पदसहस्सेहि गमनवण्णं वत्तुं वट्टति। तत्रिदं मुखमत्तं (म० नि० अट्ठ० २.२२; उदा० अट्ठ० ७६) –

''एवं सब्बङ्गसम्पन्नो, कम्पयन्तो वसुन्धरं।
अहेठयन्तो पाणानि, याति लोकविनायको॥

''दक्खिणं पठमं पादं, उद्धरन्तो नरासभो।
गच्छन्तो सिरिसम्पन्नो, सोभते द्विपदुत्तमो॥

''गच्छतो बुद्धसेट्ठस्स, हेट्ठापादतलं मुदु।
समं सम्फुसते भूमिं, रजसानुपलिम्पति॥

''निन्नं ठानं उन्नमति, गच्छन्ते लोकनायके।
उन्नतञ्च समं होति, पथवी च अचेतना॥

''पासाणा सक्खरा चेव, कथला खाणुकण्टका।
सब्बे मग्गा विवज्जन्ति, गच्छन्ते लोकनायके॥

''नातिदूरे उद्धरति, नाच्चासन्ने च निक्खिपं।
अघट्टयन्तो निय्याति, उभो जाणू च गोप्फके॥

''नातिसीघं पक्कमति, सम्पन्नचरणो मुनि।
न चातिसणिकं याति, गच्छमानो समाहितो॥

''उद्धं अधो तिरियञ्च, दिसञ्च विदिसं तथा।

न पेक्खमानो सो याति, युगमत्तञ्हि पेक्खति॥

''नागविक्कन्तचारो सो, गमने सोभते जिनो।
चारु गच्छति लोकग्गो, हासयन्तो सदेवके॥

''उसभराजाव सोभन्तो, चातुचारीव केसरी।
तोसयन्तो बहू सत्ते, गामसेट्ठं उपागमी''ति॥ (म॰ नि॰ अट्ठ॰ २.२२; उदा॰ अट्ठ॰ ७६)।

वण्णकालो नाम किरेस। एवंविधेसु कालेसु भगवतो सरीरवण्णे वा गुणवण्णे वा धम्मकथिकस्स थामोयेव पमाणं। चुण्णियपदेहि गाथाबन्धेहि वा यत्तकं सक्कोति, तत्तकं वत्तब्बं, ''दुक्कथित''न्ति वा ''अतित्थेन पक्खन्दो''ति वा न वत्तब्बो। अपरिमाणवण्णा हि बुद्धा भगवन्तो, तेसं बुद्धापि अनवसेसतो वण्णं वत्तुं असमत्था। सकलम्पि हि कप्पं वदन्ता परियोसापेतुं न सक्कोन्ति, पगेव इतरा पजाति। इमिना सिरिविलासेन अलङ्कतपटियत्तं पाटलिगामं पविसित्वा भगवा पसन्नचित्तेन जनेन पुप्फगन्धधूमवासचुण्णादीहि पूजियमानो आवसथागारं पाविसि। तेन वुत्तं ''अथ खो भगवा निवासेत्वा पत्तचीवरमादाय सद्धिं भिक्खुसङ्घेन येन आवसथागारं तेनुपसङ्कमी''ति।

पादे पक्खालेत्वाति यदिपि भगवतो पादे रजोजल्लं न उपलिम्पति, तेसं पन उपासकानं कुसलाभिवुड्ढिं आकङ्खन्तो परेसं दिट्ठानुगतिं आपज्जनत्थं भगवा पादे पक्खालेसि। अपिच उपादिन्नकसरीरं नाम सीतिकातब्बम्पि होतीति तदत्थम्पि भगवा नहानपादधोवनानि करोतियेव। **भगवन्तंयेव पुरक्खत्वा**ति भगवन्तं पुरतो कत्वा। तत्थ भगवा भिक्खूनञ्चेव उपासकानञ्च मज्झे निसिन्नो गन्धोदकेन नहापेत्वा दुकूलचुम्बटेन वोदकं कत्वा जातिहिङ्गुलकेन मज्जित्वा रत्तकम्बलपलिवेठिते पीठे ठपिता रत्तसुवण्णघनपटिमा विय अतिविय विरोचित्थ। अयं पनेत्थ पोराणानं वण्णभणनमग्गो –

''गन्त्वान मण्डलमाळं, नागविक्कन्तचारणो।
ओभासयन्तो लोकग्गो, निसीदि वरमासने॥

''तहिं निसिन्नो नरदम्मसारथि,
देवातिदेवो सतपुञ्ञलक्खणो।
बुद्धासने मज्झगतो विरोचति,
सुवण्णनेक्खं विय पण्डुकम्बले॥

''नेक्खं जम्बोनदस्सेव, निक्खित्तं पण्डुकम्बले।
विरोचति वीतमलो, मणि वेरोचनो यथा॥

''महासालोव सम्फुल्लो, मेरुराजावलङ्कतो।
सुवण्णथूपसङ्कासो, पदुमो कोसको यथा॥

''जलन्तो दीपरुक्खोव, पब्बतग्गे यथा सिखी।
देवानं पारिच्छत्तोव, सब्बफुल्लो विरोचथा''ति॥ (म॰ नि॰ अट्ठ॰ २.२२; उदा॰ अट्ठ॰ ७६)।

पाटलिगामिके उपासके आमन्तेसीति यस्मा तेसु उपासकेसु बहू जना सीले पतिट्ठिता, तस्मा पठमं ताव सीलविपत्तिया आदीनवं पकासेत्वा पच्छा सीलसम्पदाय आनिसंसं दस्सेतुं **''पञ्चिमे गहपतयो''**तिआदिना धम्मदेसनत्थं आमन्तेसि। तत्थ **दुस्सीलो**ति निस्सीलो (दी॰ नि॰ अट्ठ॰ २.१४९; अ॰ नि॰ अट्ठ॰ ३.५.२१३; उदा॰ अट्ठ॰ ७६)। अभावत्थो हेत्थ **दु**-सद्दो ''दुप्पञ्ञो''तिआदीसु विय। **सीलविपन्नो**ति विपन्नसीलो भिन्नसंवरो। एत्थ च ''दुस्सीलो''ति पदेन पुग्गलस्स सीलाभावो वुत्तो। सो पनस्स सीलाभावो दुविधो असमादानेन वा समादिन्नस्स भेदेन वाति। तेसु पुरिमो न तथा सावज्जो, यथा दुतियो सावज्जतरो। यथाधिप्पेतादीनवनिमित्तं सीलाभावं पुग्गलाधिट्ठानाय देसनाय दस्सेतुं **''सीलविपन्नो''**ति वुत्तं, तेन ''दुस्सीलो''ति पदस्स अत्थं दस्सेति। **पमादाधिकरण**न्ति पमादकारणा। इदञ्च सुत्तं गहट्ठानं वसेन आगतं, पब्बजितानम्पि पन लब्भतेव। गहट्ठो हि येन येन सिप्पट्ठानेन जीविकं कप्पेति यदि कसिया यदि वणिज्जाय यदि गोरक्खेन। पाणातिपातादिवसेन पमत्तो तं तं यथाकालं सम्पादेतुं न सक्कोति, अथस्स कम्मं विनस्सति। माघातकाले पाणातिपातं पन अदिन्नादानादीनि च करोन्तो दण्डवसेन महतिं भोगजानिं निगच्छति। पब्बजितो दुस्सीलो पमादकारणा सीलतो बुद्धवचनतो झानतो सत्तअरियधनतो च जानिं निगच्छति।

पापको कित्तिसद्दोति गहट्ठस्स ''असुको असुककुले जातो दुस्सीलो पापधम्मो परिच्चत्तइधलोकपरलोको सलाकभत्तमत्तम्पि न देती''ति चतुपरिसमज्झे पापको कित्तिसद्दो अब्भुग्गच्छति। पब्बजितस्स ''असुको नाम सत्थुसासने पब्बजित्वा नासक्खि सीलानि रक्खितुं, न बुद्धवचनं उग्गहेतुं, वेज्जकम्मादीहि जीवति, छहि अगारवेहि समन्नागतो''ति एवं पापको कित्तिसद्दो अब्भुग्गच्छति।

अविसारदोति गहट्ठो ताव ''अवस्सं बहूनं सन्निपातट्ठाने कोचि मम कम्मं जानिस्सति, अथ मं निग्गण्हिस्सन्ती''ति वा, ''राजकुलस्स वा दस्सन्ती''ति सभयो उपसङ्कमति, मङ्कुभूतो पत्तक्खन्धो अधोमुखो निसीदति, विसारदो हुत्वा कथेतुं न सक्कोति। पब्बजितोपि ''बहू भिक्खू सन्निपतिता, अवस्सं कोचि मम कम्मं जानिस्सति, अथ मे उपोसथम्पि पवारणम्पि ठपेत्वा सामञ्ञतो चावेत्वा निक्कड्ढिस्सन्ती''ति सभयो उपसङ्कमति, विसारदो हुत्वा कथेतुं न सक्कोति। एकच्चो पन दुस्सीलोपि समानो दप्पितो विय वदति, सोपि अज्झासयेन मङ्कु होतियेव विप्पटिसारीभावतो।

सम्मूळ्हो कालं करोतीति दुस्सीलस्स हि मरणमञ्चे निपन्नस्स दुस्सील्यकम्मानं समादाय वत्तितट्ठानानि आपाथमागच्छन्ति। सो उम्मीलेत्वा अत्तनो पुत्तदारादिदस्सनवसेन इधलोकं पस्सति, निमीलेत्वा गतिनिमित्तुपट्ठानवसेन परलोकं पस्सति, तस्स चत्तारो अपाया कम्मानुरूपं उपट्ठहन्ति। सत्तिसतेन पहरियमानो विय अग्गिजालाय आलिङ्गियमानो विय च होति। सो ''वारेथ वारेथा''ति विरवन्तोव मरति। तेन वुत्तं ''सम्मूळ्हो कालं करोती''ति।

कायस्स भेदाति उपादिन्नकक्खन्धपरिच्चागा। **परं मरणा**ति तदनन्तरं अभिनिब्बत्तक्खन्धग्गहणे। अथ वा **कायस्स भेदा**ति जीवितिन्द्रियस्स उपच्छेदा। **परं मरणा**ति चुतितो उद्धं। **अपाय**न्तिआदि सब्बं निरयवेवचनं। निरयो हि सग्गमोक्खहेतुभूता पुञ्ञसङ्खाता अया अपेतत्ता, सुखानं वा आयस्स आगमनस्स अभावा अपायो। दुक्खस्स गति पटिसरणन्ति **दुग्गति,** दोसबहुलताय वा दुट्ठेन कम्मुना निब्बत्ता गतीति **दुग्गति**। विवसा निपतन्ति एत्थ दुक्कटकारिनोति **विनिपातो,** विनस्सन्ता वा एत्थ निपतन्ति संभिज्जमानङ्गपच्चङ्गाति **विनिपातो**। नत्थि एत्थ अस्सादसञ्ञितो अयोति **निरयो**।

अथ वा अपायग्गहणेन तिरच्छानयोनिं दीपेति। तिरच्छानयोनि हि अपायो सुगतितो अपेतत्ता, न दुग्गति महेसक्खानं नागराजादीनं सम्भवतो। दुग्गतिग्गहणेन पेत्तिविसयं दीपेति। सो हि अपायो चेव दुग्गति च सुगतितो अपेतत्ता दुक्खस्स च

गतिभूतत्ता, न तु विनिपातो असुरसदिसं अविनिपतितत्ता। पेतमहिद्धिकानं विमानानिपि निब्बत्तन्ति। विनिपातग्गहणेन असुरकायं दीपेति। सो हि यथावुत्तेनत्थेन अपायो चेव दुग्गति च सब्बसम्पत्तिसमुस्सयेहि विनिपातत्ता विनिपातोति च वुच्चति। निरयग्गहणेन पन अवीचिआदिकं अनेकप्पकारं निरयमेव दीपेति। **उपपज्जती**ति निब्बत्तति।

आनिसंसकथा वुत्तविपरियायेन वेदितब्बा। अयं पन विसेसो – **सीलवा**ति समादानवसेन सीलवा। **सीलसम्पन्नो**ति परिसुद्धं परिपुण्णञ्च कत्वा सीलस्स सम्पादनेन सीलसम्पन्नो। **भोगक्खन्ध**न्ति भोगरासिं। **सुगतिं सग्गं लोक**न्ति एत्थ सुगतिग्गहणेन मनुस्सगतिपि सङ्गय्हति, सग्गग्गहणेन देवगति एव। तत्थ सुन्दरा गतीति **सुगति,** रूपादीहि विसयेहि सुट्ठु अग्गोति **सग्गो,** सो सब्बोपि लुज्जनपलुज्जनट्ठेन **लोको**ति।

पाटलिगामिके उपासके बहुदेव रत्तिं धम्मिया कथायाति अञ्ञायपि पाळिमुत्ताय धम्मकथाय चेव आवसथानुमोदनकथाय च। तदा हि भगवा यस्मा अजातसत्तुना तत्थ पाटलिपुत्तनगरं मापेन्तेन अञ्ञासु गामनिगमराजधानीसु ये सीलाचारसम्पन्ना कुटुम्बिका, ते आनेत्वा धनधञ्ञानि घरवत्थुखेत्तवत्थादीनि चेव परिहारञ्च दापेत्वा निवेसियन्ति, तस्मा पाटलिगामिका उपासका आनिसंसदस्साविताय विसेसतो सीलगरुकाति सब्बगुणानञ्च सीलस्स अधिट्ठानभावतो तेसं पठमं सीलानिसंसे पकासेत्वा ततो परं आकासगङ्गं ओतारेन्तो विय पथवोजं आकड्ढन्तो विय महाजम्बुं मत्थके गहेत्वा चालेन्तो विय योजनप्पमाणं महामधुं चक्कयन्तेन पीळेत्वा सुमधुररसं पायमानो विय च पाटलिगामिकानं उपासकानं हितसुखावहं पकिण्णककथं कथेन्तोपि ''आवासदानं नामेतं गहपतयो महन्तं पुञ्ञं, तुम्हाकं आवासो मया परिभुत्तो, भिक्खुसङ्घेन परिभुत्तो, मया च भिक्खुसङ्घेन च परिभुत्ते धम्मरतनेनपि परिभुत्तोयेव होति, एवं तीहि रतनेहि परिभुत्ते अपरिमेय्योव विपाको, अपिच आवासदानस्मिं दिन्ने सब्बदानं दिन्नमेव होति, भूमट्ठकपण्णसालाय वा साखामण्डपस्स वा सङ्घं उद्दिस्स कतस्स आनिसंसो परिच्छिन्दितुं न सक्का। आवासदानानुभावेन हि भवे निब्बत्तमानस्सपि सम्पीळितगब्भवासो नाम न होति, द्वादसहत्थो ओवरको वियस्स मातुकुच्छि असम्बाधोव होती''ति एवं नानानयविचित्तं बहुं धम्मकथं कथेत्वा –

''सीतं उण्हं पटिहन्ति, ततो वाळमिगानि च।
सरीसपे च मकसे, सिसिरे चापि वुट्ठियो॥

''ततो वाततपो घोरो, सञ्जातो पटिहञ्ञति।
लेणत्थञ्च सुखत्थञ्च, झायितुञ्च विपस्सितुं॥

''विहारदानं सङ्घस्स, अग्गं बुद्धेन वण्णितं।
तस्मा हि पण्डितो पोसो, सम्पस्सं अत्थमत्तनो॥

''विहारे कारये रम्मे, वासयेत्थ बहुस्सुते।
तेसं अन्नञ्च पानञ्च, वत्थसेनासनानि च॥

''ददेय्य उजुभूतेसु, विप्पसन्नेन चेतसा।
ते तस्स धम्मं देसेन्ति, सब्बदुक्खापनूदनं।
यं सो धम्मं इधञ्ञाय, परिनिब्बाति अनासवो''ति॥ (चूळव० २९५, ३१५) –

एवं अयम्पि आवासदाने आनिसंसो अयम्पि आवासदाने आनिसंसोति बहुदेव रत्तिं अतिरेकदियड्ढयामं आवासदानानिसंसं कथेसि। तत्थ इमा गाथाव सङ्गहं आरुळ्हा, पकिण्णकधम्मदेसना पन सङ्गहं न आरोहति। **सन्दस्सेत्वा**तिआदीनि वुत्तत्थानेव।

अभिक्कन्ताति अतिक्कन्ता द्वे यामा गता। **यस्सदानि तुम्हे कालं मञ्ञथा**ति यस्स गमनस्स तुम्हे कालं मञ्ञथ, गमनकालो तुम्हाकं, गच्छथाति वुत्तं होति। कस्मा पन भगवा ते उय्योजेसीति? अनुकम्पाय। तियामरत्तिञ्हि निसीदित्वा वीतिनामेन्तानं तेसं सरीरे आबाधो उप्पज्जेय्य, भिक्खुसङ्घोपि च महा, तस्स सयननिसज्जानं ओकासं लद्धुं वट्टति, इति उभयानुकम्पाय उय्योजेसि।

सुञ्ञागारन्ति पाटियेक्कं सुञ्ञागारं नाम तत्थ नत्थि। ते किर गहपतयो तस्सेव आवसथागारस्स एकपस्से पटसाणिं परिक्खिपापेत्वा कप्पियमञ्चं पञ्ञपेत्वा तत्थ कप्पियपच्चत्थरणानि अत्थरित्वा उपरि सुवण्णरजततारकगन्धमालादिदामपटिमण्डितं वितानं बन्धित्वा गन्धतेलपदीपं आरोपयिंसु ''अप्पेव नाम सत्था धम्मासनतो वुट्ठाय थोकं विस्समेतुकामो इध निपज्जेय्य, एवं नो इदं आवसथागारं भगवता चतूहि इरियापथेहि परिभुत्तं दीघरत्तं हिताय सुखाय भविस्सती''ति। सत्थापि तदेव सन्धाय तत्थ सङ्घाटिं पञ्ञपेत्वा सीहसेय्यं कप्पेसि। तं सन्धाय वुत्तं ''सुञ्ञागारं पाविसी''ति। तत्थ पादधोवनट्ठानतो पट्ठाय याव धम्मासना अगमासि, एत्तके ठाने गमनं निप्फन्नं। धम्मासनं पत्वा थोकं अट्ठासि, इदं तत्थ ठानं। द्वे यामे धम्मासने निसीदि, एत्तके ठाने निसज्जा निप्फन्ना। उपासके उय्योजेत्वा धम्मासनतो ओरुय्ह यथावुत्ते ठाने सीहसेय्यं कप्पेसि। एतं ठानं भगवता चतूहि इरियापथेहि परिभुत्तं अहोसीति।

पाटलिगामवत्थुकथावण्णना निट्ठिता।

सुनिधवस्सकारवत्थुकथावण्णना

२८६. सुनिधवस्सकाराति (दी॰ नि॰ २.१५३; उदा॰ अट्ठ॰ ७६) सुनिधो च वस्सकारो च द्वे ब्राह्मणा। **मगधमहामत्ता**ति मगधरञ्ञो महाअमच्चा, मगधरट्ठे वा महामत्ता, महतिया इस्सरियमत्ताय समन्नागताति मगधमहामत्ता। **पाटलिगामे नगरं मापेन्ती**ति पाटलिगामन्तसङ्खाते भूमिप्पदेसे नगरं मापेन्ति, पुब्बे ''पाटलिगामो''ति लद्धनामं ठानं इदानि नगरं कत्वा मापेन्तीति अत्थो। **वज्जीनं पटिबाहाया**ति लिच्छविराजूनं आयमुखपच्छिन्दनत्थं। **वत्थूनी**ति घरवत्थूनि घरपतिट्ठापनट्ठानानि। **चित्तानि नमन्ति निवेसनानि मापेतु**न्ति रञ्ञो राजमहामत्तानञ्च निवेसनानि मापेतुं वत्थुविज्जापाठकानं चित्तानि नमन्ति। ते किर अत्तनो सिप्पानुभावेन हेट्ठापथवियं तिंसहत्थमत्ते ठाने ''इध नागानं निवासपरिग्गहो, इध यक्खानं, इध भूतानं निवासपरिग्गहो, इध पासाणो वा खाणुको वा अत्थी''ति जानन्ति, ते तदा सिप्पं जप्पित्वा तादिसं सारम्भट्ठानं परिहरित्वा अनारम्भे ठाने ताहि वत्थुपरिग्गाहिकाहि देवताहि सद्धिं मन्तयमाना विय तंतंगेहानि मापेन्ति।

अथ वा नेसं सरीरे देवता अधिमुच्चित्वा तत्थ तत्थ निवेसनानि मापेतुं चित्तं नामेन्ति। ता चतूसु कोणेसु खाणुके कोट्टेत्वा वत्थुम्हि गहितमत्ते पटिविगच्छन्ति। सद्धानं कुलानं सद्धा देवता तथा करोन्ति, अस्सद्धानं कुलानं अस्सद्धा देवता च। किं कारणा? सद्धानञ्हि एवं होति ''इध मनुस्सा निवेसनं मापेन्ता पठमं भिक्खुसङ्घं निसीदापेत्वा मङ्गलं वदापेस्सन्ति, अथ मयं सीलवन्तानं दस्सनं धम्मकथं पञ्हविस्सज्जनं अनुमोदनञ्च सोतुं लभिस्साम, मनुस्सादानं दत्वा अम्हाकं पत्तिं दस्सन्ती''ति। अस्सद्धा देवतापि ''अत्तनो इच्छानुरूपं तेसं पटिपत्तिं पस्सितुं कथञ्च सोतुं लभिस्सामा''ति तथा करोन्ति।

तावतिंसेहीति यथा हि एकस्मिं कुले एकं पण्डितं मनुस्सं, एकस्मिञ्च विहारे एकं बहुस्सुतं भिक्खुं उपादाय ''असुककुले मनुस्सा पण्डिता, असुकविहारे भिक्खू बहुस्सुता''ति सद्दो अब्भुग्गच्छति, एवमेवं सक्कं देवराजानं विस्सकम्मञ्च देवपुत्तं उपादाय ''तावतिंसा पण्डिता''ति सद्दो अब्भुग्गतो। तेनाह ''तावतिंसेही''ति। **सेय्यथापी**तिआदिना देवेहि तावतिंसेहि सद्धिं मन्तेत्वा विय सुनिधवस्सकारा नगरं मापेन्तीति दस्सेति।

यावता अरियं आयतनन्ति यत्तकं अरियमनुस्सानं ओसरणट्ठानं नाम अत्थि। **यावता वणिप्पथो**ति यत्तकं वाणिजानं आहटभण्डस्स रासिवसेनेव कयविक्कयट्ठानं नाम, वाणिजानं वसनट्ठानं वा अत्थि। **इदं अग्गनगर**न्ति तेसं अरियायतनवणिप्पथानं इदं नगरं अग्गं भविस्सति जेट्ठकं पामोक्खं। **पुटभेदन**न्ति भण्डपुटभेदनट्ठानं, भण्डगन्थिकानं मोचनट्ठानन्ति वुत्तं होति। सकलजम्बुदीपे अलद्धभण्डम्पि हि इधेव लभिस्सति, अञ्ञत्थ विक्कयं अगच्छन्तम्पि इध विक्कयं गच्छिस्सति, तस्मा इधेव पुटं भिन्दिस्सतीति अत्थो। आयन्ति यानि चतूसु द्वारेसु चत्तारि, सभायं एकन्ति एवं दिवसे दिवसे पञ्चसतसहस्सानि तत्थ उट्ठहिस्सन्ति, तानिस्स भावीनि आयानि दस्सेति। **अग्गितो वा**तिआदीसु च-कारत्थो **वा**-सद्दो, अग्गिना च उदकेन च मिथुभेदेन च नस्सिस्सतीति अत्थो। तस्स हि एको कोट्ठासो अग्गिना नस्सिस्सति, निब्बापेतुम्पि नं न सक्खिस्सति, एकं कोट्ठासं गङ्गा गहेत्वा गमिस्सति, एको इमिना अकथितं अमुस्स, अमुना अकथितं इमस्स वदन्तानं पिसुणवाचानं वसेन भिन्नानं मनुस्सानं अञ्ञमञ्ञभेदेन विनस्सिस्सति।

एवं वत्वा भगवा पच्चूसकाले गङ्गातीरं गन्त्वा कतमुखधोवनो भिक्खाचारकालं आगमयमानो निसीदि। सुनिधवस्सकारापि ''अम्हाकं राजा समणस्स गोतमस्स उपट्ठाको, सो अम्हे उपगते पुच्छिस्सति 'सत्था किर पाटलिगामं अगमासि, किं तस्स सन्तिकं उपसङ्कमित्थ, न उपसङ्कमित्था'ति, 'उपसङ्कमिम्हा'ति च वुत्ते 'निमन्तयित्थ, न निमन्तयित्था'ति पुच्छिस्सति, 'न निमन्तयिम्हा'ति च वुत्ते अम्हाकं दोसं आरोपेत्वा निग्गण्हिस्सति, इदञ्चापि मयं अकतट्ठाने नगरं मापेम, समणस्स खो पन गोतमस्स गतगतट्ठाने काळकण्णिसत्ता पटिक्कमन्ति, तं मयं नगरमङ्गलं वाचापेस्सामा''ति चिन्तेत्वा सत्थारं उपसङ्कमित्वा निमन्तयिंसु। तेन वुत्तं ''**अथ खो सुनिधवस्सकारा**''तिआदि। **पुब्बण्हसमय**न्ति पुब्बण्हकाले। **निवासेत्वा**ति गामप्पवेसननीहारेन निवासनं निवासेत्वा कायबन्धनं बन्धित्वा। **पत्तचीवरमादाया**ति पत्तञ्च चीवरञ्च आदियित्वा कायपटिबद्धं कत्वा, चीवरं पारुपित्वा पत्तं हत्थेन गहेत्वाति अत्थो।

सीलवन्तेत्थाति सीलवन्ते एत्थ अत्तनो वसनट्ठाने। **सञ्ञते**ति कायवाचाचित्तेहि सञ्ञते। **तासं दक्खिणमादिसे**ति सङ्घस्स दिन्ने चत्तारो पच्चये तासं घरदेवतानं आदिसेय्यपत्तिं ददेय्य। **पूजिता पूजयन्ती**ति ''इमे मनुस्सा अम्हाकं ञातकापि न होन्ति, तथापि नो पत्तिं देन्तीति आरक्खं सुसंविहितं करोथा''ति सुट्ठु आरक्खं करोन्ति। **मानिता मानयन्ती**ति कालानुकालं बलिकम्मकरणेन मानिता ''एते मनुस्सा अम्हाकं ञातकापि न होन्ति, तथापि चतुमासछमासन्तरे नो बलिकम्मं करोन्ती''ति मानेन्ति उप्पन्नपरिस्सयं हरन्ति। **ततो न**न्ति ततो नं पण्डितजातिकं मनुस्सं। **ओरस**न्ति उरे ठपेत्वा संवड्ढितं, यथा माता ओरसं पुत्तं अनुकम्पति, उप्पन्नपरिस्सयहरणत्थमेवस्स वायमति, एवं अनुकम्पन्तीति अत्थो। **भद्रानि पस्सती**ति सुन्दरानि पस्सति।

अनुमोदित्वाति तेहि तदा पसुतपुञ्ञस्स अनुमोदनवसेन तेसं धम्मकथं कत्वा। सुनिधवस्सकारापि ''या तत्थ देवता आसुं, तासं दक्खिणमादिसे''ति भगवतो वचनं सुत्वा देवतानं पत्तिं अदंसु। **तं गोतमद्वारं नाम अहोसी**ति तस्स नगरस्स येन द्वारेन भगवा निक्खमि, तं गोतमद्वारं नाम अहोसि। गङ्गाय पन उत्तरणत्थं अनोतिण्णत्ता गोतमतित्थं नाम नाहोसि। **पूरा**ति पुण्णा। **समतित्तिका**ति तीरसमं उदकस्स तित्ता भरिता। **काकपेय्या**ति तीरे ठितकाकेहि पातुं सक्कुणेय्यउदका।

तीहिपि पदेहि उभतोकूलसमं परिपुण्णभावमेव वदति। **उळुम्प**न्ति पारगमनत्थाय लहुके दारुदण्डे गहेत्वा कवाटफलके विय अञ्ञमञ्ञसम्बन्धे कातुं आणियो कोट्टेत्वा नावासङ्खेपेन कतं। **कुल्ल**न्ति वेळुनळादिके सङ्करित्वा वल्लिआदीहि कलापवसेन बन्धित्वा कतं।

एतमत्थं विदित्वाति एतं महाजनस्स गङ्गुदकमत्तस्सपि केवलं तरितुं असमत्थतं, अत्तनो पन भिक्खुसङ्घस्स च अतिगम्भीरवित्थतं संसारमहण्णवं तरित्वा ठितभावञ्च सब्बाकारतो विदित्वा तदत्थपरिदीपनं इमं उदानं उदानेसि। उदानगाथाय अत्थो पन अट्ठकथायं दस्सितोयेव। तत्थ **उदकट्ठानस्सेतं अधिवचन**न्ति यथावुत्तस्स यस्स कस्सचि उदकट्ठानस्स एतं अण्णवन्ति अधिवचनं, न समुद्दस्सेवाति अधिप्पायो। **सर**न्ति इध नदी अधिप्पेता सरति सन्दतीति कत्वा। **गम्भीरं वित्थत**न्ति अगाधट्ठेन गम्भीरं, सकललोकत्तयब्यापिताय वित्थतं। **विसज्जा**ति अनासज्ज अप्पत्वा एव पल्ललानि तेसं अतरणतो। **कुल्लञ्हि जनो बन्धती**ति कुल्लं बन्धितुं आयासं आपज्जति। **विना एव कुल्लेना**ति ईदिसं उदकं कुल्लेन ईदिसेन विना एव। **तिण्णा मेधाविनो जना**ति अरियमग्गञाणसङ्खाताय मेधाय समन्नागतत्ता मेधाविनो बुद्धा च बुद्धसावका च तिण्णा परतीरे पतिट्ठिता।

सुनिधवस्सकारवत्थुकथावण्णना निट्ठिता।

कोटिगामे सच्चकथावण्णना

२८७. **कोटिगामो**ति महापनादस्स रञ्ञो पासादकोटियं कतगामो, पतितस्स पासादस्स थुपिकाय पतिट्ठितट्ठाने निविट्ठगामोति अत्थो। **अरियसच्चान**न्ति ये पटिविज्झन्ति, तेसं अरियभावकरानं सच्चानं। **अननुबोधा**ति अबुज्झनेन अजाननेन। **अप्पटिवेधा**ति अप्पटिविज्झनेन। **अनुबोधो** चेत्थ पुब्बभागियञाणं, **पटिवेधो** मग्गञाणेन अभिसमयो। तत्थ यस्मा अनुबोधपुब्बको पटिवेधो अनुबोधेन विना न होति, अनुबोधोपि एकच्चो पटिवेधसम्बन्धो तदुभयाभावहेतुकञ्च वट्टे संसरणं, तस्मा वुत्तं ''अननुबोधा...पे०... तुम्हाकञ्चा''ति। तत्थ **सन्धावित**न्ति पटिसन्धिग्गहणवसेन भवतो भवन्तरुपगमनेन सन्धावितं। **संसरित**न्ति अपरापरं चवनुपपज्जनवसेन संसरितं। **ममञ्चेव तुम्हाकञ्चा**ति मया च तुम्हेहि च। अथ वा **सन्धावितं संसरित**न्ति सन्धावनं संसरणं ममञ्चेव तुम्हाकञ्च अहोसीति एवमेत्थ अत्थो वेदितब्बो।

संसितन्ति संसरितं। **भवनेत्ति समूहता**ति दीघरज्जुया बद्धसकुणं विय रज्जुहत्थो पुरिसो देसन्तरं, तण्हारज्जुया बद्धसत्तसन्तानं अभिसङ्खारो भवन्तरं नेति एतायाति भवनेत्ति, सा भवतो भवं नयनसमत्था तण्हारज्जु अरियमग्गसत्थेन सुट्ठु हता छिन्ना अप्पवत्तिकताति भवनेत्ति समूहता।

अम्बपालीवत्थुकथावण्णना

२८८. **यानस्स भूमी**ति यत्थ सक्का होति यानं आरुय्ह यानेन गन्तुं, अयं यानस्स भूमि नाम। **याना पच्चोरोहित्वा**ति विहारस्स बहिद्वारकोट्ठके यानतो ओरोहित्वा।

लिच्छवीवत्थुकथावण्णना

२८९. **नीला**ति इदं सब्बसङ्गाहकवचनं। **नीलवण्णा**तिआदि तस्सेव विभागदस्सनत्थं। तत्थ न तेसं पकतिवण्णो नीलो, नीलविलेपनविलित्तत्ता पनेतं वुत्तं। **नीलवत्था**ति पटदुकूलकोसेय्यादीनिपि नेसं नीलानेव होन्ति। **नीलालङ्कारा**ति

नीलमणिअलङ्कारेहि नीलपुप्फेहि च अलङ्कता। ते किर अलङ्कारा सुवण्णविचित्तापि इन्दनीलमणिओभासेहि एकनीला विय खायन्ति, रथापि नेसं नीलमणिखचिता नीलवत्थपरिक्खित्ता नीलधजनीलवम्मिकेहि नीलाभरणेहि नीलअस्सेहि युत्ता, पतोदयट्ठियोपि नीलायेवाति इमिना नयेन सब्बपदेसु अत्थो वेदितब्बो। **पटिवट्टेसी**ति पहरि। **किस्स जे अम्बपाली**ति **जे**-ति आलपनं, भोति अम्बपालि किंकारणाति वुत्तं होति। **साहार**न्ति एत्थ आहरन्ति इमस्मा राजपुरिसा बलिन्ति **आहारो,** तब्भुत्तजनपदो। तेन सहितं साहारं, सजनपदन्ति अत्थो। **अङ्गुलिं फोटेसु**न्ति अङ्गुलिं चालेसुं। **अम्बकाया**ति मातुगामेन। उपचारवचनञ्हेतं, इत्थीसु यदिदं अम्बका मातुगामो जननिकाति। **ओलोकेथा**ति पस्सथ। **अपलोकेथा**ति अपवत्तित्वा ओलोकेथ, पुनप्पुनं पस्सथाति अत्थो। **उपसंहरथा**ति उपनेथ, इमं लिच्छवीपरिसं तुम्हाकं चित्तेन तावतिंससदिसं उपसंहरथ उपनेथ अल्लीयापेथ। यथेव तावतिंसा अभिरूपा पासादिका नीलादिनानावण्णा, एवमिमे लिच्छवीराजानोपीति तावतिंसेहि समके कत्वा पस्सथाति अत्थो।

कस्मा पन भगवा अनेकसतेहि सुत्तेहि चक्खादीनं रूपादीसु निमित्तग्गाहं पटिसेधेत्वा इध महन्तेन उस्साहेन निमित्तग्गाहे नियोजेतीति? हितकामताय तेसं भिक्खूनं यथा आयस्मतो नन्दस्स हितकामताय सग्गसम्पत्तिदस्सनत्थं। तत्र किर एकच्चे भिक्खू ओसन्नवीरिया, ते सम्पत्तिया पलोभेन्तो ''अप्पमादेन समणधम्मं करोन्तानं एवरूपा इस्सरियसम्पत्ति सुलभा''ति समणधम्मे उस्साहजननत्थं आह। अथ वा नयिदं निमित्तग्गाहे नियोजनं, केवलं पन ''दिब्बसम्पत्तिसदिसा एतेसं राजूनं इस्सरियसम्पत्ती''ति अनुपुब्बिकथाय सम्पत्तिकथनं विय दट्ठब्बं। अनिच्चलक्खणविभावनत्थञ्चापि एवमाह। न चिरस्सेव हि सब्बेपिमे अजातसत्तुस्स वसेन विनासं पापुणिस्सन्ति, अथ नेसं रज्जसिरिसम्पत्तिं दिस्वा ठितभिक्खू ''तथारूपायपि नाम सिरिसम्पत्तिया विनासो पञ्ञायिस्सती''ति अनिच्चलक्खणं भावेत्वा सह पटिसम्भिदाहि अरहत्तं पापुणिस्सन्तीति अनिच्चलक्खणविभावनत्थं आह।

अधिवासेतूति अम्बपालिया निमन्तितभावं ञत्वापि कस्मा निमन्तेन्तीति? असद्दहनताय च वत्तसीसेन च। सा हि धुत्ता इत्थी अनिमन्तेत्वापि ''निमन्तेसि''न्ति वदेय्याति तेसं अहोसि। धम्मं सुत्वा गमनकाले च निमन्तेत्वा गमनं नाम मनुस्सानं वत्तमेव।

लिच्छवीवत्थुकथावण्णना निट्ठिता।

सीहसेनापतिवत्थुकथावण्णना

२९०. अभिञ्ञाताति (अ॰ नि॰ अट्ठ॰ ३.८.१२) ञाता पञ्ञाता पाकटा। **सन्थागारे**ति महाजनस्स सन्थम्भनागारे विस्समनत्थाय कते अगारे। सा किर सन्थागारसाला नगरमज्झे अहोसि, चतूसु द्वारेसु ठितानं पञ्ञायति, चतूहि दिसाहि आगतमनुस्सा पठमं तत्थ विस्समित्वा पच्छा अत्तनो अत्तनो फासुकट्ठानं गच्छन्ति। राजकुलानं रज्जकिच्चसन्थरणत्थं कतं अगारन्तिपि वदन्तियेव। तत्थ हि निसीदित्वा लिच्छवीराजानो रज्जकिच्चं सन्थरन्ति करोन्ति विचारेन्ति। **सन्निसिन्ना**ति तेसं निसीदनत्थंयेव पञ्ञत्तेसु महारहपच्चत्थरणेसु समुस्सितसेतच्छत्तेसु आसनेसु सन्निसिन्ना। **अनेकपरियायेन बुद्धस्स वण्णं भासन्ती**ति राजकुलकिच्चञ्चेव लोकत्थकिरियञ्च विचारेत्वा अनेकेहि कारणेहि बुद्धस्स वण्णं भासन्ति। पण्डिता हि ते राजानो सद्धासम्पन्ना सोतापन्नापि सकदागामिनोपि अनागामिनोपि अरियसावका, ते सब्बेपि लोकियजटं भिन्दित्वा बुद्धादीनं तिण्णं रतनानं वण्णं भासन्ति।

तत्थ तिविधो बुद्धवण्णो नाम चरियवण्णो सरीरवण्णो गुणवण्णोति। तत्रिमे राजानो चरियाय वण्णं आरभिंसु –

‘‘दुक्करं वत कतं सम्मासम्बुद्धेन कप्पसतसहस्साधिकानि चत्तारि असङ्ख्येय्यानि दस पारमियो दस उपपारमियो दस परमत्थपारमियोति समतिंस पारमियो पूरेन्तेन ञातत्थचरियं लोकत्थचरियं बुद्धत्थचरियं मत्थकं पापेत्वा पञ्च महापरिच्चागे परिच्चजन्तेना’’ति अड्ढच्छक्केहि जातकसतेहि बुद्धवण्णं कथेन्ता तुसितभवनं पापेत्वा ठपयिंसु। धम्मस्स वण्णं भासन्ता पनेते ‘‘भगवता धम्मो देसितो, निकायतो पञ्च निकाया होन्ति, पिटकतो तीणि पिटकानि, अङ्गतो नव अङ्गानि, खन्धतो चतुरासीतिधम्मक्खन्धसहस्सानी’’ति कोट्ठासवसेन धम्मगुणं कथयिंसु। सङ्घस्स वण्णं भासन्ता ‘‘सत्थु धम्मदेसनं सुत्वा पटिलद्धसद्धा कुलपुत्ता भोगक्खन्धञ्चेव ञातिपरिवट्टञ्च पहाय सेतच्छत्तउपरज्जसेनापतिसेट्ठिभण्डागारिकट्ठानन्तरादीनि अगणयित्वा निक्खम्म सत्थु वरसासने पब्बजन्ति, सेतच्छत्तं पहाय पब्बजितानं भद्दियमहाराजमहाकप्पिनपुक्कुसातिआदिराजपब्बजितानंयेव बुद्धकाले असीति सहस्सानि अहेसुं, अनेककोटिधनं पहाय पब्बजितानं पन यसकुलपुत्तसोणसेट्ठिपुत्तरट्ठपालपुत्तादीनं परिच्छेदो नत्थि, एवरूपा च एवरूपा च कुलपुत्ता सत्थु सासने पब्बजन्ती’’ति पब्बज्जासङ्खेपवसेन सङ्घगुणं कथयिंसु।

सीहो सेनापतीति एवंनामको सेनाय अधिपति। वेसालियञ्हि सत्त सहस्सानि सत्त सतानि सत्त च राजानो, ते सब्बेपि सन्निपतित्वा सब्बेसं मनं गहेत्वा ‘‘रट्ठं विचारेतुं समत्थं एकं विचिनथा’’ति विचिनन्ता सीहराजकुमारं दिस्वा ‘‘अयं सक्खिस्सती’’ति सन्निट्ठानं कत्वा तस्स रत्तमणिवण्णकम्बलपरियोनद्धं सेनापतिच्छत्तं अदंसु। तं सन्धाय वुत्तं ‘‘सीहो सेनापती’’ति। **निगण्ठसावको**ति निगण्ठस्स नाटपुत्तस्स पच्चयदायको उपट्ठाको। जम्बुदीपतलस्मिञ्हि तयो जना निगण्ठानं अग्गुपट्ठाका – नाळन्दायं उपालि गहपति, कपिलपुरे वप्पो सक्को, वेसालियं अयं सीहो सेनापतीति। **निसिन्नो होती**ति सेसराजूनम्पि परिसाय अन्तरे आसनानि पञ्ञापयिंसु, सीहस्स पन मज्झे ठानेति तस्मिं पञ्ञत्ते महारहे राजासने निसिन्नो होति। **निस्संसय**न्ति निब्बिचिकिच्छं अद्धा एकंसेन। न हेते यस्स वा तस्स वा अप्पेसक्खस्स एवं अनेकसतेहि कारणेहि वण्णं भासन्ति।

येन निगण्ठो नाटपुत्तो तेनुपसङ्कमीति निगण्ठो किर नाटपुत्तो ‘‘सचायं सीहो कस्सचिदेव समणस्स गोतमस्स वण्णं कथेन्तस्स सुत्वा समणं गोतमं दस्सनाय उपसङ्कमिस्सति, मय्हं परिहानि भविस्सती’’ति चिन्तेत्वा पठमतरंयेव सीहं सेनापतिं एतदवोच ‘‘सेनापति इमस्मिं लोके ‘अहं बुद्धो अहं बुद्धो’ति बहू वदन्ति, सचे त्वं कञ्चि दस्सनाय उपसङ्कमितुकामो अहोसि, मं पुच्छेय्यासि, अहं ते युत्तट्ठानञ्ञेव पेसेस्सामि, अयुत्तट्ठानतो निवारेस्सामी’’ति। सो तं कथं अनुस्सरित्वा ‘‘सचे मं पेसेस्सति, गमिस्सामि। नो चे, न गमिस्सामी’’ति चिन्तेत्वा येन निगण्ठो नाटपुत्तो तेनुपसङ्कमि।

अथस्स वचनं सुत्वा निगण्ठो महापब्बतेन विय बलवसोकेन ओत्थटो ‘‘यत्थ दानिस्साहं गमनं न इच्छामि, तत्थेव गन्तुकामो जातो, हतोहमस्मी’’ति अनत्तमनो हुत्वा ‘‘पटिबाहनुपायमस्स करिस्सामी’’ति चिन्तेत्वा **‘‘किं पन त्व’’**न्तिआदिमाह। एवं वदन्तो चरन्तं गोणं तुण्डे पहरन्तो विय जलमानं पदीपं निब्बापेन्तो विय भत्तभरितं पत्तं निकुज्जन्तो विय च सीहस्स उप्पन्नं पीतिं विनासेसि। **गमिकाभिसङ्खारो**ति हत्थियानादीनं योजापनगन्धमालादिग्गहणवसेन पवत्तो पयोगो। **सो पटिप्पस्सम्भी**ति सो वूपसन्तो।

